7116

1. Title Bṛahma Sūṭra Vṛitti Vivaraṇākhyā
2. Accession No. 5583
3. Folio No./Pages 199
4. Lines 23-24
5. Size 25 × 17Cm
6. Substance Paper
7. Script Devanāgarī
8. Langna[illegible]e San[illegible]
9. Period Not me[illegible]oned
10. Beginn[illegible]g "श्री [illegible]पतेनमः ब्रह्मसूत्रवृत्ति स्तात्पर्य विवर[illegible]ाख्या ।। यन्माय या जगत्सर्व जायते येन जीवति···"
11. End "इति[illegible] [illegible]ह्म सूत्र तात्पर्य विवरणे चतुर्थाध्याय स्यतुरीय पादः ।। समाप्तञ्च ब्रह्मविचार शास्त्रम् ।।"
12. Colophon Yes
13. Illustrations No
14. Source Donated by Hariraja Sharma
15. Subject Brahma Sūtra
16. Revisor No
17. Author Kshitishvar
18. Remarks Bound, fair Condition.

Pt. Kshitīśvar.
Brahma Sūtra-Vṛitti-Vivaraṇākhyā.
Jodhapur. Hariraj Sharma,
199b
Language - Sanskrit, Hand Written.
Size - 26×18 cm.
(यन्माय या जगत्सर्वं ....परिसमाप्ति
दर्शयति)

साधारणदर्शनस्य प्रथमपरीक्षायाम्

१-षड्दर्शनसमुच्चयः २-तर्कामृतम् ३-सांख्यसारः ४ मीमांसापरिभाषा,
पत्रेऽनुवादो वेदान्तपरिभाषा च

तस्यैव मध्यमपरीक्षायाम्

१-तर्कसंग्रहः २-पञ्चदशी ३-योगसूत्रवृत्तिः ४-सिद्धान्तमुक्तावली ५-जैमिनीय-
न्यायमाला (प्रथमाध्यायः) — अनुवादस्य द्वितीयपत्रं रचनायाञ्च

तस्यैवोपाधिपरीक्षायाम्

प्रथमपत्रम्

१-माधवाचार्यकृत-सर्वदर्शनसंग्रहः २-अद्वैतब्रह्मसिद्धिः

द्वितीयपत्रम्

१- सांख्यतत्त्वकौमुदी, योगसूत्रभाष्यम्, (वाचस्पतिकृतटीकासहितम्, शास्त्र-
याः तर्कपादश्च)

तृतीयपत्रम्

वेदान्तसिद्धान्तमुक्तावली, कुसुमाञ्जलि (हरिदासटीकासमेतः) भाषा-
मुक्तावली, षट्सन्दर्भश्च (जीवगोस्वामिकृतः)

चतुर्थपत्रम्

मौखिकपरीक्षा (ग्रन्थव्याख्यामात्रजिज्ञासा)

...स्वपूर्वपक्ष व्याप्ति...

...ध्याधिकरण प्रतियोगिकभेदाधिकरणानिरूपितवृत्तित्वात्यन्ताभावो...
...व्याप्तिः

...ाध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावत् प्र-
...तियोगिकभेदाधिकरणानिरूपितवृत्तित्वात्यन्ताभावो व्याप्तिः

...ाध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावत्वा...
...च्छिन्न प्रतियोगिकभेदाधिकरणानिरूपितवृत्तित्वात्यन्ताभावो
...व्याप्तिः

...ाध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावत्वाव...
...च्छिन्नप्रतियोगिकभेदाधिकरणानिरूपितहेतुतावच्छेदकसम्बन्धाव...
...च्छिन्न वृत्तित्वात्यन्ताभावो व्याप्तिः

...ाध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावत्वाव...
...ावच्छिन्न प्रतियोगिकभेदाधिकरणानिरूपितहेतुतावच्छेदकसम्बन्धाव...
...न्नवृत्तित्वत्वावच्छिन्न प्रतियोगिताकात्यन्ताभावो व्याप्तिः

...ध्य...तावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणतावत्वाव...
... प्रति...योगिकभेदाधिकरणानिरूपितहेतुतावच्छेदकसम्बन्धावच्छिन्न
...ितानवच्छेदकं हेतुतावच्छेदकं व्याप्तिः

मुक्तावलीस्थ सिद्धान्त व्याप्तिस्वरूपम्

१.

...धिकरणात्यन्ताभावाप्रतियोगि साध्यसामानाधिकरण्यं...

...धिकरणवृत्त्यत्यन्ताभावीय प्रतियोगितानवच्छेदकसाध्यताव...
...ावच्छिन्न सामानाधिकरण्यम् व्याप्तिः

वच्छेदकावच्छिन्नवत्सामानाधिकरण्यं व्याप्तिः

४- हेतुतावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणतावच्छिन्नत्यन्ताभावीय प्रति-
च्छेदकसाध्यतावच्छेदकावच्छिन्न सामानाधिकरण्यं व्याप्तिः

५- हेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिता-
च्छिन्नत्यन्ताभावीय प्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्न सा० व्या०

६- हेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधि-
प्रतियोगिव्यधिकरणात्यन्ताभावीय प्रतियोगितानवच्छेदकसाध्यतावच्छेदकाव-

७- स्वप्रतियोग्यनधिकरणीभूतहेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसम्बन्धाव-
रूपिताधिकरणतावच्छिन्नत्यन्ताभावीयप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छि-

८- स्वप्रतियोगितावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणतावच्छिन्नहेतुतावच्छेदकावच्छिन्नहे-
च्छिन्नाधेयतानिरूपिताधिकरणतावच्छिन्नत्यन्ताभावीयप्रतियोगितानवच्छेदकसाध्य-

९- स्वप्रतियोगितावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिक-
हेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपिताधिकरणताव-
यप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसा० व्या०

१०- यादृशप्रतियोगितावच्छेदकावच्छिन्नसाध्यतावच्छेदकसम्बन्धावच्छिन्ना-
रूपिताधिकरणतावच्छिन्नहेतुतावच्छेदकावच्छिन्न हेतुतावच्छेदकसम्बन्धाव-
तानिरूपिताधिकरणतावच्छिन्नत्यन्ताभावीय यादृशप्रतियोगितानव-
तावच्छेदकावच्छिन्न सामानाधिकरण्यं व्याप्तिः

११- प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यनधिकरणीभूतहे-
त्वभावप्रतियोगितासामान्ये यत्सम्बन्धावच्छिन्नत्व यद्धः
र्मावच्छिन्नत्वयाभावस्तेन सम्बन्धेन तद्धर्मावच्छिन्नो व्यापकः तत्सामा०
व्याप्तिः

इति॥

श्रीगणेशाय नमः।

नूतनजलधररुचये। गोपवधूटीदुकूलचौराय॥
तस्मै कृष्णाय नमः संसारमहीरुहस्य बीजाय॥१॥
चूडामणीकृतविधुर्वलयीकृतवासुकिः॥
भवो भवतु भव्याय लीलाताण्डवपण्डितः॥२॥

अथ मुक्तावल्यां व्याप्तिस्वरूपमाह। व्याप्तिः साध्यवदन्यास्मिन्निति।
ध्याधिकरणप्रतियोगिकभेदाधिकरणनिरूपितवृत्तित्वात्यन्ताभा-
व्याप्तिरित्यर्थः। समन्वयस्तु पर्वतो वह्निमानित्यनुमितिसाध्यके
मरूपसद्धेतौ यथा। तथाहि साध्यो वह्निस्तदधिकरणं पर्वतस्त-
प्रतियोगिताको भेदो वह्निमान्नेत्याकारकः- तदधिकरणं ह्रदः
न्निरूपितवृत्तित्वं मीनादौ वृत्तित्वात्यन्ताभावो धूमे समाग-
इति। न च पर्वतो धूमवान् वह्नेरित्यत्रातिव्याप्तिरिति
च्यम्। धूमवान्नेत्याकारकस्य साध्याधिकरणप्रतियोगिक
याधिकरणे-ऽयोगोलके हेतौ वह्नेर्विद्यमानत्वात्। ननु
वह्निमान् [illegible] दित्यत्रैवाव्याप्तिर्भविष्यति। तथाहि
वह्निः समवायसम्बन्धेन तदधिकरणं स्ववह्नेरवय-
तत्प्रतियोगिताको भेदः समवायेन वह्निमान्नेत्याकारकः-
धिकरणं पर्वतः तन्निरूपितवृत्तित्वमेव धूमे समागत
ति रित्येति न वाच्यम् ~~[illegible] सम्बन्धेन~~
साध्यतावच्छेदकसम्बन्धेन साध्याधिकरणस्य विवक्षि-
त्वात्। तथा च साध्यतावच्छेदकसम्बन्धावच्छिन्नाधेयता

श्री॰१ 15

॥ श्रीगणापतयेनमः ॥

॥ ब्रह्मसूत्रवृत्तिस्तात्पर्यविवरणाख्या॥

॥ अथातोब्रह्मजिज्ञासा ॥१॥

यस्मायया जगत्सर्वं जायते येनजीवति ॥
यद्विज्ञानात् प्रलीयेत तस्मै साम्बाय मेनमः ॥१॥
तेजसा कर्मणा बुद्ध्या राजर्षिरिव यः प्रभुः ॥
तत्प्रेरितो ब्रह्मसूत्र तात्पर्य विवरणोम्यहम ॥२॥

तत्र परम कारुणिकोमुनिरधिकार्यभिधेय सम्बन्ध प्रयोजन परिज्ञानाय ब्रह्म मीमांसा शास्त्रस्यादिमं सूत्रम्भगवान् ...द व्यास आह अथेति अथ नित्यानित्य वस्तु विवेकः इहामुत्र फल भोग विरागः शमदमादिसाधन सम्पत् मुमुक्षुत्वञ्चेति साधन चतुष्टय सम्पत्त्यनन्तरम् अतः अग्नि... ...त्रादि कर्मणामनित्य फलत्वात् ब्रह्मविदाप्नोति परम् ...ं ब्रह्मवेद ब्रह्मैव भवति इत्यादिश्रुतेः ब्रह्मज्ञानस्यैव प... ...म पुरुषार्थसाधनत्वात् ब्रह्म जिज्ञासा ब्रह्मणो विचारः ...र्त्तव्य इत्याहारः ब्रह्मचवक्ष्यमाणलक्षणं तेनात्र ...ह्म विचारे मुमुक्षुविरक्तश्चाधिकारी ब्रह्माभिधेयम ...तिपाद्यप्रतिपादक भावः सम्बन्धः मोक्षः फलम् इति सिद्धम॥

॥ जन्माद्यस्य यतः ॥२॥

विचारस्य लक्षणादि साध्यत्वाद्ब्रह्मणस्तस्य लक्षणमा

ह जन्मादीति अस्य प्रत्यक्षादि प्रमाणसिद्धस्य नाम

रूपाभ्यां व्याकृत प्रपञ्चस्य यतः, यस्माज्जन्मादि जन्म

स्थितिभङ्गं भवति तत्

ब्रह्म तथा च जगज्जन्मादि कारणत्वं लक्षणम् यतो वा

इमानि भूतानि जायन्त इत्यादि श्रुतेः ॥२॥

॥ शास्त्रयोनित्वात् ॥३॥

जगत्कारणत्व प्रदर्शनेन ब्रह्मणो चिन्त्य शक्ति

सर्वज्ञत्वं च सिद्धं तदेव द्रढयति शास्त्रेति शा

क विद्यास्थानोपवृंहितस्य प्रदीपवत्सर्वा

महत ऋग्वेदादेः शास्त्रस्य निश्वासवदनायासे

नित्वात् निष्पादकत्वाद्ब्रह्मणः सर्वज्ञत्वं स

त्वं च सिद्धम् वाक्य प्रयोगे वाक्यार्थ ज्ञानस्य

तथा च श्रुतिः अस्य महतो भूतस्य निश्वसित ... ऋ

ग्वेद इत्यादि नन्वस्यार्थस्य जन्मादि सूत्रेण गतार्थत्वा

त्कथं सूत्रमर्थान्तरं शास्त्रं योनिर्ज्ञापकं यस्य तस्य

च पूर्वोक्त जगत्कारणत्व सिद्धयनो वेत्यादिशास्त्रादे-
व एवञ्च पूर्वसूत्रार्थसिद्धये इदं सूत्रमिति भावः ॥३॥

॥ तत्तु समन्वयात् ॥४॥

ननु सर्वस्य वेदस्य सप्रयोजनकानुष्ठेय क्रियापरत्वात्
ब्रह्मपरत्वे ऽक्रियार्थत्वात् अप्रामाण्यापत्तिरतः कथ-
ञ्चित्कर्तृदेवतादिगुणपरत्वम् उपास्ति क्रियान्तर
परत्वमेववाच्यम् परिनिष्ठितवस्तुनः प्रत्यक्षा
दिप्रमाणान्तर ग्राह्यत्वात् गृहीतग्राहकत्वेन वेदान्ता
[illegible]ामप्रामाण्यापत्तेः हेयोपादेयरहिते पुरुषार्थत्वाभा
[illegible]श्च अत एव मन्त्रार्थवादादीनां क्रियासाधन पर-
[illegible]त्वं [illegible] ब्रह्मपरत्वमिति प्राप्ते उच्यते तत्तु समन्व
[illegible]ादिति तत् ब्रह्म शास्त्रप्रमाणकमिति शेषः सम-
[illegible]तं ब्रह्मव सर्वेषु वेदान्तेषु वाक्यानि तात्पर्येण ब्रह्म
[illegible]प्रतिपादकत्वेन समनुगतानि सदेव सौम्येदम
[illegible]ग्र आसीदेकमेवाद्वितीयं ब्रह्म आत्मावा इदमे-
क एवाग्र आसीत् इत्यादीनि खलु तेषूपक्रमो
पसंहारादिलिङ्गैः ब्रह्मपरत्वे निर्णीते अर्थान्त-

— प्राशस्त्यपरत्वञ्च, न समन्वयार्थमुक्तं तस्मात् कर्मापेक्षित
कर्त्रादिपरत्वेन क्रियाविधिशेषत्वं [illegible] इत्यादिशेषस्सन्नाय: ६

रकल्पनानयुक्ता भूतहान्यादिदोषप्रसङ्गात् तत्केन किं स्पृश्येदित्यादिना क्रियाकारकफलपरत्वनिराकरणाच्च नचप्रत्यक्षादिविषयत्वं तत्त्वमसीत्यादिब्रह्मात्मभावस्य शास्त्रैकगम्यत्वात् नचापुरुषार्थत्वमपि हेयोपादेयशून्यब्रह्मात्मतावगमस्य सर्वक्लेशनाशकत्वेन परमपुरुषार्थसिद्धेः नाप्युपासनाशेषत्वं एकत्वविज्ञानोन्मथितस्य द्वैतज्ञानस्य पुनरसम्भवात् आत्मविज्ञानस्य फलपर्यन्तत्वात् विधिस्पर्शं विनापि तद्विषयस्य शास्त्रस्य प्रामाण्यं न प्रत्याख्यातुं शक्यं नचानुमानगम्यम् शास्त्रप्रामाण्यम् येनान्यत्र निदर्शनमपेक्षेत तस्मात्सिद्धम्ब्रह्मणः शास्त्रयोनित्वं तु शब्दो व्यावृत्त्यर्थः न क्रियादिपरत्वं वेदान्तानाम् ॥४॥

॥ईक्षतेर्नाशब्दम् ॥५॥

ननु प्राक् जगदुत्पत्तेः सर्वकारणरहितम् ब्रह्म ...
तदा कथं सहकारिकारणरहितात्केवलाज्जगदु...
त्पत्तिसिद्धस्यानेकात्मकप्रधानस्य परिणामसम्भव...
दिवत्कारणत्वोपपत्तेः नजगत्कारणत्वम्ब्रह्मण...
सेसमाधत्ते ईक्षतेर्नाशब्दमिति "नाप्रधानञ्ज...
मितिशेषः यत्तत्तदशब्दम् चेतनस्यैवात्मनः स्व...
बृग्रहणात् सृष्टिप्रतिपादकश्रुतिशब्दाग्रहीतमित्यर्थः
कुतस्तेषु नगृहीतमिति चेत् ईक्षतेः सदेव सोम्येदम्

-त्यासो इत्यादिना तदैक्षतत्व द्दस्याम्प्रजायेयेति सईक्षत लो
-कान्नु सृजा इति सईक्षाञ्चक्रे स तपोऽतप्यत यस्य ज्ञानमय
-न्तपः इत्यादौ ज्ञानपूर्वकसृष्टेः प्रतिपादनात् नहि गुणसा-
-म्यावस्थायां सत्वोद्रेकधर्मो ज्ञानं सम्भवति किन्तु नासा-
-क्षिका सत्ववृत्तिर्ज्ञानाभिधीयते न चाचेतन प्रधानं
साक्षी भवति तस्मान्न प्रधानस्य सर्वज्ञत्वं योगिनान्तु स-
-त्वोत्कर्षनिमित्तं स्वाधुनिकं सर्वज्ञत्वमित्यनुदाहरणत्व
म ॥ ५ ॥

॥ गौणश्चेन्नात्मशब्दात ॥ ६ ॥

ननु अचेतनेपि कूलम्पिपतिषतीतिवत् तत्तेज ऐक्षत
ता आप ऐक्षन्त इत्यादिवत् च अचेतनेपि प्रधाने चे
इत्युपचारात्प्रधानेपि औपचारिकम ईक्षितृत्वङ्-
[illegible] औपचारिक प्रायेपाठान्नात्मसिद्धिरत आह ॥
[illegible]दिति ॥ अप्तेजसोरिव प्रधाने औपचारिक
[illegible]र्वं न कुतः तासु श्रुतिषु आत्मनः प्रतिपादकाना
[illegible] आत्मशब्दादीनां सत्वात् सदेव सोम्येत्यन
[illegible]प्य तत्तेजोऽसृजत इत्यादिना तेजोऽबन्नानां
[illegible]ईक्षा पुनः तेजोऽबन्ना[illegible] देवताशब्देन उद्दिश्य
[illegible]नेति जीवशब्देन तस्य चेतनस्यात्मनः अनुप्रवेश
[illegible]स्योक्तत्वात् नाचेतनङ्ग्रहीतुं शक्यन्त चाहि से यदे

वत्तैक्षत हन्ताहमिमास्तिस्रोदेवताः अनेन जीवेनात्मनानु-
प्रविश्य नामरूपे व्याकरवाणि सतो[1] जीवः आत्मा भ-
वति न यथा श्वेतकेतुश्चेतन म्प्रति तत्त्वमसीति आत्मा-
भेदप्रतिपादनमपि न सम्भवति अचेतन प्रधान तादा-
त्म्यस्य चेतनेऽसम्भवात् तस्मान्न गौणमीक्षितृत्वमात्म-
योपपत्तिः ॥६॥

॥तन्निष्ठस्य मोक्षोपदेशात्॥७॥

ननु राज्ञः सर्वार्थकारिणि भृत्ये भवत्येवात्मशब्दः म-
मात्मायं भद्रसेन इत्यादौ तथा प्रधानमपि पुरुषस्या-
त्मनः भोगापवर्गौ कुर्वत् उपकरोति राज्ञः भृत्य इव
सन्धिविग्रहादिषु वर्त्तमानः तथा ज्योतिष्टोमादौ अ-
ग्न्यादौ च ज्योतिः शब्दः प्रयुज्यते तथात्मशब्दोऽपि चे-
नाचेतनयोः भूतात्मा इन्द्रियात्मेति प्रयोगा-
वाऽचेतनेऽपि आत्मशब्द इति कथमात्म-
क्षतेः अगौणत्वमिति प्राप्ते आह ॥तन्निष्ठ-
न आत्मशब्देन प्रधानं चेतनस्य श्वेतके-
तव्यस्य ब्रह्मनिष्ठता उक्ता आचार्यवान्-
तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ स-
त्स्ये इति ब्रह्मनिष्ठस्य मोक्षोपदेशात् यदि प्रधा-
सत् शब्दवाच्यं स्यात् तदा मुमुक्षुं चेतनं सन्तम-
चेतनोऽसीति विपरीतवादि तत्त्वमसीति वा-

१ य एषोऽणिमैतदात्म्यमिदं सर्वं स आत्मा तत्त्वमसि श्वेतकेतो इत्यादौ
तत्तस्यैवात्मनो ग्रहणात् न ह्यचेतनस्य प्रधानस्य चेतनो । भु० २

॥स्वाप्ययात् ॥९॥

न प्रधानं सदित्यत्र युक्त्यन्तरमाह स्वेति कारणमकृत्य श्रूयते यत्रैतत्पुरुषस्स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनस्स्वपितीत्याचक्षते स्वं ह्यपीतो भवतीति अयञ्जीवः सुषुप्तौ स्वपरमात्मानमपगतो भवति लीनो भवति उपाधीनामासनानामागतस्वप्ननिमित्तानां लये विशेषाभावात् स्वाप्ययात् न हि प्रधानं स्वात्मा भवति अतो यस्मिन् सर्वेषां सुषुप्तौ यस्मिन्नात्मलयः सस्वशब्दवाच्यः ॥९॥

॥गतिसामान्यात् ॥१०॥

युक्त्यन्तरमाह ॥गतीति॥ यदि तार्किकादिवत् कचिच्चेतनकारणं क्वचिदचेतनम्प्रधानं स्वभावादिकं तदा भवेत् ... प्रवेश न चेवं सम्भवति सर्वेषु वेदान्तेषु चेतनस्यैव का... तेः यथाग्नेर्ज्वलतः सर्वा दिशो विस्फुलिङ्गा विप्र... एवमेवैतस्मादात्मनः सर्वे प्राणा यथायतनं वि... प्राणेभ्यो देवा देवेभ्यो लोका इति आत्मनः आका... तः आत्मन एवेदं सर्वं इत्यादिषु चेतनात्मन एव... अवगतिसामान्यात् अनगतिसामान्येन प्रधान...

॥श्रुतत्वाच्च ॥११॥

कुतश्च सर्वज्ञं ब्रह्म कारणमतआह ॥श्रुतत्वादिति श्वेताश्वतरोपनिषदि सर्वज्ञं ब्रह्म प्रकृत्य श्रूयते स कारणं करणाधिपो...

-चास्य कश्चिज्जनिता न चाधिपः इत्यादौ स्पष्टं सर्वज्ञत्वं श्रुतन्त-
स्मात्सर्वज्ञं ब्रह्म जगत्कारणमिति सिद्धम् ॥११॥

॥ आनन्दमयोऽभ्यासात् ॥१२॥

वेदान्तेषु द्विरूपं ब्रह्मावगम्यते नामरूपादिभेदोपाधिविशि-
ष्टं सर्वोपाधिवर्जितञ्च यथा यत्र हि द्वैतमिव भवति यत्र त्वस्य
सर्वमात्मैवाभूदिति उपक्रम्य यो वै भूमा तदमृतम् अथ यदल्पं
तन्मर्त्यं सर्वाणि रूपाणि विचित्य धीरो नामानि कृत्वेति निष्कलं
निष्क्रियं शान्तं नेति नेति अस्थूलमनण्वन्यूनमित्यादिना न-
ना विधानस्यास्यामुपास्योपासकभावव्यवहारः काचिदुपास-
ना अभ्युदयार्था काचित्क्रममुक्त्यर्था काचित्कर्मसमृ-
द्ध्यर्था तासां गुणोपाधिभेदेन भेदः यद्यपि एक एवात्मा त-
थापि तं यथा यथोपासते तदेव भवतीति श्रुतेः यं यं वापि
स्मरन्भावं त्यजत्यन्ते कलेवरम् इत्यादि स्मृतेश्च यथो-
पासनं फलान्यपि भिद्यन्ते एवञ्च वाक्यगतिपर्यो- सोपाधिकं ब्रह्म उपास्यत्वेन च
चनया अद्वितीयं निरुपाधिं ब्रह्म निर्णीयते वेदान्तेषु
[...]न ब्रह्म निर्दिश्यते इति प्रदर्शयितुं परसूत्रगणा
[...]ो । आनन्देति । अन्नमय प्राणमय मनोमय विज्ञा-
[...]न उक्रान्ते शिरो यभ्युयते तस्माद्वा एतस्माद्विज्ञा-
[...]ः अन्योऽन्तरात्मानन्दमय इति विषयवाक्ये संश-
[...] आनन्दमयशब्देन ब्रह्म भिन्नं उत परं ब्रह्मेति तत्र
पूर्वपक्षः अन्नमयादिप्रवाहपठितत्वात् तस्य प्रिय-

मेव शिर इत्यादिनाऽवयवयोगात् तस्यैव स्वशरीर आत्मा इति शरीरत्वश्रवणाच्च संसारीजीव एव ग्राह्य इति प्राप्ते आनन्द मयः पर एवात्मा कुतः अभ्यासात् बहुवाक्येषु परस्यैव ग्रहणात् रसो वै सः रसं ह्येवाऽयं लब्ध्वानन्दी भवति सैषानन्दस्य मीमांसा भवति आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चनेति विज्ञानमानन्दं ब्रह्म इत्यादौ ब्रह्मैवोपास्यं गम्यते यद्यप्यमुख्य प्रवाहे पाठस्तथापि स्थूलारुन्धतीन्यायेन मूषानिषिक्तद्रुतताम्रादि प्रतिमावत् ततोन्तरान्तरतया पूर्वं पूर्वं शास्मानमात्मेति ग्राहयन् प्रतिपत्तिसौकर्याय आत्मानमुपदिदेश यत्तु प्रियशिरस्त्वादि यच्च शारीरत्वं तदन्नमयादि शरीरपरम्परया प्रदर्श्यमानत्वान्न मुख्य[शा]रीरत्वं संसारिवत् तस्मादानन्दमयः पर एवात्मेति सि[द्धम्]

यौन्तरम्मा ॥ छेद्य ॥१२॥

॥ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥१३॥

पुनर्विकारार्थकमयट्प्रत्ययेन विकारी जीव एवे[ति] आ[श]ङ्क्य समाधत्ते विकारेति । नात्र जीवः आनन्दमयो यतः [प्र]ाचुर्यार्थे मयट् [इति] आमयामिति[?] इत्यादिष्वप्राचुर्यमयट् दर्शनादत्रापि आनन्द[प्र]चुरं ब्रह्मेति मनुष्याणां दारभ्य उत्तरोत्तरस्मिन् शतगुणा आ[न]न्दस्यो[त्क]र्षेण ब्रह्मानन्दस्य निरतिशयस्य प्रदर्शनान्न विकारार्थे मयट् ॥१३॥

॥ तद्धेतुव्यपदेशाच्च ॥१४॥

प्राचुर्यार्थे युक्त्यन्तरमाह । तद्धेत्विति । यस्मादानन्दहेतुत्व

ब्रह्मरणो वेदान्तेषूच्यते एषह्येवानन्दयाति लोकेपि यः स्वय
धनिकः स एवान्यान्धनिकङ्करोति एवं स्वयमानन्द प्रचुरश्चेद
न्यानपि आनन्दयति तस्मादानन्दप्रचुरम्ब्रह्म ॥१४॥

॥ मान्त्रवर्णिकमेव च गीयते ॥१५॥

ब्रह्मविदाप्नोति परमित्युपक्रम्य सत्यं ज्ञानमनन्तं ब्रह्मेतिमन्त्रे
सत्यादि विशेषणैर्निर्धारितन्तदेव अन्योन्तर आत्मेत्यत्र सर्वा
न्तरत्वेन ब्रह्मविज्ञानायग्राह्यं यतः। युक्तमन्तरमाह। मन्त्रब्राह्मणा
रेकार्थत्वं युक्त तन्निष्ठैव भार्गवीवारुणी विद्या तस्मान्मान्त्रव
र्णिकमेव आपि गीयते ॥१५॥

॥ नेतरोऽनुपपत्तेः ॥१६॥

तथपन्तरमाह। नेतर इति। इतरो जीवो न ग्राह्यः आनन्दमयस्य
तस्य सोकामयत बहुस्यां प्रजायेयेति स तपोतप्यत स तपस्त
प्त्वा इदं सर्वमसृजत यदिदं किं चेति तत्र जीवस्य ग्रहणे प्राक्शरी
रोत्पत्तेः स्रज्यमानाभिध्यानं स्रज्यमानस्य सृष्ट्यव्यतिरेकः स
र्वविकारसृष्टिश्च नोपपद्यते अतो नेतरो ग्राह्यः ॥१६॥

॥ भेदव्यपदेशाच्च ॥१७॥

इतश्च यथाधिकारे रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति
लब्धृलब्धव्ययोर्भेदेन व्यपदेशः अतोपि न संसारी न हि लब्धैव लब्धव्यो
भवतीत्याह भेदेति ॥१७॥

॥कामाच्च नानुमानापेक्षा ॥१८॥

प्रधानमेवानन्दमयशब्दग्राह्यमस्त्वित्याक्षेप ईक्षत्यधिकरणोक्त-
तत्त्वनिराकरणेन निराकृतमपि प्रसङ्गात् युक्त्यन्तरेण निराकुरुते
। कामाच्चेति। सोऽकामयतेति कामयितृत्वनिर्देशाच्च आनुमानप्र-
धानस्य नापेक्षा ॥१८॥

॥अस्मिन्नस्य च तद्योगं शास्ति ॥१९॥

युक्त्यन्तरमाह। अस्मिन्निति अस्मिन् प्रकृते आनन्दमये ब्रह्मणि
अस्य जीवस्य तद्योगं तद्भावापत्तिं मुक्तिं शास्ति प्रतिपादयति च यदा
ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां
विन्दतेऽथ सोऽभयं गतो भवति यदा ह्येवैष एतस्मिन्नुदरमन्त-
रं कुरुतेऽथ तस्य भयं भवति इति यदा ब्रह्मणोऽरमल्पमप्यन्त-
दात्म्यं पश्यति ततः संसारभयान्निवर्तते यदानन्दमये प्रतिष्ठां नि...
रन्तरं तादात्म्यं विन्दते प्राप्नोति तदा संसारभयान्निवर्तत एत...
प्रधानपरत्वे जीवपरत्वे वा न घटत इत्यर्थः ॥१९॥ ननु...
रूपोऽन्तरसमय इत्यादि अन्योऽन्तर आत्मा विज्ञानमय इत्यन्त...
मयटः प्रक्रमात् आनन्दमय इत्यत्र कथमाकृष्यैमयट् । आ...
यत्वमापाद्यते आश्रीयते अर्धजरतीयपरिग्रहापत्तेः ब्रह्मणमये
ज्ञानमनन्तं ब्रह्मेति ब्रह्मशब्देनोपक्रान्तमेव ब्रह्म पुच्छं पुच्छत्व-
त्वेनोपसंहृतं नानन्दशब्देनोपसंहर्तुं शक्यं प्रियशिरस्त्वादि...
श्रुतत्वादानन्दमयो जीव एव ब्रह्म पुच्छं प्रतिष्ठेत्येव परं तदेव
च विषयः तद्विज्ञानायैव पञ्चकोशोक्तिः पुच्छोक्तिस्तु पुच्छं
त्पुच्छं सर्वाधारत्वद्योतनाय सर्वानन्दानां ब्रह्मानन्दाश्रितत्वा...

…रु इति चेदेवमपि व्याख्यानमिदमेवभाष्यकृदादीनाम् अस्मिन्
…शास्त्रे यपर्यायेपि विकारार्थ एव मयट् आनन्दमयावयवत्वेन
ब्रह्म विवक्षितं उतस्वप्रधानत्वेनेति संशये आनन्दमय आत्मे
…त्यत्र ब्रह्मपुच्छं प्रतिष्ठेति स्वप्रधानमेव ब्रह्मोपदिश्यते न पुच्छश
ब्दात् अवयवत्वेन असन्नेव स भवति इत्यस्मिन्निगमनश्लोके ब्रह्म-
…ण एवाभ्यासात् इति सूत्रव्याख्येयम् एतत्तात्पर्यमेवोत्तरसमस्त
…आदिशब्दोग्र्यं शास्तिइत्यन्तानि पुच्छवाक्यानि दिव्येतदु उपपा
…दकत्वेन व्याख्येयानि ॥१९॥

॥ अन्तस्तद्धर्मोपदेशात् ॥२०॥

॥ अन्तस्तद्धर्मेति। अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्य
…ते हिरण्यश्मश्रु हिरण्यकेश आप्रणखात्सर्व एव सुवर्णस्तस्य यथा
कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्य पा
…भ्यः उदित उदेति ह वै सर्वेभ्य पाप्मभ्य य एवं वेद इत्यधिदैवतमथा
…ध्यात्मं, अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते इत्यादौ आदित्य
… इदं …न्तः चक्षुरन्तश्च पुरुषः श्रूयते स किं कर्म विद्याऽतिशया-
… कर्षः कश्चित्संसारी मण्डले चक्षुषि चोपास्य
… …ते उत नित्यसिद्ध ईश्वर इति विशये हिरण्यश्मश्रु
… … विशेषणोदाहृतत्वात् तद्दिवाक्षिपुरुषेऽतिदिश्यते
… … स्वरूपं यद्मुष्य रूपमितिं सावयवं नेश्वरः अशब्द
…नः … …मरूपमव्ययमिति तस्य निर्गुणत्वश्रुतेः आदित्याक्षिणो
…आधार श्रवणाच्च तस्मान्नेश्वर इति प्राप्ते आह। अन्तरिति।
आदित्ये चक्षुषि च अन्तः उपास्यत्वेन श्रुतः ईश्वर एव कुतः
तस्य धर्माः उपदिष्टाः अतः यथा एष सर्वेभ्यः पाप्मभ्यः उदि

तइतिसर्वपापाप्मगम्य परमात्मन एवोक्तः य आत्माअपहत
प्मेति तथा चाम्नुबेभुतं तदेव र्के तत्साम तदुक्थं तद्यजुः तद्ब्रह्मेति
ब्रह्मेति ऋगाद्यात्मकत्व न्तत्परमेश्वरे उपपद्यते सर्वकारण
त्वात् सर्वात्मत्वोपपत्तेः लोककामेशित्वमपि निरङ्कुशं भूयमा
मीश्वरङ्गमयति यत्तु हिरण्यश्मश्रुत्वादि गुणाश्रवणं तत्साधक
नुग्रहाय ऐश्विकं मायिकं माया ह्येषं मया सृष्टा यन्मां पश्य
नारदेतिस्मृतिः एवङ्गुणाविशिष्टत्वेनोपासनार्थं वास्तवं
वमस्य शरीरमित्यादि तस्मात्परमेश्वर एवोपदिश्यतेऽत्र ॥२०॥

॥भेदव्यपदेशाच्चान्यः॥२१॥

पुनरन्तरमाह। भेदेति शरीराभिमानिभ्यो जीवादिभ्योभिन्नः
गत्तयो मोव्यपदिश्यते य आदित्ये तिष्ठन्नादित्यादन्तरो
दित्यो न वेद यस्यादित्यः शरीरं इत्यादिषु आदित्या
त्मनोज्योऽन्तर्यामी ईश्वरः स्पष्टं निर्दिष्टः स एवेह
त्ये भवितुमर्हति तस्मादीश्वर एव ॥२१॥

॥आकाशस्तल्लिङ्गात् ॥२२॥

अस्य लोकस्य कागतिरित्याकाश इति होवाच सर्वाणि ह वा इ
मानि भूतान्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं
त्यादि श्रुतं तत्र किमाकाशशब्देन भूताकाशो ब्रह्म वेति
ये भूताकाशः तस्य लोकवेदयोः प्रसिद्धत्वात् शोभ
मारोहन्ति क्वचित ब्रह्मणोऽसगौणा एव अनेकार्थत्वस्य

त्वात् स च मुख्ये सम्भवति गौरणग्रहरणमिति प्राप्ते
ते आकाश इति ईश्वर एवात्र आकाशस्तल्लिङ्गात्
र्वाणि ह वा इमानि भूतान्याकाशादेवेति सर्वकारणत्वे
ग्रहणात् तत्रेश्वर एव स्वमाकाशं प्रत्यस्तं यतो
आकाशोह्येवैभ्यो ज्यायानाकाशः परायणमित्यादि
त् लिङ्गादाकाशोऽत्र गौण्या वृत्त्येव अत एव कं खो ब्र
पर मे व्योम्नौ सेषा भार्गवी वारुणी विद्या परमे व्योम
प्रतिष्ठितेति श्रुतयोपि तस्मादाकाशमत्र ब्रह्म॥२२॥

॥ अत एव प्राणः ॥२३॥

न दधिकरणन्यायं अन्यत्राप्याह अत एवेति सर्वका
लिङ्गादेव प्राणोपि ब्रह्मैव ग्रह्यं उद्गीथविद्यायाम्
यी देवता प्रस्ताव मन्वायत्ते त्युपक्रम्य कतमासा
प्राण होवाच सर्वाणि ह वा इमानि भूतानि
भिसंविशन्ति प्राणमभ्युज्जिहते सैषा दे
स्ताव मन्वायत्ते ति तत्रापि सर्वाणि ह वेत्या
भूतोत्पादकत्वादि श्रवणात् न प्राणशब्दे
वायुविकारः पञ्चवृत्तिः प्राणः किन्त्वीश्वरः
स्य प्राण उत चक्षुषश्चक्षुरित्यादावीश्वरेपि
शब्दप्रयोगात् ॥२३॥

॥ज्योतिश्चरणाभिधानात्॥२४॥

एवं श्रूयते अथ यदतः परोदिवो ज्योतिर्दीप्यते वि-
श्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विदं वाव तद्यदिदमस्मिन्नन्त-
न्तः पुरुषे ज्योतिरिति तत्र किं ज्योतिः शब्दार्थः प्रति-
ष्ठः सूर्यादि ज्योतिरिति प्राप्ते आह ज्योतिरिति ना-
सूर्यादि ज्योतिः किन्त्वीश्वरः चरणाभिधानात् पू-
वाक्ये चतुष्पाद्ब्रह्म निर्दिष्टं एतावानस्य महिमा ततो
ज्यायांश्च पूरुषः पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतं
दिवि इति चतुष्पद्ब्रह्मणः त्रिपादमृतं द्युसम्बन्धि
रूपमुक्तं तदेवेह द्युसम्बन्धान्निर्दिष्टं इति मन्यते
ज्ञायते तत्परित्यज्य प्राकृतं ज्योतिर्गृह्णतो प्रकृतहा-
दोषप्रसङ्गात् एव मत्र शाण्डिल्य विद्यायामपि
वृत्तिर्बोध्या तस्मात्प्रकरणात् ब्रह्मावगमे
ज्योतिरत्र विवक्षितम्॥२४॥

॥छन्दोभिधानान्नेति चेन्न तथा चेतोऽर्पणानिगदात्तथा
हि दर्शनम्॥२५॥

ननु पूर्वत्र न ब्रह्माभिहितं किन्तु गायत्री वा इदं सर्वं
भूतं यदिदं किं चेति छन्दसः उक्तत्वात्कथमेतदि-
समाधत्ते छन्दोभिधानादिति नैष दोषः तथा गायत्र्याख्य
छन्दोद्वारेण ब्रह्मणि चेतसोऽर्पणात् समाधानस्य

...येन उक्तत्वात् नहि अक्षर सन्निवेशरूप छन्दसः
...दं सर्वमित्युक्तं सर्वात्मकत्वं सम्भवति तस्माद्गायत्र्या
...विकारानुगतं ब्रह्मैव सर्वमित्युच्यते सर्वं खल्विदं
...ब्रह्मेति वत् कार्याद्भिन्नत्वात्कारणस्य अन्यत्रा
...दशी यति श्रुतिः तथा विकार द्वारेण ब्रह्मोपासनं
...ा एतम्मेवै ब्रह्वृचा महत्युक्थे मीमांसन्ते एतं मग्ना व
...र्यैव इत्यादौ तस्माच्छन्दोभिधानेपि पूर्वं ब्रह्म
...र्दिष्टं तदेव ज्योतिर्वाक्येपि परामृश्यते ॥२५॥
...भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥२६॥
...अन्तरमाह। भूतादीति एतावानस्येत्यादि भू
...से बा वनु च्छ दा षड्विधा गायत्री त्यादौ च भू
...पिवी शरीर हृदयानां पाद त्व व्यपदेशोप
...तौ एव पूर्वमुक्तं ब्रह्मैवात्र ग्राह्यम छ
...न्थिव्यादि पादत्वानुपपत्तेः विष्ट भ्याह
कृत्स्नमेकांशेन स्थितो जगदिति स्मृतेश्च ।२६।
...पदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥२७॥
...त्रिपादस्यामृतं दिवीत्यत्र सप्तम्या दिवः
...धारत्वमुक्तं मतः परो दिवो ज्योतिरित्यत्र पञ्च

स्या दिवः मर्यादात्वमुक्तं तस्मादुपदेशस्य यथास्थ
स्य भेदान्न ब्रह्मणः प्रत्यभिज्ञानं विरोधात् इत्याश
ङ्क्याह उपदेशेति। एवमपि अविरोधः यथा वृक्षा
ग्रे विद्यमाने तदूर्ध्वं वा वर्तमाने श्येनादौ वृक्षाग्रे
श्येनः वृक्षाग्रात्परतः श्येन इति द्विधापि प्रयोगः एव
न्दिविति दिवः परमपि सत् ब्रह्म निर्दिश्यते
तस्मात् उभयस्मिन्नपि प्रयोगे अविरोधात्
ब्रह्मैव ज्योतिः ॥२७॥

॥प्राणस्तथानुगमात्॥२८॥

कौषीतकिब्राह्मण उपनिषदि इन्द्रप्रतर्दनाख्या
यते प्रतर्दनो ह वै दैवोदासिरिन्द्र
स्य धामोपजगाम युद्धेन च पौरुषेण च
पकम्प स होवाच प्राणोऽस्मि प्रज्ञात्मा तं
प्रत्यस्त संपास्वेति तथा प्राण एव प्र
त्मेदं शरीरं परिगृह्योत्थापयति अन्ते
स एष प्राण एव प्रज्ञात्मा आनन्दोऽजरोऽमृत इति

...त्र संशयः किमत्र प्राण शब्देन वायु मात्र...
...नात्मा जीवो ब्रह्म वा ग्राह्यं अत एव प्राणइ
...वनेन गतार्थ त्वा त्किमर्थं पुनर्विचार इति
...न ब्रह्म लिङ्गस्य उभयत्र सत्वेपि देवतावायु
...जीवादि लिङ्गानामपि सत्वा दधिकाशंकायाम्
...माधन्ते नार्थं पुनर्विचारः तत्र इन्द्र जीव वायु
...लिङ्गानां सुपष्टं प्रतीते र्नब्रह्म प्राणः इति प्रा
...प्राह प्राणस्तथेति प्राणस्तथा ब्रह्मैव कुतः
...गमात् जीवो पर्येण सर्व वेदान्तानां स
...ब्रह्म प्रतिपादन परत्वोपलम्पतेव
इन्द्रंराणः प्रतर्दनः
...वरीत्यत्वेति (प्रतर्दनेनेत्यादि इन्द्रः) परम पुरु
...र्थ साधनं पृष्टवान् तस्मै हिततमत्वेनो
...दिश्यमानः प्राणः आत्मैव नह्यन्य ज्ञानम
...निवारयितव्यति तमेव विदित्वेति श्रुतेः
...यो मां वेद न ह वै तस्य केन च कर्मणा लो
...मीयते न स्तेयेन भ्रूणहत्यये ति ब्रह्मज्ञाने
...नैव सर्वकर्मक्षयः तस्मात्प्राणोब्रह्मैव ॥२८॥

णा शरीर इत्यादिनोक्तो मनआदिभिः सम्बन्धो जीवस्यैव
भवति न ब्रह्मणः अप्राणोह्यमना शुभ्र इति श्रुति विरोधा
तस्माज्जीव एवेति प्राप्ते ब्रूते। सर्वत्रेति। मनोमयत्वा
भिः ब्रह्मैवोपास्यं कुतः सर्वत्र वेदान्तेषु ब्रह्मजगत्का
ब्रह्म शब्दात्प्रसिद्धन्तस्यैवात्र उपदेशात् न च शान्त
सीतेति शम विधि विवक्षया ब्रह्मोक्तं न स्व विवक्षयेति
मनोमयत्वाद्युपदेशेषु स्वशब्देन ब्रह्म सन्निहितं
स्तु न स्वशब्देन सन्निहितः इति वैषम्यात् तस्माद्ब्रह्मै
एतादृशवाक्येषूपास्यम् ॥३३॥

॥विवक्षितगुणोपपत्तेश्च॥३४॥

युक्त्यन्तरमाह विवक्षितेति च पुनः विवक्षितानामुपादे
उपदिष्टानां सत्यकामत्व सत्यसङ्कल्पत्व अपहतपाप
नां गुणानां ब्रह्मण्येवोपपत्तेः अप्रतिबद्ध शक्तित्वा
नोमयत्वादि जीवलिङ्गन्तदपि सर्वात्मकत्वात् ब्र
पद्यत एव तस्माद्ब्रह्मैव विवक्षितम् ॥३४॥

॥अनुपपत्तेस्तु न शारीरः॥३५॥

ब्रह्मण्युपपत्तिमुक्त्वा जीवपरत्वेऽनुपपत्तिमाह। अनुप
त्ति। तु शब्दोवधारणार्थः ब्रह्मैव न शारीरः सत्यकामत्वा
श्चाऽन्यस्येन जीवेऽनुपपत्तेः न च ब्रह्मापि शारीरम्भव
तिवाच्यं तस्य सर्वाधिष्ठानत्वेन शरीराशरीर संधार
जीवस्य तु भोगाधिष्ठान शरीरादन्यत्र कृत्याभावात् शारी

कर्मकर्तृव्यपदेशाच्च ॥३६॥

नग्रहणेयुक्तमनन्तरमाह । कर्मेति । यस्मादितः प्रेत्य एतमभिसंभ
वितास्मीति कर्मकर्तृव्यपदेशस्तस्मान्न चैकस्य प्राप्तिकर्मत्व-
त्वञ्च सम्भवति एतमिति उपास्यं गम्यं शारीरो गन्ता इति
स्योपासकभावस्य भेदाधिष्ठानत्वाच्च न शारीरः ॥३६॥

शब्दविशेषात् ॥३७॥

नन्तर आत्मनीति सप्तम्यन्तात् हिरण्मयः पुरुष इति प्रथमा
शब्दस्य विशेषात् अपि शारीरादन्य उपास्य इत्याह शब्देति ॥
॥३७॥

स्मृतेश्च ॥३८॥

पष्टम्भकमप्याह । स्मृतेश्चेति । ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन
ष्ठति भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया अत्र भूत
न ईश्वरशब्देन च जीवईश्वरयोर्भेदेनोक्तत्वादित्यर्थः । उन
ौकस्त्वात् तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमव
॥

नोकस्त्वात् अल्पव्यपदेशाच्च जीव एवेत्याशङ्क्य समाधत्ते
केति एष त आत्मान्तर्हृदय इति अल्पस्थानं अणीयान्व्रीहे
इति अल्पत्वव्यपदेशात् इयति चेन्न यतः परिच्छिन्नदे
सर्वगतत्व व्यपदेशो न सम्भवति सर्वगस्य तु परिच्छिन्न
व्यपदेशः कथञ्चित्सम्भवति एव यथा सर्वदेशाधिपस्याप्य
ोध्याधिपतित्वम्व्यपदिश्यते तद्वत् किमर्थं तथा व्यपदेश
इति चेद्दर्शनीयत्वादिना निचाय्यत्वात् हृदयपुण्डरीके उपा

श्रा ल
स्यत्वात् एवं व्योमवत् । यथा नाम्नाः सर्व ग्रामे हरिः एवं ज्योप
ग्रामवच्च - यथा सर्व
सनार्थ मभिव्यक्तये स्यात्योक्तम् ॥३७॥ व्यामसूचीपाशाद्यपेक्ष
अर्भकौकास्त्वाद्यभ्र
॥ सम्भोगप्राप्तिरिति चेन्न वैशेष्यात् ॥४०॥ श्यते स्वमत्वापि
ननु सर्वगस्यापि ब्रह्मणः सर्वहृदयादिसम्बन्धाच्चिद्रूपत्वा
वत् सुखदुःखादि भोगोपि स्यादित्याशङ्क्य समाधत्ते । सम्भ
गेति । एकस्य तु कर्तृत्वे भोक्तृत्वं अन्यस्य तु न अपहतपा
त्वादिति विशेषोस्ति नहि सांनिध्यमात्रे तत्कार्यसम्बन्धो
पेतः गगनादीनामपि दाहछेदादिप्रसङ्गात् मिथ्याज्ञानप्र
क्तत्वात् भोगस्य नचेश्वरस्य मिथ्याज्ञानं तस्मान्नेश्वरस्य
गापत्तिः ॥४०॥

॥ अत्ता चराचरग्रहणात् ॥४१॥

सु
अत्तेति यस्य ब्रह्म च क्षत्रं चोभे भवतः ओदनः मृत्युर्य
पसेचनं क इत्था वेद यत्र स इत्यत्र ओदनउपसेचनशब्द
सूचितोऽत्र अत्ता प्रतीयते स किं अत्ता अग्निः उत जीवः
रो वा अग्निरन्नाद इति श्रुतेरग्निस्तयोरन्यः पिप्पलं स्
ति लिङ्गाज्जीवो वेति प्राप्ते ईश्वर एव अत्ता भवितु
पसेचनस्य चराचरस्य स्थावरजङ्गमस्य अद्यत्वेन प्र
ईश्वर एव हि सर्व विकारजातं उपसंहरन् अत्ते त्युप
अनश्नन्निति कर्मफलभोगस्यैव निषेधात् सर्व
स्य च नाशकत्वात् तस्मादत्तेश्वरः ॥४१॥

करणा च्च ॥४२॥

रणात्क इ स्या वेद यत्र स इति ब्रह्मलिङ्गाच्च ईश्वर०
त्याह प्रकरोति। न जायते म्रियते वा कदाचि जाय
वे त्यादिना ब्रह्म प्रकरणा चेति भावः ॥४२॥

गुहां प्रविष्टा वात्मानौ हि तद्दर्शनात् ॥४३॥

त म्पिबन्तौ सुकृतस्य लोके गुहाम्प्रविष्टौ परमे पराध्यें
ातयो ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेता
ञ्च किं बुद्धि जीवो निर्दिष्टौ उत जीव परमात्मा नाविति
ाये बुद्धि जीवौ गुहायां शरीरे हृदये वा तयोः प्रवेशात्
ीश्वरस्य सर्वगतस्य विशिष्ट देशत्वं युक्तं सुकृतस्य
कइति कर्मगोचरा नति क्रमाच्चेति प्राप्ते ब्रूते गुहामि
ात्मानौ जीवेश्वरौ हीति निश्चयेन चेतनावेवो क्तौ
पिबंतावितिद्विवचनेन क्रुतपाने न लिङ्गेन जीवे
श्चिते द्वितीयान्वेषणायां सजातीयस्य चेतनस्यैव
रणात् यथास्य गो द्वितीयो न्वेष्टव्य इत्युक्ते द्वितीयो
ान्विष्यते नाश्वादिन व गुहाहितत्वानुपपत्ते नेश्व
हाहितं गह्वरे ष्ठम्पुराणां यो वेद निहितं गुहायामित्या
नेगस्याप्युपलब्ध्यर्थं देशविशेषवई स्यादपि सम्भवात्
ातथा पिबति संसारित्वा संसारित्वयोस्तत्रेव सम्भवाच्च
ा जीवेश्वरौ ॥४३॥

॥विशेषणाच्च॥४४॥

आत्मानं रथिनं विद्धि शरीरं रथमेव चेत्युत्तर ग्रन्थे-
न रथित्वस्य विज्ञानात्मनि कल्पनेन संसारमोक्ष
मार्गगन्तारङ्कल्पयति शरीर रथारूढस्य ब्रह्मैव मन्तव्य
म्भवति तन्दुर्दर्शं गूढमनुप्रविष्टं इत्यादौ दर्शना
मं तृ मन्तव्यभाव विशेषणात् अपि तावेवेत्याह वि
शेषणेति एवन्द्वासुपर्णा वित्यत्रापि ज्ञेयम् ॥४४॥

॥अन्तर उपपत्तेः॥४५॥

य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाचैतदमृत
मभयमेतत् ब्रह्मेति तद्यद्यपि अस्मिन्सर्पिर्वोदकम्वा
सिञ्चति वर्त्मन्येव गच्छतीति श्रुतं तत्राक्ष्यधिकरणे
सकि प्रतिबिम्बो वा सूर्यादि देवता वा भोक्ता वा ईश्वरो
ति सन्देहे दृश्यत इति लिङ्गात् प्रतिबिंबः एतस्मिन्
स्मिन् प्रतिष्ठित इति श्रुतेः सूर्यः पुरुष इति लिङ्गा
वेति प्राप्ते समाधत्ते। अन्तर इति। ईश्वर एवात्रान्तरः
स्य तत्त्वाभयत्व ब्रह्मत्वादीनामुपपत्तेः सर्पिर्वोदक
त्याद्युपपत्तेश्च एवमेष उ एव वामनीरित्यत्रापि
॥४५
च्च सर्वस्थानस्थस्य ब्रह्मणः यः पृथिव्यां तिष्ठन्
यतीत्यादिना यच्चक्षुषि तिष्ठन्नित्यत्र निर्देशादि
कं श्रुतं तत्र कुत्राध्येयमित्याक्षेपे यश्चक्षुषि तिष्ठन्

१/४ एष उ एव भामनीः मु. ४

...ति नियतस्थान व्यपदेशाच्च ब्रह्मैवैषो य एषोक्षीत्या
...विवक्षितः शालग्रामे इव विष्णोरित्याह स्थानादिति ॥५६॥

॥ सुखविशिष्टाभिधानादेव ॥ ५७ ॥

अपि च सुखविशिष्टाभिधानादेव ब्रह्मत्वं प्राणो ब्रह्म कं
ब्रह्म खं ब्रह्मेति प्रकृतब्रह्मणः ग्रहणस्यन्याय्यत्वात्
...प्राचा (विशिष्टाभिधानादेव) येस्ते गतिमवक्ते ति गतिमा
...नाभिधान प्रतिज्ञानात्कथमिति तु न उपक्रमोपसंहा
...योः यद्वाव कं तदेव खं यदेव खं तदेव कं खशब्दो ब्र
...सुखनाची कं शब्द समभिव्याहारात् परस्पर विशेषि
...कं खं शब्दो सुखरूपं ब्रह्म गमयतः तस्मात्सुखविशि
...भिधानादेव ब्रह्मपरत्व मित्याह सुखविशिष्टेति ॥५७॥

॥ ...तोपनिषत्कगत्यभिधानाच्च ॥ ५८ ॥

...रमाह श्रुतेति । श्रुता उपनिषदो येन तस्य ब्रह्मविदो
...या गतिः गमनं मार्गः देवयानाख्यः स एव मा
...क्षिपुरुषोपासकस्य श्रूयते आदित्याच्चन्द्रमसञ्च
...मसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म
...गमयति एष देवपथः एतेन प्रतिपद्यमाना इमं मान
...वर्तन्त इति तस्मादक्षिस्थ ब्रह्मैवार्थः ॥ ५८ ॥

॥ अनवस्थितेरसम्भवाच्च नेतरः ॥ ५९ ॥

...याद्रिपुरुषोन ग्राह्य इत्यत्र युक्तिमाह । अनवस्थितेरि
... । छायापुरुषस्य एकांतोपासक चक्षुष्यसम्भवात्

बिम्ब पुरुषान्तरसत्वे एव छायासम्भवात् दृश्यते इति वर्त्तमान निर्देशाच्च तस्मिन्नमृतत्वादि गुणासम्भवाच्च न ग्रहणान्दृश्यत इत्युपपादनन्तु शास्त्रापेक्ष्य मुपासनार्थं सिद्धिषयन्तस्माद्ब्रह्म ॥४९॥

॥ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् ॥५०॥

यइमं लोकं परं च लोकं सर्वाणि भूतान्यन्तरो यमयतीत्युपक्रम्य

स्थितोऽयमिपि तान्तयो मोघ्यते सके यः पृथिव्यां तिष्ठन् पृथिव्यान्तरोऽयम् पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवी मन्तरो यमयत्येष त आत्मान्तर्याम्यमृत इत्यादि श्रुतौ अधिदैवत मधिलोक मधिवेद मधियज्ञ मधि भूत मध्यात्मञ्च कश्चिदन्तर वस्थितोऽन्तर्यामी किम् अधिदेवता द्यभिमानी देवतात्मा किम्वा प्राप्ताणिमाद्यैश्वर्यः कश्चित् योगी किम्वा परमात्मा विशेषं पूर्वमर्थान्तर मिति संशये संज्ञा या अप्रसिद्धत्वेन संज्ञिनोऽप्यप्रसिद्धिरतो नापूर्वमर्थान्तर किं त्वेतद्बोधनात् पृथिव्याद्यभिमानी सूर्यादिदेवो वा योगी वा परमात्मा अकार्यकारणत्वादिति प्राप्ते आह अन्तर्यामी योऽत्रान्तर्यामी स पर एवात्मा कुतः तद्धर्मव्यपदेशात् पृथिव्यादि सर्व विकारजात मन्तस्तिष्ठन् ईश्वरो यमयतीति ब्रह्मधर्मस्य उक्तत्वात् ब्रह्मणः सर्व विकारणत्वेन सर्वशक्त्युपपत्तेः आत्मात्वामृतत्वयोस्तत्रैव वेदान्तप्रसिद्धेः ब्रह्मैवान्तर्यामी ॥५०॥

१त्ये

43

॥ न च स्मार्त मतद्धर्माभिलापात् ॥ ५१॥

ननु अप्रतर्क्यमविज्ञेय प्रसुप्तमिव च स्थितमिति स्मृति सिद्ध सांख्यकल्पित प्रधानमेवान्तर्यामी स्यात् रूपादिरहितत्वाद् दृष्टत्वादि धर्माणाम् अन्तत्र सम्भवात् इत्याशङ्क्य समाधत्ते । न च स्मार्तेति । अचेतनप्रधानमिति आत्मात्वस्य धर्माणां दृष्टत्वादीनामभिलापात् न प्रधानं स्मार्तमन्तर्यामी अदृष्टो द्रष्टा अश्रुतः श्रोता अमतो मन्ता अविज्ञातो विज्ञातेति हि इह वाक्यशेषात् ज्ञातृत्वादि धर्माभिलापादात्मैव ॥ ५१॥

॥ शारीरश्चोभयेऽपि हि भेदेनैनमधीयते ॥ ५२॥

ननु शारीरो जीवोऽन्तर्यामी भवतु तस्य चेतनत्वात् न च शारीरस्य श्रोतृत्वजीवस्याप्य दृष्टत्वादिधर्म सम्भवादित्याशङ्क्य सिद्धान्तयति शारीरश्चेति नेति पूर्वसूत्रादनुवर्तनीयं शारीरश्च न कुतः हि यतः उभयेऽपि काण्वमाध्यन्दिनीया बृहदारण्यकेऽन्तर्यामिणः सकाशात् भेदेन भिन्नत्वेन एनं जीवमधीयन्ति तत्र जीवस्योपाधिपरिच्छिन्नस्य घटाकाशवत् कार्त्स्न्येन पृथिव्यादिषु अन्तरवस्थानं नियमनञ्च न सम्भवतीति भावः विज्ञाने तिष्ठन्निति काण्व पाठः आत्मनि तिष्ठन्निति माध्यन्दिनाः अधिकरणत्वेन जीवोपादानात् तद्भिन्नस्त एवान्तर्यामी भवतीति तस्मादन्तर्यामी परमात्मा ॥ ५२॥

प्रयत्वा

॥ अदृश्यत्वादिगुणको धर्मोक्तेः ॥ ५३ ॥

अद्रेश्यमित्यादि ... अथ परा यया तदक्षरमधि-
गम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुःश्रो
त्रं तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं यद्भूतयोनिं प
रिपश्यन्ति धीरा इति तत्र भूतयोनिशब्देन प्रधानं जीवः
परात्मा वेति संशये प्रधानमेव अचेतनानां ऊर्णनाभिशरीर
पृथिव्यादीनां सूत्रौषध्यादिषु कारणत्वस्य दृष्टत्वादचेत
नं प्रधानमेव विश्वकारणमक्षरात्सम्भवतीह विश्वमुक्त
यात्केशलोमानीति दृष्टान्तदर्शनादिति प्राप्ते ब्रूते । अदृश्य
त्वेति नह्यचेतनस्य केवलस्योर्णनाभ्यादेः सूत्रयोनीत्वम
तद्वदचेतनं न केवलं शरीरं केशादिजनकं किन्तु अदृष्ट
त्वाभिलापसम्भवे दृष्टत्वाभिलाषासम्भवात् न प्रधान
केवलं ग्रहीतुं शक्यते तस्माद्भूतयोनिः परमात्मा अपा
तः स सर्वविषयस्य ज्ञानमयं तपस्तस्मादेतद्ब्रह्म नामरूपमन्नं च
जायत इति निर्देशसाम्यात् यदि प्रधानं तर्हि पराविद्यो
त्यनुपपत्तिः अतो भूतयोनिरीश्वर एव ॥ ५३ ॥

॥ विशेषणभेदव्यपदेशाभ्यां च नेतरौ ॥ ५४ ॥

युक्त्यन्तरमाह विशेषणेति प्रकृतभूतयोनिमुद्दि
श्य दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः अप्रा
णो ह्यमनाः शुभ्र इति विशेषणभेदात् विकारात्परः अवि
इति भेदेन व्यपदेशाच्च न प्रधानजीवौ ग्राह्यौ ॥ ५४ ॥

॥ रूपोपन्यासाच्च ॥ ५५ ॥

हेत्वन्तरमाह रूपेति अक्षरात्परतः पर इत्यनन्तरं अग्निर्मूर्
धा चक्षुषी चन्द्रसूर्यौ दिशः श्रोत्रे वाग्विवृताश्च वेदाः वायु

प्राणो हृदयमिव श्वसमस्य पादौ पृथिवी ह्येष सर्वभूतान्तरात्मेति रूपोपन्यासात्पर एव ॥५५॥

॥ वैश्वानरः साधारणशब्दविशेषात् ॥५६॥

को न आत्मा किं ब्रह्मेत्युपक्रम्य श्रुतमुक्त्वैतमेव प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ति तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाश्चक्षुर्विश्वरूपः प्राणः पृथग्वर्त्मात्मा सन्देहो बहुलो बस्तिरेव रयिः पृथिव्येव पादौ इत्यादि तत्र वैश्वानरशब्देन जाठरोऽग्निः उत तदभिमानी देवः उत जीवः उत ईश्वर इति सन्देहे अयमग्निर्वैश्वानरो येनेदमन्नं पच्यत इति श्रुतेः गौणीवैश्वानरस्य सुमतौ स्यामेति श्रुतेर्देवता किं आत्मेत्युपक्रमाच्छारीरो वा इति एवमाह वैश्वानर इति यद्यपि वैश्वानरशब्दात्मशब्दौ अनेकसाधारणौ तथापि विशेषात् मूर्धैव सुतेजाः इत्यादि सर्वेषु लोकेष्वन्नमत्तीति को न आत्मा किं ब्रह्मेति साधारणब्रह्मबोधकशब्दविशेषात् ब्रह्मैव वैश्वानरः ॥५६॥

विश्वस्माअग्निर्भुवनायेति सामान्येन प्रयोगादग्निमात्रम् १

॥ स्मर्यमाणमनुमानं स्यादिति ॥५७॥

अतो ब्रह्मैव वैश्वानरः कुतः ईश्वरस्यैवाग्निरास्यं द्यौर्मूर्धेति त्रैलोक्यात्मकं रूपं स्मर्यमाणमिति सुयेषु सुदृशः अग्निं तस्मै लोकात्मने नमः इति स्मर्यते मूलश्रुतिरप्येवम्भवानुमेया तस्मादनुमानमनुमेयश्रुतिर्गमकं स्यात् तस्माद् ब्रह्म ॥५७॥

॥ शब्दादिभ्योऽन्तःप्रतिष्ठानाच्चेन्नेति चेन्न तथा दृष्ट्युपदेशादसम्भवात्पुरुषमपि चैनमधीयते ॥५८॥

45

ननु नात्र वैश्वानरः परात्मा कुतः प्रसिद्धाग्नि शब्द वै
श्वानरादि शब्दादिभ्यः पुरुषेन्तः प्रतिष्ठितं वेदेत्यने
नान्तः प्रतिष्ठानादित्ति प्राप्ते ब्रूते शब्दादिभ्य इति ना
स्मादि कुतः अस्यादौ ब्रह्म दृष्ट्युपदेशार्थं तयोक्तेः मू
र्धैव सुतेजा इत्यादीनामसम्भवात् सएवाग्नि वैश्वान
रो यत्पुरुषो वेदेति वाजसनेयिभिरप्यभिधीयते स प
र एवात्मा ॥५८॥

॥अतएवनदेवताभूतञ्च ॥५९॥

अत एव पूर्वोक्तहेतुभ्यः न वैश्वानर शब्दार्थः देव
तात्मा भूतात्मा वा अग्नि रित्याह अतएवेति ॥५९॥

॥साक्षादप्यविरोधं जैमिनिः ॥६०॥

जाठराग्नि प्रतीकः ताद्दशाग्नि उपाधिको वा परमेश्वर
उपास्य इत्युक्तं इदानीं येनाप्यापरिच्छिन्नः साक्षात्परो
त्मा उपास्य इति जैमिनि मत माह साक्षादिति तथा
विश्वेन रायस्येति विश्वस्यायम्नरः इति वा व्युत्पत्ति
स्स यरीया ॥६०॥

॥अभिव्यक्ते रित्याश्मरथ्यः ॥६१॥

ननु कथं तर्हि प्रादेश मात्रत्वमभिव्यक्ते रिति यामाशङ्कायाह
मात्रस्यापीश्वरस्य प्रादेशमात्रत्व मभिव्यक्ति निमित्तं
प्रादेशमात्ररूपः अभिव्यज्यते इत्याश्मरथ्य आचा
र्यो मन्यते ॥६१॥

॥अनुस्मृतेर्बादरिः ॥६२॥

बादरिस्तु अप्रदेशमात्रेऽपि प्रादेशमात्रोऽनुस्मर्तव्यः इति अनुमन्यते ॥६२॥

॥सम्पत्तेरिति जैमिनिस्तथाहि दर्शयति ॥६३॥

द्युप्रभृतिपृथिवीपर्यन्ता नव येऽवयवान मूर्धप्रभृति चुबुकान्तेष्ववयवेषु कल्पयित्वा प्रदेशमात्रत्वस म्पत्तेः सम्भवात् एषवा अतिदिष्टा वैश्वानर इति चक्षु षि उपदिशन् एष वै सुतेजा वैश्वानर इति नासिके उ पदिशति एष वै पृथग्वर्त्मा वैश्वानर इति मुखाकाश मुपदिशन् सम्पत्ति निमित्ता प्रादेशमात्र श्रुतिरिति जैमिनिराचार्योऽनुमन्यते यतः होति निश्चयेन क ... श्रुतिर्दर्शयति इत्याह सम्पत्तेरिति ॥६३॥

॥ ... मनन्ति चैनमस्मिन् ॥६४॥ इति द्वितीयः पादः

... जाबालाः एनं परमेश्वरम् अस्मिन् मूर्धप्रभृति चुबुका ... शिरसि आमनन्ति अथ य एषो नन्तो ... सोऽविमुक्ते प्रतिष्ठित इति सोऽविमुक्तः कस्मि ... ष्ठित इति वरणायां नास्यां चेत्युक्त्वा कतमच्चा ... भवतीति भ्रुवो घ्राणस्य च यः सन्धिः स ... स एष द्युलोकस्य परस्य च सन्धिर्भवतीति त- स्मात् परमेश्वर एव वैश्वानर इत्याह आमनन्तीति ... इति ब्रह्मसूत्र तात्पर्य विवरणे समन्वयस्य द्वितीयः पादः ॥६४॥

॥द्युभ्वाद्यायतनं स्वशब्दात् ॥६५॥

इदं श्रूयते यस्मिन्द्यौः पृथिवी चान्तरिक्षं चोतं मनः सह प्राणैश्च सर्वैः तमेवैकं जानथ आत्मानमन्या वाचो विमुंचथ अमृतस्यैष सेतुरिति तत्र द्युप्रभृतीनामोतत्ववचनादायतनमवगम्यमानं किं अर्थान्तरमीश्वरो वा इति संशये परिच्छिन्नमर्थान्तरममृतस्यैष सेतुरिति पारवत्त्वप्रतीतेः। न चापारं ब्रह्म तादृशं तथा चायतनं प्रधानं वायुर्वेति वायुना वै गौतम सूत्रेणायं च लोकः परश्च लोकः इत्यादिना तथात्वादिति प्राप्ते आह द्युभ्वादीति द्यौश्च भूश्च द्युभुवौ तावादौ यस्य तद्द्युभ्वादि तदायतनं ब्रह्मैव कुतः स्वशब्दात् तमेवैकं जानथ आत्मानमित्यत्र सन्मूलाः सोम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठा इत्यादौ स्वीयेनात्मशब्देन सच्छब्देन च अभिलापात् अमृतत्वसिद्धये अमृतस्य सेतुरिति मोक्षफलश्रवणाच्च तस्मादायतनं ब्रह्मैव ॥६५॥

॥मुक्तोपसृप्यत्वव्यपदेशाच्च ॥६६॥

इतोऽनन्तरमाह मुक्तेति मुक्तैरुपसृप्यं प्राप्यं तस्य व्यपदेशात् श्रवणात् अनात्मसदेहादिष्वहमिति भ्रमरहितानामुपसृप्यम

उपगम्य मत आय तन स्वशेन ॥६६॥

॥ नानुमान मतच्छब्दात् ॥६७॥

यथा ब्रह्म प्रतिपादको विशेषतो हेतुरुक्तः तथा प्रधान प्रतिपादको हेतु नास्तीति न प्रधानमनुमान मित्याह नानुमानेति । नह्य चेतनस्य तस्य शब्दोस्ति प्रत्युत चेतनस्य शब्दस्वास्ति यः सर्वज्ञः स सर्व विदिति तस्मादतच्छब्दात् नानुमान मप्रधान मायतन म् ॥६७॥

॥ प्राणाभृच्च ॥६८॥

प्राणाभृतः जीवस्य विज्ञानात्मनः आत्मत्वञ्चेतनत्वं सम्भवति यद्यपि तथाप्युपाधि परिच्छिन्नस्यासर्वज्ञत्वाद तच्छब्दत्वादेव न प्राणाभृतत्मायतन मित्याह प्राणाभृदिति ॥६८॥

भेद व्यपदेशाच्च ॥६९॥

व्यपदेशश्चेह भवति तमेकं जानथ आत्मानं ... यावा नोवि मुञ्चथेति तत्र ज्ञेय ज्ञातृ भावेन ... ज्ञेनापि व्यपदेशात् प्राणाभृतो ज्ञातृत्वात् ज्ञेय ... तैवायतन मित्याह भेद व्यपदेशेति ॥६९॥

॥ प्रकरणाच्च ॥७०॥

कस्मिन्नु भगवो विज्ञाते इति ब्रह्म प्रकरणाच्च न प्राणाभृत्सु स्वायतन मित्याह प्रकरणेति ॥७०॥

॥स्थित्यदनाभ्यां च॥७॥

द्युभ्वाद्यायतनं प्रकृत्य द्वा सुपर्णा सयुजा सखायौ समानं वृक्षं परिषस्वजाते इत्यत्र पिप्पलं स्वाद्वत्तीति कर्मफलोपभोगस्यादनस्य अनश्नन्नन्यो अभिचाकशीतीति स्थितेश्चोक्तत्वात् क्षेत्रज्ञेश्वरयोर्ग्रहीतव्यत्वात्तथायतनत्वेन यदीश्वरो विवक्षितस्तदा तस्य प्रकृतस्य क्षेत्रज्ञात् पृथग्वचनमवकल्पते अन्यथा ह्यप्रकृतवचनमाकस्मिकमसम्बद्धं स्यात् इत्येह स्थित्यदनाभ्यामिति। तस्मात्स्थित्यदनाभ्यामीश्वर एवायतनं यद्यप्येतद् दृश्यत्वादिगुणको धर्मोक्तेरित्यत्रोक्तं तथापि यस्मिन्द्यौः पृथिवी चान्तरिक्षमिति प्रपञ्चार्थं पुनरुपन्यासम्॥७॥

॥भूमा सम्प्रसादादध्युपदेशात्॥८॥

भूमा त्वेव विजिज्ञासितव्य इति भूमानं भगवो विजिज्ञास इति यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा अथ यत्रान्यत्पश्यति अन्यच्छृणोति अन्यद्विजानाति तदल्पं यो वै भूमा तदमृतं यदल्पं तन्मर्त्यमिति तत्र संशयः किं प्राणो भूमा उत परमात्मा वेति

बहोलोपोभूच

भूमेतिबहुत्वमर्थः बहोरितिबहुशब्दस्य भूः
मन्यत्वयोः बहुत्वञ्च प्राणस्यैव प्राणो वा आशा
या: भूयानितिश्रुतेस्तत्र अस्तिभगवो नाम्नो भू
य इत्याद्युत्तरोत्तरम्वाङ्मनः प्राणानाम्भूय
स्त्वप्रतिवचनेन प्राणस्यैवोक्तत्वात् प्राणाद
र्शिनश्चातिवादित्वमुक्त्वा प्राणो भूमेतिप्र
मेयाह भूमेति। भूमात्वस्यैव सम्प्रसादादध्युप
देशात् सम्यक्प्रसीदत्यस्मिन्निति सम्प्रसादः सुषुप्तिस्त
स्याम्प्राणो जागर्तीतिश्रुतेः प्राणएव सम्प्रसादोभि
मतस्तस्मादधि ऊर्ध्वमुपदेशात् यद्यपि अ
स्ति भगवः प्राणाद्भूय इति न पृच्छते तथापि प्रा
णातिवादित्वमुत्तरत्रोक्तमेष तु वा अतिव
दति यः सत्येनातिवदतीति सत्यम्ब्रह्मैव तेनाति
वदित्वात् प्राणादप्याधिक्यम्ब्रह्मणेति तु शब्देन प्रा
णप्रभावतनात् सत्यन्त्वेव विजिज्ञासितव्यमि
त्युपक्रमाच्च तस्माद्भूमा परमेश्वरः ॥७२॥

धर्मोपपत्तेश्च ॥७३॥

अत्रैव हेत्वन्तरमाह धर्मेति यत्र नान्यत्पश्यति
नान्यच्छृणोतीति दर्शनादिव्यवहाराभावो भूम्नि
श्रुतः ईश्वर एव सम्भवति यत्रत्वस्य सर्वमात्मै
वाभूत्तत्केन कम्पश्येदितिश्रुतेः स्व महिम

प्रतिष्ठितत्व सर्वगतत्व सर्वात्मत्वादिधर्माणाम् परमात्मन्युपपत्तेरीश्वर एव भूमा ॥८३॥

॥८४॥ अक्षरमम्बरान्तधृतेः ॥८४॥

एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोंकारस्त स्माद्विद्वानेतेनैवायतनेनैकतरमन्वेतीति प्रकृत्य श्रुतेयः पुनरेतम् त्रिमात्रेणोमित्येतेनैवाक्षरेण परम्पुरुषमभिध्यायीतेति तत्र किम्पर ब्रह्माभिध्यातव्यमुतापरम्वा सतेजसि सूर्ये सम्पन्नः ससामभिरभिनीयते ब्रह्मलोकमिति उपासकस्य तद्विदेशपरिच्छिन्नफलस्योक्तत्वात् नहि ब्रह्मविदः परिच्छिन्नं फलमश्नुते सर्वगतत्वात् परस्यब्रह्मणः अतोऽपरमेव याह्यमिति प्राप्ते अक्षरमिति इक्षतीतिपाठशेषे एतस्माज्जीवघनात्परात्परम्पुरुषमीक्षते इति ईक्षतिधात्वर्थज्ञानविषयत्वरूपकर्मत्वस्य परमेश्वरे व्यपदेशात् परमेवाभिध्यातव्यम् इति ॥ अथ यदिदमस्मिन्ब्रह्मपुरे दहरम्पुण्डरीकं वेश्म दहरोस्मिन्नन्तर आकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यमिति श्रुतं अत्र पुण्डरीके दहरे दहर आकाशः श्रूयते स किम्भूताकाशोविज्ञानात्मा व्रह्म वा इति संशये तत्राकाशश-

८६ इतीत्यसूत्रस्य व्याख्या

८७ दहर इत्यसूत्रस्य व्याख्या

दस्य भूताकाशे प्रसिध्या। भूताकाश एव तस्य दहरा
न्तनापेक्षया दहरत्वं यावान्वा अयमाकाशस्तावा
न् यान्तर्हृदय आकाश इति बाह्यान्तरभावकृत
दस्योपमानोपमेयभावः। कस्मिन्नु खल्वाकाश ओ
तश्च प्रोतश्चेति सहोवाचैतद्वै तदक्षरं गार्गि
ब्राह्मणा अभिवदन्त्यस्थूलमनण्वह्रस्वमित्यादिश्रु
तनाक्षरशब्देन अकारादिवर्णः किम्वा परमात्मेति
सन्देहे अक्षरसमाम्नाय इत्यादौ वर्णस्यैवाक्षरत्वे
न प्रसिद्धत्वात् ओंकार एवेदं सर्वमित्यादिश्रुत्य
न्तरेण वर्णस्योपास्यत्वदर्शनादक्षरं वर्ण एवे
ति प्राप्ते आह अक्षरेति। पर एवात्माक्षरशब्दार्थः
...पृथिव्याद्यम्बरान्तस्य ब्रह्मविधारणाश्रुतेः
...कारयान्तस्य कालत्रयविभक्तस्य आका
...त्वमुक्त्वा कस्मिन्नु खल्वाकाश ओत
...न इदमक्षरमुक्तं न चाकाशान्तस्य ब्रह्म
...टतिः सम्भवति ओंकार एवेदं सर्व
...तदपि ब्रह्मप्रतिपत्त्यर्थं भवितव्यमिति
...ब्रह्मैव ॥७४॥
...सनात् ॥७५॥
...अम्बरान्तधृतेः प्रधानमेवाक्षरं स्यादत आ
सा चेति सा च धृतिः ईश्वरस्यैव कर्मन प्रधा
...कर्म एतस्यैवाक्षरस्य प्रशासने गार्गि सूर्या

न च कथं ब्रह्मणः आकाशपरिमाणत्वमुपाका
शावारणार्थत्वात् तस्मादहर ब्रह्मैव ॥७८॥

॥ गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च ॥७९॥
वस्य माणहेतु मध्ये इत्युक्तं तानेवाह गतीति इमाः
सर्वाः प्रजा अहरहर्ब्रह्म गच्छन्ति एवं ब्रह्मलोकं न वि
दन्तीति प्रत्यहं जीवानां सुषुप्तौ ब्रह्मणि गमनं श्रुतं
सतासौम्य सम्पन्नो भवति इति च इमाः प्रजा इति
प्रजाशब्दितानां जीवानां गमनकर्तृत्वा इत्थं
ब्रह्मैव गतिसम्पन्नशब्दाभ्यां ब्रह्मैव लोको ब्रह्म
लोक इति अभेद परिग्रहे निद्रायां जीवस्य ब्रह्म
सम्पत्ति लिङ्गं भवति नहि सत्यलोकात्मक का
र्य ब्रह्म लोकं निद्रायां सर्वे गच्छन्ति तस्माद् ब्रह्म।७९।

॥ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥८०॥
अनन्तरमाह धृतेश्चेति अथ य आत्मा स सेतुर्वि
धृतिरेषां लोकानामसम्भेदायेति यथा जलानां
[illegible] सेतुर्लोके तथा अध्यात्मादि लोका
[illegible] नां निर्वाहकोऽसम्भेदाय अस
[illegible] इति धृतेः, एतस्यैव प्रशासने गार्गीत्यादि
[illegible] श्च अस्मिन्नुपलब्धेस्तस्मादीश्वर एव द
[illegible] ब्रह्मैव ॥८०॥

॥ प्रसिद्धेश्च ॥८१॥
यस्मादाकाशो ह वै नामरूपयोर्निर्वहिता इत्यादा
वाकाशशब्दस्य ब्रह्मण्येव प्रसिद्धिर्न क्वापि जीवे

तस्मादपि ब्रह्मेत्याह प्रसिद्धेश्चेति ॥८१॥

॥ इतरपरामर्शात्स इति चेन्नासम्भवात् ॥८२॥

अथ य एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते एष आत्मेति होवाचेत्यत्र जीवेऽपि आत्मशब्ददर्शनाज्जीव एव दहर इत्याशङ्कां समाधत्ते इतरेति । न जीवो बुद्ध्याद्युपाधि परिच्छिन्नस्य आकाशेनापरिच्छिन्नेनोपमानोपमेयभावासम्भवात् प्रथमसूत्रे इदमुक्तमपि अधिकशङ्का परिहारायेदं सूत्रं स्पष्टार्थमग्रे च वक्ष्यते ॥८

॥ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥८३॥

जीवशङ्कां पुनरुत्थाप्य वारयति उत्तराच्चेदिति उत्तरात्प्राजापत्यवाक्याज्जीव एव तत्र य आत्मापहतपाप्मेत्युपक्रम्य य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच एष स्वप्ने महीयमानश्चरति एष आत्मेतीत्याद्युत्तरा जीव इति प्राप्ते नु जीवो न यत ईश्वर एव आविर्भूतजीवस्वरूपक उच्यते भूतपूर्वगत्या तत्र जीवो ब्रह्म उक्तं उदशाद्यैव ब्राह्मणादेश्च जीवस्यैव तत्त्वमसीत्यादि शास्त्रेषु उक्तमविरुद्धं विरुद्धं तेन वर्णाश्रमधर्मविधि विरोध परिहारः ॥८३॥

॥ अपि च स्मर्यते ॥ ८७॥

गीतास्वपि एवं स्मर्यते न तद्भासयते सूर्यो न शशा
ङ्क इत्यादिना इत्याह अपि चेति ॥ ८७॥

॥ शब्दादेव प्रमितः ॥ ८८॥

अङ्गुष्ठमात्रः पुरुषो (जीवो वा ईश्वरो वा) मध्य
आत्मनि तिष्ठति तथाङ्गुष्ठमात्रः पुरुषो ज्योतिरि
वाधूमक इत्यादौ च अङ्गुष्ठमात्रः पुरुषो जीवो वा
ईश्वरो वा जीव एव परिमाणोपदेशात् अथ सत्य
वतः कायात् पाशबद्धं वशङ्गतं अङ्गुष्ठमात्रम् पुरुषं
निश्चकर्ष यमो बलादित्यादि पुराणाच्च जीवस्ये
ति प्राप्ते आह शब्दादिति ईशानो भूतभव्यस्येति
ति शब्दाद् ब्रह्मैव न हि जीवस्य निरङ्कुशं ईशित्वं

~~॥ शब्दादेव प्रमितः~~ ॥ [illegible]॥

॥ हृद्यपेक्षया तु मनुष्याधिकारित्वात् ॥ ८९॥

कथं तर्हि सर्वगस्याङ्गुष्ठपरिमितत्वम् अवगम्यते
आह हृद्यपेक्षेति सर्वगस्यापि हृदयावच्छेदेन
अङ्गुष्ठमात्रत्वं मिति मनुष्याधिकारत्वात् शास्त्र
स्य तस्मात् पर एव ॥ ८९॥

॥ तदुपर्यपि बादरायणः सम्भवात् ॥ ९०॥

मनुष्याधिकारत्वप्रसङ्गात् देवादीनामप्यधिकारो
ज्ञाने स्तीत्याह तदुपरीति यद्यपि कर्मणि इन्द्रा

आकाशस्य यथा वंशपर्वा यवच्छेदेन अरत्निमात्रत्वं सम्बन्धेन तथा [illegible] हृद
[illegible]

दीनान्देवानां ऋषीणां चनाधिकारस्तेषां इन्द्रो-
न्तराभावात् आर्षेयान्तराभावात् तथापि विद्या
स्वधिकारो भवति नहितत्र द्रव्याद्यपेक्षास्ति स्वयम्भ
भात् वेदानां तेषामुपनयनाद्यपेक्षणात् अनर्थ
न श्रुतौ एकशतं ह वै वर्षाणि प्रजापतौ इन्द्रो ब्रह्म
चर्यमुवास इति भृगुर्वै वारुणिर्वरुणं पितरमु
पससार इति च श्रूयते तस्माद्देवादीनामपि विद्यास्व
धिकार इत्याह तदुपरीति तेषां मनुष्याणामुपरि
वर्गे विद्यमानानां देवादीनामपि अधिकारं
आह बादरायणः ॥२६॥

॥ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ।२७॥
इन्द्रादीनां स्वरूपसन्निधानात् यदि कर्माङ्गभावः
देवताविग्रहवत्तो स्यात् सशरीरत्वे युगपदने
[illegible] यागादौ सन्निधानासम्भवाच्च तस्मात्तेषां शरीरराणा
[illegible] मविद्याधिकारः इत्याशङ्क्य समाधत्ते विरोधेति
[illegible] रोधः कस्मादनेकस्वरूपप्रतिपत्तेः युगपत्ना
[illegible] शरीराणां प्रतिविन्द्रियाणामङ्गीकारात् कुत एवम्
[illegible] इत्युपक्रम्य त्रयश्च त्रिंशता त्रयश्च त्रि च
[illegible] स्रेति स महिमान एवैषामेते त्रयस्त्रिंशद्देवा इ
ति श्रुतिः एकैकस्य देवतात्मनो ऽनेकरूपतां दर्शय
ति आत्मनो वै सहस्राणि बहूनि भरतर्षभ योगी कुर्या
द्बलं प्राप्य तैश्च सर्वैर्महीं चरेत् योगिनामपि अनेक

शरीर सम्भवि किमुवक्तव्य माजान सिद्धानान्देवा
मनेकरूपत्वे वज्रहस्तः पुरन्दर इति च तस्माद्वि
हवत्वेपि न कोपि विरोधः तस्माद्देवादीनामपि
यास्वधिकारः ॥२६॥

॥शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्याम्॥

नन्वनित्यशरीराङ्गीकारे इन्द्रादिपदानां वैदिका
मप्याधुनिकसंकेतापत्तिः तथा चौत्पत्तिक सु श
स्यार्थेन सम्बन्ध इति जैमिनिसूत्रविरोधे सति
तयित्वपुरुषसापेक्षत्वात् वैदिकशब्दानामप्रामा
णापत्तिरित्याशङ्क्य समाधत्ते शब्द इति प्रत
निर्घ्याद्वेदात् देवादीनामुत्पत्तिः किं प्रमाण
ति चेत् प्रत्यक्षानुमानाभ्यां प्रत्यक्षं श्रुतिः
नुमानं स्मृतिः ताभ्यां समृमिमस्त्वजत इति
श्रुतेः सर्वेषां तु सनामानि कर्माणि च पृ
क्पृथक् वेदशब्देभ्य एवादौ पृथक् संस्था
श्च निर्ममे इति स्मृतेः प्रमाणत्वात् यदुक्तं
नित्यव्यक्ति सम्बन्धाद्वेदाप्रामाण्यं तदपि
न गवादिशब्दानां नित्यायां आकृतौ श
न व्यक्तिषु आनन्त्य व्यभिचाराभ्यामेवं दे
व्याकृतीनां नित्यत्वेन शक्तेरप्यनादित्वान्न
प सापेक्षत्वं तेनाप्रामाण्यापत्तिर्नेतस्मात्
माण्यम् ॥२७॥

2 सभूरि तिव्याह सू १०

...वत एव नित्यत्वम् ॥२९॥
...चार्यसम्प्रदायोक्तिपूर्वकं सिद्धान्तयति नवरात्र एव नु
...इति तु भगवानुपवर्षः इति स्पष्टोऽर्थः वेदस्य नित्यत्वं
...धयति अत एवेति नियताकृतेर्देवादेर्जगतो वेदप्रभव
...देव वेदानुपूर्व्या नित्यत्वं तस्मात् स्वनित्या एव श्रुतिरपि
...तेन वाचः पदवीयमायन् तामन्वविन्दन् ऋषिषु प्रविष्टां
...नामेव वाचमनुविन्नां दर्शयति व्यासश्च युगान्तेहि
...न्वेदान् सेतिहासान् महर्षयः लेभिरे तपसा पूर्वमनु
...नाः स्वयम्भुवा ॥२९॥
समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च ॥३०॥
...न्वेदन्तदा भवति यदि विच्छेदेनैव व्यक्तयः उत्प
...न नहीदं सम्भवति यदा सकलं नामरूपात्मकं जगत्प्रली
...पुनः कालान्तरे प्रभवति तदा सङ्कृतपितुरपेक्षा इति
...यों मेतदित्याशङ्क्याह समानेति सत्यप्यवान्तर प्रलये
...व्यवहारोच्छेदे पुनः परमेश्वरानुग्रहादीश्वराणाम् हि
...गर्भादीनां वेदं स्मृत्वा कल्पान्तरव्यवहारानुसन्धाने
...तो स्वप्रप्रबुद्धवत् पूर्वतनैः समाननामरूपत्वात् पुनः
...तावपि पुनरुत्पादेऽपि विरोधः दर्शनात् श्रुतेः यो
...णाम् विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै
...देव मात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये
...था यथापूर्वमकल्पयत् वेदानां नामरूपाणि यथा
...द्ध एषः शर्वर्यन्ते प्रसूतानां तान्येवैभ्यो ददात्यजः
...स्मृतेश्चेत्यर्थः ॥३०॥

॥मध्वादिष्वसम्भवादनधिकारं जैमिनिः॥३१॥

देवादीनाम्विद्यास्वधिकार इत्युक्तन्तद्दूषयति जैमिनिरित्या
मध्वादीति मधुविद्यायाम्श्रूयते असौ वा आदित्यो देव म
ति आदित्यो वा सन् उत्तमं तत्कथन्देवतानां सम्भवति
दित्यान्तराभावात् अग्निः पादो वायुः पाद आदित्यः पादो
शः पादः वायुर्वाव सम्वर्गः आदित्यो ब्रह्मेत्यादेश इत्यादाव
न देवादीनामधिकारः सम्भवति न त्सामान्यादितरेषु
याद्व मिति न्यायेन सर्वास्व प्युपासनासु देवादीनामन
धिकारं जैमिनिराचार्यो मन्यते इन्द्रादीनाम्ब्रह्मचर्यादि
प्रतिपादनम्प्राशस्त्यपरम् ॥३१॥

॥ज्योतिषि भावाच्च ॥३२॥

अनधिकारे युक्त्यन्तरमाह ज्योतीति यदिदम्परिभ्रमद्
ति मेराडल मवभासयते प्रत्यक्षसिद्धं ज्ञेन हृदयादि विग्रहे रा
तन तयाऽस्य थैर्यादिना योगः न सम्भवति म्हदादिव दचे
तत्त्वान्मराडलादे र्नचाचेतनो देहाभिमानी प्रत्यक्षः
वादादयः प्राशस्त्यार्थ त्तस्मादपि नाधिकारः ॥३२॥

॥भावन्तु बादरायणोऽस्ति हि ॥३३॥

एतदपवादेन वादरायण माह भावन्विति तु शब्दः पूर्वमत
वत्यर्थः बादरायणस्त्वाचार्यो मध्वादिविद्याया मसम्भवा
नधिकारेऽपि शुद्धब्रह्मविद्यायामस्त्यधिकारं मन्यते यथा
मीरोमनुष्याणामनधिकारेऽपि न सर्वेषां सर्वत्र यज्ञे
ना मनधिकारात् राजसूयादौ ब्राह्मणादीनां तद्वदत्रापि
तएव तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवदित्यो
दर्शनमपि तस्माद्वीतिनिष्ठुपेन अधिकारोऽस्ति ॥३३॥

63

...स्यतदनादर श्रवणात्तदाद्रवणात्सूच्यते हि ॥ ८८ ॥

...देवादिवत् शूद्रस्यापि ब्रह्मविद्याधिकारो भवतीति तेषामाह
...तीयाद्यश्रवणाभावेऽपि तदन्यैस्तु विद्याधिकारे किमपि न
...जनकम् श्रुतिरपि नात्र श्रुतिर्यौत्रायणं शूद्रशब्देन परामृ
...ह अहहारेत्वा शूद्र तवैव सह गोभिरस्त्विति प्रासेश्रा
...जस्येति न शूद्रस्याधिकारो वेदाध्ययनाभावात् उपासन
...शास्त्रोपरत्वात् तस्माच्छूद्रो यज्ञेऽनवक्लृप्त इतिन्यायस्या
...पि सम्भवात् यत्संवर्गविद्यायां शूद्रशब्दैकस्यानादर
...शुकशोकः अस्य शुचं अभिदुद्राव शुचाभिदुद्रावेति श्रु
...ब्दो यौगिकः लौकिकस्य न रूढः तस्मान्न शूद्रस्याधि
...रः ॥ ८९ ॥

...क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् ॥ ९० ॥

...पन्तर माह क्षत्रियेति उत्तरत्र चैत्ररथिनाऽभिप्रतारि
...क्षत्रियेण समभिव्याहारात् लिङ्गात् अस्य शूद्रत्वमपि
...स्मात्क्षत्रियत्वगतेः समभिव्याहारात् उत्तरत्र चैत्ररथेन
...न्नाधिकारः शूद्रस्य ॥ ९१ ॥

...संस्कारपरामर्शात्तदभावाभिलापाच्च ॥ १०० ॥

...पन्तर माह संस्कारेति तत्तद्विद्यास्थले उपनयनादि
...॥ ए: परामृश्यन्ते अधीहि भगवइति होपससाद स
...नाणो भगवन्तं पिप्पलादं उपसन्ना इत्यादिषु न शू
...नकंकिञ्चित् न च संस्कारमर्हतीति शूद्रस्य संस्कार
...धात् तस्मादपि नाधिकारः ॥ १०० ॥

॥तदभावनिर्धारणे च प्रवृत्तेः ॥१०१॥

अन्यामपि युक्तिमाह ॥तदभावेति, यत्सत्यवचनेन

द्रत्वाभावे निर्धारिते गौतमः जाबालमुपनेतु म

तो नैतदब्राह्मणो विवेक्तुमर्हतीति समिधं सोम

रोपत्वा नेष्ये न सत्यादगा इति श्रुतेः शूद्रत्वाभाव

धारणोऽउपदेशे प्रवृत्तेः ॥१०१॥

श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च १०

हेत्वन्तमाह श्रवणेति। शूद्रस्य वेदश्रव

नादीनां प्रतिषेधात्। यथा अथास्य वेदमुप

तस्य पुजतुभ्यां कर्णपूरणमुदाहारे जिह्वाच्छेदो धा

हृदयभेदस्तस्माच्छूद्रसमीपे नाध्येयमित्यादि

तेश्च नाधिकारः। विदुरधर्मव्याधप्रभृतिशूद्राण

पूर्वजन्मसंस्कारवशाद् ज्ञानोत्पत्तेः फलप्राप्ति

॥१०२॥

॥कम्पनात् ॥१०३॥

समाप्तोऽयं प्रासङ्गिकविचारः इदानीं प्रकृत मेव

क्यार्थविचारः क्रियते यदिदं किञ्च जगत्सर्वं प्रा

एजति निःसृतं महद्भयं वज्रमुद्यतं य एतद्वि

रमृता स्ते भवन्तीति एजृ कम्पन इति जगत्प्रा

यं स्पन्दते महद्भयकरणं वज्रशब्दितं उद्यतं

ज्ञानात् अमृतत्वप्राप्तिरिति श्रूयते तत्र

॥ आनुमानिकमप्येकेषामिति चेन्न शरीररूपक
विन्यस्तगृहीतेर्दर्शयति च ॥ १०८ ॥

पूर्वं ब्रह्मजिज्ञासां प्रतिज्ञाय ब्रह्मलक्षणमुक्तं अश
ब्दत्वात्प्रधानं कारणत्वेन निराकृतं तदत्राक्षिप्य
समाधानार्थं परो ग्रन्थः प्रवर्तते प्रधानस्याशब्द
त्वं न सम्भवति आनुमानिकं प्रधानमपि काठ
के शब्दितं महतः परमव्यक्तं अव्यक्तात्पुरुषः
परः यथा सांख्याः प्रधानं येन शब्देन येन क्रमेण
पठन्ति स्मृतौ तयोरेव कठवल्ल्यां श्रुतं तस्मादशब्द
त्वाभावात् तदेव जगत्कारणमिति आशंक्य
दूषयति आनुमानिकेति न कठवल्ल्यां
स्मृतिप्रसिद्धमहदव्यक्तयोरतिरिक्तयो
त्वपरं नहि श्रुतिस्मृत्योः सर्वत्र प्रधानप्रसि
द्धिरस्ति किं त्वेकमतप्रसिद्धेः अतोऽव्यक्त
शब्देन शरीररूपकविन्यस्तं भूतसूक्ष्मं कार
णमुच्यते प्रकरणात् परिशेषाच्च यं
शरीरादीनां रथिरथादिरूपकं दर्शयति
नं रथिनं विद्धि शरीरं रथमेव च बुद्धिं तु
रथिं विद्धि मनः प्रग्रहमेव च इन्द्रियाणि
हयानाहुर्विषयांस्तेषु गोचरान् आत्मेन्द्रिय
मनोयुक्तं भोक्तेत्याहुर्मनीषिणः इति इन्द्रि

त्मनोऽपि वागादिव्यापारमुत्सृज्य मनोमात्रे
वतिष्ठेत इत्यादि एवं पक्षान्तरे आत्मनीति पर
रूपे प्रतिष्ठापन कथनात् न स्मार्तपुरुषीय प
र्यालोचनात् नात्र परिकल्पितं प्रधान
व कश्चिदस्ति तस्मादत्रापि न परिकल्पितं प्रध
न ॥१०८॥

॥सूक्ष्मं तु तदर्हत्वात् ॥१०९॥

ननु शरीरस्य प्रत्यक्षत्वेन व्यक्तत्वात् कथम
अव्यक्तशब्दितं न तत्राह सूक्ष्ममिति
तस्य व्यक्तत्वेन सूक्ष्मशरीरं ग्राह्यम् ... अव्य
त्वार्हत्वात् ॥१०९॥

॥तदधीनत्वादर्थवत् ॥११०॥

ननु जगदव्यक्तरूपम् नामरूपबीजभूतं प्र
गवस्थितं अतिरिक्तं अङ्गीक्रियते तदे
स्माकं प्रधानमत आह तदधीनत्वेति न
अस्माभिः जगतः स्वतन्त्रां प्रागवस्थां जगत्कार
णत्वेनाङ्गीक्रियते, किन्तु ब्रह्मणः अज्ञानं
मायैव साचानादि सैवाव्यक्तं माया चाव...
अङ्गीकार्या नहि तया विना ब्रह्मणो जग...
स्रष्टृत्वं सिध्यतीति अर्थवत्वात् त...
धीनत्वात् एवैः तदेवाज्ञानं अक्षरं अव्य...

7

ाशब्दे सूक्ष्यते तद्गुणसाम्या तस्या सूक्ष्मम्
योन्तरं मायां तु प्रकृतिं विद्यात् मायिनं
महेश्वरं इति तस्मात्प्रधानमतिरिक्तम् ॥१०॥
त्वावचनाच्च ॥११॥
न्तर माह ज्ञेयत्वेति सांख्यैः प्रकृति पुरुष
कज्ञानात् कैवल्यमिति, कैचिद्विभूति वि
पास्ये प्रधानं ज्ञेयमिति हि उक्तं तथाव
य अव्यक्तं ज्ञेयत्वेनोच्यते भवता अतोपि
वा वचनात् नाव्यक्त शब्देन प्रधानमुच्य
॥

नीति चेन्न प्राज्ञोहि प्रकरणात् ॥१२॥
अशब्दमस्पर्शमरूपमव्ययं तथारसं नित्य
वच्च यत् अनाद्यनन्तं महतः परं ध्रुवं
य्य तं मृत्युमुखात्प्रमुच्यते इति ज्ञेयत्वेन वच
प्रधानं अव्यक्तशब्दनिर्दिष्टं इत्याशंक्या
नीति नात्र प्रधानं निचाय्यत्वेनोक्तं ब्रह्म
मात् पुरुषान्न परं किंचिदिति एष स
षु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्य
सूक्ष्मया सूक्ष्मदर्शिभिरिति तत्र चेतना
नात् मृत्युमुखात्प्रमुच्यते इत्युक्तं तस्मा
ं तेषां व्यक्तशब्दनिर्दिष्टम् ॥१२॥

॥त्रयाणामेव चैवमुपन्यासः प्रश्नश्च॥११॥
पुनरप्यन्तरमाह त्रयाणामेवेति यस्मात् त्रयाणा-
मेव अग्निजीवपरमात्मनां कठवल्ल्यामुप-
न्यासवरप्रदानानांवक्तव्यत्वेनोपन्यासो
दृश्यते स त्वमग्निं स्वर्ग्यमध्येषि मृत्यो
हि तं श्रद्धधानाय प्रब्रूहि मिति अग्नि प्रश्नः
येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायम
स्तीति चैके इति जीव प्रश्नः अन्यत्र धर्मादन्यत्रा
धर्मादन्यत्रास्मात्कृताकृतादिति परमात्मप्र
श्नः लोकादिमग्निं तमुवाचेति अग्न्युपन्यासः
हन्तत इदं प्रवक्ष्यामो गुह्यमिति जीवोप
न्यासः न जायते म्रियते वा विपश्चिदिति पर-
मात्मोपन्यासश्च नैवं तु तत्र दृश्यते न प्रधान-
स्य वरदानं प्रश्नादि वा तस्मान्न प्रधानम्॥११॥

॥महद्वच्च॥१२॥
यथा सांख्ये महच्छब्दः सत्तामात्रे प्रथमजे प्र
युक्तः न तद्वैदिके प्रयोगेऽभिधीयते बुद्धेरा
त्मा महान्परः महान्तं विभुमात्मानं पुरुषं
महान्तं इत्यादौ तथाव्यक्तशब्दोऽपि न प्रधान
मभिदधाति अतो न प्रधानस्य शब्दत्वम्॥
॥१२॥

चमसवदविशेषात् ॥११५॥

न्नजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृज
नामित्यादिमन्त्रप्रतिपादितस्वातन्त्र्यमशब्द
प्रधानस्येतिप्रासेऽत्राह चमसवदिति नानेनमु
मत्वं सांख्यवादस्य अजादिपदानां साधारण
नतन्मात्रपरत्वाभावात् यथाकथञ्चित्श्रुति
सिद्धतेजोबन्नात्मिकायाः प्रकृतेरेवात्र गृहीत
न ज्ञातप्रत्यभिज्ञायाः प्रबलत्वेन न सांख्यीयाप्र
ति गृहीतुं शक्यते अतोऽशब्दत्वमेव यथाह्य
कविलश्चमस ऊर्ध्वबुध्न इत्यादौ यथाकथ
र्वाग्विलत्वादिकल्पनोपपत्तेः नात्र चमस
साधारणः तथात्रापि इत्यर्थः ॥११५॥

ज्योतिरुपक्रमात्तु तथा ह्यधीयत एके ॥११६॥

पुनः कथमजाप्रतिपत्तव्यात्राह ज्योतीति ज्यो
इत्यत्र ज्योतिः प्रमुखा तेजोबन्नलक्षणा चतु
भूतग्रामस्य प्रकृतिर्भूतेयमजा ग्राह्या ननु
त्रय साम्यावस्थारूपा यतः एके शाखिनः वर्णे
त् तेजोबन्नानामुत्पत्तिं अधीयते यदग्नेरो
रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं
स्येति तान्येवात्र प्रत्यभिज्ञायन्ते किं तत्र
तेरुपक्रमात् ॥११६॥

॥ कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥११
ननु कथं तेजोबन्नात्मिका त्रिरूपाऽजा प्रति
पत्तव्या यतस्तेषु अजाकृतेरभानात् जन्य
त्वे तत्तज्जायते इत्यजा इत्यस्याप्यभावात्
यमेतदत आह कल्पनेति नाप्यमाकृति वि
ष निमित्तोऽजाशब्दः नापि यौगिकः किन्तु
ल्पनोपदेशादजारूपकॢप्तिसाम्यात् [illegible]
लोके काचिदजा नानारूपा बहुवर्का [illegible]
पत्यकेरा तां कश्चिच्छागो जुषमाणः कश्चि
ज्जहाति तद्वत् इयं तेजोबन्नात्मिका प्रकृ
ति स्त्रिवर्णा बहुरूपं चराचरं कश्चिदनु
शेते अन्यो जहातीति गुणसाम्यात् प्रयोग
यथादित्यस्याऽमधुनो मधुत्वं वाचः अधे
नोर्धेनुत्वं तद्वत् ॥११॥

॥ न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥१२
ननु यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः त
मेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतमित्या
दौ पञ्चसंख्याविषयापरा [illegible] संख्या श्रूयते पञ्च
इत्यदर्शनात् ते पञ्चविंशतिः सम्पद्यन्ते तत्संख्यया
संख्येया अपि पञ्चविंशतिर्व्यर्कआकांक्ष्यन्ते

सांख्य प्रसिद्धा सत्वाख्या मूलप्रकृतिः महदाद
षोडशको विकारः
सप्तपुरुष इति पञ्चविंशति तत्वानि श्रयाराशेउ
शादि पञ्च कइति संशये सांख्यप्रसिद्धं पञ्चवि
ति तत्वानीति प्राप्ते उच्यते न संख्येति न सांख्य
योपसंग्रहो घट आकाशात्मनो भेदेन ग्रहीत
सप्तविंशति तत्वापातात् तस्मान्न पञ्चजनाः सांख्य
नि किन्तर्हि पञ्चजन शब्दः संज्ञावाची दिक्सं
संज्ञायामिति समासविधानात् पञ्चजनसंज्ञकाः
त्यपौरुषेयः प्राणादय एवोक्ता इत्यर्थः ॥११८॥
प्राणादयो वाक्यशेषात् ॥११९॥
ते पञ्चजना इत्यत आह प्राणोतियस्मिन्पञ्चेत्यग्रा
प्राणस्य प्राणमुत चक्षुषश्चक्षुरिति वाक्यशेषगताः
इत्यत एव ग्राह्याः जनशब्दपर्यायैः पुरुषशब्दः
प्रयुक्तः एते वा ब्रह्म पुरुषाः प्राणाः प्राणोहि
आदि दर्शनात् एवं निषाद पञ्चमाः वर्णाः देव
गान्धर्वाः सुररक्षांसि वा पञ्चजना ग्राह्याः ॥११९॥
वैवैकेषामसत्यन्ने ॥१२०॥
पञ्चजनाः प्राणादयः पञ्च माध्यंदिनानां
काण्वादीनां प्राणादिषु अन्नस्यानुक्तत्वात्
पादयः पञ्चेत्यत आह ज्योतिषेति तेषा
ज्योतिषा पञ्चत्वसम्पादनं काण्वानां

अन्येषां सत्यपि ज्योतिषि अन्नमादायैव संख्या रोति अपेक्षाभावात् न ग्रहणम् ॥१२०॥

॥कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः॥१२१॥

पूर्वं ब्रह्मलक्षणमुक्तं वेदान्तानां ब्रह्मविषयत्वं प्रधानस्याशब्दत्वमपि इदानीं जगतोऽव्यवस्थित क्रमत्वात् कारणत्वं पुनर सम्भवी तथाहि तस्मादात्मन आकाशः सम्भूत इत्यादि कचित्तेजो सृजत सइमांल्लोकान् सृजत एतस्माज्जायते प्राण इत्यादि क्रमविरोधान्न युक्तं समन्वय इति प्राप्ते आकारणेति भवतु सर्जनीयेषु क्रमे विवादः विनामता न पुनः विषयत्वात् कारणादिनोपवर्णितं धाय तेषामुपन्यासात् सृष्टिरेतु ब्रह्मणो नवि तं तस्मादेकवाक्यतायाः सुसंमादृत्वा युक्तो जगत्कारणसमन्वयः॥१२१॥

॥जगद्वाचित्वात्॥१२२॥

कौषीतकिनः योऽवैवालाकेते लोके एतेषामुरुषाणाङ्कर्ता यस्य चैतत्कर्म सवैवेदितव्यइतिजगद्वेदितव्योजीवो वा मुख्यप्राणः उतपरमात्मेति संशये प्राणात् प्राणएव एकधाभवतीति दर्शनाच्चेतिचजीवः तस्यापि धर्माधर्मलक्षणं कर्मवा नच श्रोतजीवलिङ्गदर्शनात्प्राणाभ्यां चेति प्राप्ते आह गादिति एतत्कर्मेति जगद्वाचित्वाज्जगत्कर्तृत्वात्

७८

॥ वाक्यान्वयात् ॥१२६॥

न वा अरे सर्वस्य कामाय सर्वं प्रियम्भवत्यात्
कामाय सर्वं प्रियम्भवति आत्मा द्रष्टव्य इत्य
आत्मा किं विज्ञानात्मा वा परो वा इति संशये जी
विज्ञातारमरे केन विजानीयात् इति ज्ञात
नोपसंहारात् विज्ञानात्मैवोपदिष्ट इति स
वे विज्ञानवचनं, भोक्त्रर्थत्वाद्भोग्यजातस्यौप
कं द्रष्टव्यम् इति प्राप्ते आह वाक्येति इदं वा
वीपरविचारेण परात्मानं प्रत्यन्वितावयवं
स्यते अमृतत्वस्य तु नाशास्ति वित्तेनेति अमृत्याय
नाम तस्यां किमहं तेन कुर्यां यदेव भगवान्वे
त्तदेव मे ब्रूहीति प्रोसंहृत्या मैत्रेय्या आत्म
ज्ञानं याज्ञवल्क्य उपदिदेश न चात्मज्ञानादन्य
त्रामृतत्वमस्ति आत्मविज्ञानेन सर्वविज्ञानं
रमकारणाज्ञानादन्यत्र मुख्यं न सम्भवति एवं
ब्रह्म तं परादादित्यादि भूतयोपि तस्मात्परमात्मन
एवायं दर्शनाद्युपदेशः ॥१२६॥

॥ प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥१२७॥ पूर्वं
यदुक्तं प्रियसंसूचितोपक्रमाद्विज्ञानात्मनं एवा
दर्शनोपदेशः तत्राह प्रतिज्ञेति आत्मनि विज्ञाते स
मिदं विज्ञातं भवतीति इदं सर्वं यदयमात्मा
इत्यादिप्रतिज्ञायाः सिद्धिं सूचयति एतल्लिङ्ग

८०

जगत्कारणत्वं उपादान प्रकृतिरूपेणैवेति
ईक्षा पूर्वकस्रष्टृकथनात् कुलालादिवन्नि
त्कारणमेव ब्रह्मेति प्राप्ते उच्यते प्रकृति
नकेवलं निमित्तत्वमेव किन्तु प्रकृति निमि
त्तेत्युभयरूपम् प्रतिज्ञादृष्टान्तानुपरोधात्
उतत्तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्य
तमित्यादि उपक्रम्य एकस्य विज्ञानेन सर्व
ज्ञानप्रतिज्ञायाः एकेन मृत्पिण्डेन सर्वं मि
ष्टान्तस्य चानुरोधा दभिन्ननिमित्तो पादाने
भयरूपत्वं ब्रह्मणोधिष्ठातृ न्तराभावात्वी
उपादानान्तराभावात्प्रकृतित्वं चेत्यर्थः ॥२॥

॥अभिध्योपदेशाच्च ॥२३॥

उभयरूपत्वे युक्त्यन्तरमाह अभिध्ये
यं बहु स्यां प्रजायेयेत्यादौ ध्यानपूर्व
रा प्रवृत्तेः कर्तृत्व म्बहु स्यामिति प्रत्य
बपत्वाद्बहुभवनस्योपादानत्वं

॥साक्षाच्चोभयाम्नानात् ॥२४॥

साक्षाद्ब्रह्मैवोपादायप्रभवप्रलययोराम्नानाद
पिप्रकृतित्वं सर्वाणिह वा इमानि भूतानि

...प्रकाशादेवसमुत्पद्यन्ते ...काश ...
...यं तीति यद्यस्माद्भवति तत्तस्योपजनस्यो...
...दान मिति प्रसिद्ध मेव ...दीनाम्...
...दित्याह साक्षादिति ॥२२॥

...आत्मकृतेः परिणामात् ॥२३॥

...नन्तरमाहात्मेति इतश्च ब्रह्म प्रकृतिर्यतः
...दात्मानं स्वयमकुरुतेत्यात्मनः कर्तृत्व कर्मत्व...
...प्रतिपादयति ननु पूर्व सिद्धस्य सतः कथं क्रि...
...माणत्व मत आह परिणामादिति पूर्वसिद्धो...
...विशेष विकारात्मनात्मानं परिणमयामास
...यमित्यनेन निमित्तान्तरान पेक्षत्व बोधना
...नानु... ...दात्मकृति रयवा परिणामादिति एव
...तीच... ...यन्तर सम्पादक मितो पि ब्रह्म प्रकृ...
...कृ... ...न्तराख्य विकारात्मना परिणामः साम्या
...नतम ... रोपेनाम्नायते सच्च त्यच्चाभवन्निरु...
... ...निरुक्तञ्चेत्यादिनेति ॥२३॥

...योनिश्च ...हि गीयते ॥२४॥

...प्रकृति वाचक योनि शब्देन वेदान्ते षु श्रूयते
...योनिः प्रकृतिः यथा कर्तारमीशं पुरुषं ब्रह्मयोनिं । यद्
भूत

यो निष्परिपठ्यन्ति धीरा इति च पथिवी
रोषध्यिवनस्पतीनामिति दृष्टत्वात्
स्यानवचनो पियो निपातो दृष्टः योनी
न्द्र निषदे अकारीत्यादौ च ननु पयो
स्जन्ते गृह्यते चेत्यादिवाक्यशेषात्
वचन एव विस्तरेणाग्रे प्रतिपादयिष्याम
स्माह योनिश्चेति ॥१३४॥

॥एतेन सर्वे व्याख्याता व्याख्याताः ॥१३५॥ई
ईक्षतेर्नाशब्दमित्यादिना प्रधानकारणवाद
चैरेव निराकृतः तत्पक्षस्योपोद्बलकानि
[illegible] दो निश्चापाः ततो मन्दमती [illegible] एव
भान्तीति देवलप्रभृतिभिर्धर्मसूत्रकारैः स
न्थेष्वाश्रिता सपक्षः अतोऽत्यन्तं तत्पक्ष प्र
धे अतीव यत्नः सूत्रकृता कृतः नाणवादि
रणवादप्रतिषेध इति तेऽपि सिद्धान्ते दूषणा
या इत्यतः प्रधानमल्लनिबर्हणन्यायेन
स्य दूषणानि ते [illegible] व्यतिदिशन्ति एते ने
प्रधानकारणवादप्रतिषेधन्यायेन सर्वे
रणवादिकारणवादा प्रतिसिद्धतया व्याख्या
वेदितव्याः तेषामपि प्रधानवद् [illegible] शब्द

योगस्यश्रुतिसम्मतत्वेन तन्मतसिद्धप्रधानस्यका
रणत्वमस्त्वितिदृष्टिकशंकानिरासाय सूत्रमेतेन
तर्कादिस्मरणानीति प्रत्युक्तम् ॥३॥

॥ न विलक्षणत्वादस्य तथात्वं च शब्दात् ॥४॥

स्मृतिनिमित्तमाक्षेपमपरिहृत्य तर्कनिमित्तकं तम्प
रिहरति न विलक्षणत्वादिति पदं ब्रह्मैतत्न ब्रह्मकारणं
एतन्नोपपद्यते यतः जगद्विलक्षणं चेतनं शुद्धं ब्रह्म
जगद्विलक्षणमचेतनमशुद्धभूतं दृश्यते न च विल
क्षणयोः प्रकृतिविकृतिभावो दृष्टः तस्मादचेतनं जग
त्कारणमिति प्राप्ते आह न विलक्षणत्वेति ये ये कार्य
कारणे ते ते सजातीये इति न नियमः गोमयादपि वृश्चिक
शरीरदर्शनात् चेतनपुरुषादचेतननखकेशादीना
न्दृष्टत्वाच्च वेदनिरपेक्षः शुष्कतर्को न कारणत्वेनि
वैतर्कस्तस्माद्ब्रह्मैव कारणम् ॥४॥

॥ अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥५॥

ननु चेतनप्रकृतित्वाज्जगतोपि चेतनत्वं स्यात् अ
त एव मृदब्रवीदापोऽब्रुवन्नित्यादि श्रूयते तहवाच
प्युक्तं त्वे न उत्तरायत्ति तस्माज्जगच्चेतनमिति प्राप्ते
आह अभिमानीति तु शब्दः आशङ्कापनोदार्थः

86

न खल्व मृदब्रवीदित्यादिना जगतश्चेतनत्वमस्मा वित मत्तविश्यति यतोऽयमभिमानीव्यपदेशोऽयमगोपरा कुतः मोक्तृणाम्चेतनत्व मोऽपाना मूर्तेन्द्रियाणामचेतनत्वमिति प्राप्विशेषोक्तः अग्निर्वाग्भूत्वा मुखम्प्राविशदित्यादिना सञ्चायीनादेन सर्वत्राभिमानीव्यञ्जितनादेवता अनुगताः सन्तिः नदादायोपपादनीयम् ॥ ५॥

॥ दृश्यते तु ॥ ६॥

युक्त्यन्तरमाह दृश्यते इति तु शब्दः पूर्वपक्षराडनार्थः यदुक्तं विलक्षणत्वान्न कारणमिति तन्न वहूनां चेतनानां वृश्चिकादीनामचेतनोपयादुत्पत्तिदृश्यते इत्यर्थः ॥ ६॥ ॥

॥ असदितिचेन्न प्रतिषेधमात्रपरत्वात् ॥ ७॥

ननु चेतनादचेतनोत्पत्तिर्यदि तदा पूर्वमसतः कार्यस्यारम्भः स्यादत आह असदिति प्रतिषेधमात्रं हीदं नहि प्रतिषेधस्य प्रतिषेध्यमस्ति नचायमप्रतिषेधः प्रागुत्पत्तेः कार्यसत्त्वं प्रतिषेद्धुं शक्नोति यथेदानीं कारणात्मना कार्यं सदेव प्रागुत्पत्तेरपीति न दोषः नेनु सा न यवमचेतनम्परिच्छिन्नम् ॥ ७॥

॥ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८॥

शुद्धम् न दा अपीतौ न ने सति कारणस्या शुद्धत्वादिप्रसङ्गोऽतोऽसमञ्जसमेतदित्याशङ्क्याहे अपीतावितिः ॥८॥

॥ न तु दृष्टान्तभावात् ॥९॥

समाधत्ते नत्विति दृष्टान्तभावादत्र भवदुक्तम् अशुद्धं कारणं न दूषयतीत्यत्र दृष्टान्तोस्ति यथाघटशरावादयो विकारा विभागावस्थायां पृथ्वावत्र भेदाः सन्तो नाशोत्तरं मृदं न स्वधर्मै दूषयेयु रेवम् अत्रेमाः प्रजाः सति सम्पद्य न विदुरित्यादिश्रुतयोप्युपष्टम्भकतया योजनीयाः ॥९॥

॥ स्वपक्षदोषाच्च ॥१०॥

तवमतेपि इदन्दूषणमस्ति विलक्षणत्वान्नेदं जगत् प्रधानप्रकृतिकं शब्दादिहीनात् प्रधानाच्छब्दादिमतो जगदुत्पत्त्यसम्भवादिति स्वपक्षेऽपिदोषात् तथाकार्यस्य कारणविभागाभ्युपगमान्तद्दपीतावपि प्रसङ्गः समानः तस्मान्नियमः समानमेवकार्यमित्याह स्वपक्षेति ॥१०॥

॥ तर्काप्रतिष्ठानादप्यन्यथानुमेयमितिचेदेवमप्यविमोक्ष प्रसङ्गः ॥११॥

ननु युक्त्या स्वतर्कादिना प्रधानस्य परमाण्वादेर्जगत्कारकत्वमवगतं इत्याशङ्क्य समाधत्ते तर्काप्रतिष्ठानादिति आगमैकगम्येऽर्थे केवलेन तर्केण विरा

सः यतः स्वोत्प्रेक्षामात्रनिबन्धनास्तर्का अप्रतिष्ठि
ताः भवन्ति उत्प्रेक्षायाः निरङ्कुशत्वात् सर्वोत्प्रेक्षाप
एकरूप्याभावात् ननु प्रसिद्धमाहात्म्यस्य कपिल
कणादादेस्तर्काः प्रतिष्ठिता भविष्यन्ति अन्यथा
पदार्थव्यवस्था न स्यात् आर्षं धर्मोपदेशं च वेद
शास्त्राविरोधिना यस्तर्केणानुसन्धत्ते स धर्मं वे
द नेतरः इति स्मृतिरपि तर्कं प्रति [illegible]
इति प्रधानादेः कारणमिति चेत् एवमपि संसार
विमोक्षस्य प्रसङ्गः श्रुतिम्विना कृतस्तर्को अप्रमा
णमेव सर्वेषामैकमत्यासम्भवात् विषयव्यवस्थानु
पपत्तेः अपि च वेदज्ञानस्यैव निर्दुष्टत्वात् सम्यग्
ज्ञानत्वमतो वेदविरुद्धस्य प्रधानकारणत्वादे
स्वीकारे अन्यथाज्ञानात् कस्यापि मोक्षो न स्या
त् तस्माच्छ्रुतिबलान्निर्विवादं ब्रह्मणः कारणत्वम्।

॥ एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥१२॥
वैदिकदर्शनस्य सांख्ययोगादेः प्रत्यासन्नत्वात् कै
श्चिच्छिष्टैः परिगृहीता अपि एते निरस्ताः इदानीं
त्ववैदिकापरिगृहीताः केवलतर्कमूलका अण्वा
दिकारणवादास्तेऽपि एतेन प्रधानकारणता नि
राकरणकारणेन मन्वाद्यपरिगृहीता बाह्याः
प्रतिषिद्धतया व्याख्याताः तुल्ययुक्तेः ॥१२॥

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥१३॥
पुनस्तर्केण ब्रह्मकारणत्वमाक्षिप्य समाधत्ते भोक्त्रा-
त्ति यदि ब्रह्मकारणता न हि लोकप्रसिद्धो यो भोक्ता चे-
तनः शारीरो भोग्यश्च शब्दादिरचेतन इति विभागः
स न स्याज्जो गतः परमकारणाद्ब्रह्मणोऽनन्यत्वादि-
ति प्राप्ते समाधत्ते लोकवत् यथा लोके समुद्राद-
नन्यत्वेऽपि वीचीतरङ्गादेरितरेतरविभागइत-
रेतरसंश्लेषादिव्यवहारस्तद्वच्चात्राप्युपाधिमादाय
भोक्तृभोग्यविभागः सम्भवत्येवेति न दोषः ॥१३॥
॥ तदनन्यत्वमारम्भणशब्दादिभ्यः ॥१४॥
तत्रैवोपपत्तिमाह तदनन्यत्वेति व्यावहारिकभोक्तृ-
भोग्यविभागमङ्गीकृत्य समाहितम् परमार्थतस्तु ना-
यं विभागः यतस्तत्कार्यकारणयोरनन्यत्वमवग-
म्यते वियदादिकार्यं कारणात्परब्रह्मणः परमार्थतो
भिन्नं कुतः आरम्भणशब्दादिभ्यः एकविज्ञानेन स-
र्वविज्ञानं प्रतिज्ञाय दृष्टान्तार्थमुक्तं यथा सोम्यैकेन मृ-
त्पिण्डेन मृदात्मना विज्ञातेन सर्वं घटमयघटश-
रावादि मृदो विशेषा विज्ञातम्भवेत् यतो घटादिवि-
कारो वाचैव घटोऽस्तीत्यारभ्यते न वस्त्वन्तरं नाम-
धेयमात्रं तदनृतं मृदेव वास्तविकोऽर्थः यथाऽ-
स्य व्यतिरेकेण न किमपि कार्यजातमस्ति एवं तदा-

त्मिदं सर्वमित्यादिश्रुतेः नान्यथैकविज्ञानेन स
र्वविज्ञानं घटते अत्र बहुवक्तव्यमपि विस्तरभया
न्नोक्तम् तथाच परमार्थतोऽनन्यत्वं व्यवहारतो
लोकवद्भेदः काल्पनिकः ॥१४॥

॥ भावेचोपलब्धेः ॥१५॥

युक्त्यन्तरमाह भावेचेति मृदादौ [illegible] भावेस
त्येव कार्योपलब्धेरनन्यत्वं न चानियमेना
न्यभावे अन्यस्योपलब्धिर्दृश्यते न ह्यश्वो
गोरन्यः सन् गोभावे एवोपलभ्यते नच वह्नि धू
मयोरपि अनन्यत्वं स्यात् उद्घाते ध्मायमानगोपा
लघुटिकादौ धूमदर्शनात् न नियतावस्थान म
भावेचोपलब्धेरिति वा सूत्रम् न केवलं श्रुतेरे
व कार्यकारणयोरनन्यत्वम् उपलब्धेर्भावाद
पि नहि तन्तुसंस्थाने पटे तन्तुव्यतिरेकेण पटो
नाम कार्यं किंचिदुपलभ्यते आतानवितानव
न्तस्तन्तव एव दृश्यन्ते एवन्तन्तुष्वंशवोऽंशुषु
तदवयवा इति क्रमेण लोहितशुक्लकृष्णानि
रूपाणि तत्र वाय्वाकाशमात्रं चेत्यनुमेयन्ततः प
रं ब्रह्मैवाद्वितीयन्तत्र सर्वप्रमाणानि धाम वो
चाम; ॥१५॥

॥सत्वाच्चावरस्य ॥१६॥

कार्यानोन्यत्वे युक्त्यन्तरमाह सत्वेति यतः प्रागुत्पत्तेः
कारणात्मनैव सत्वमवरकालीनस्य कार्यस्य श्रूयते
सदेव सोम्येदमग्र आसीत् आत्मा वा इदमेकमेवाग्र आसी
दित्यादाविदंशब्दगृहीतस्य कारणेन सामानाधिक
रण्याच्च यदात्मना यन्न वर्तते न तत्तेनोत्पद्यते यथा सि
कताभ्यस्तैलम् तस्मात्प्रागुत्पत्तेरनन्यत्वादुत्पन्नमप्य
नन्यदेव कारणात्कार्यमिति निर्णीयते तथा च कालत्रये
ब्रह्म सत्वेनैव त्रिकाले जगत्कार्यं सत्तातोपि अनन्य
त्वम् ॥ १६ ॥

॥ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषात् ॥ १७ ॥

ननु कथंचित्पूर्वमसत्त्वमपि श्रुतमिति कथमनन्य
त्वं असदेवेदमग्र आसीत् असद्वा इदमग्र आसीदसदेवे
तिसद्व्यपदेशात् न प्रागुत्पत्तेः कार्यसत्वमित्याशङ्क्य समाध
त्ते असदिति नायमत्यन्तासत्वाभिप्रायेणासद्व्यपदेशः किन्तु
व्याकृतनामरूपत्वाद्धर्माद्व्याकृतनामरूपत्वं धर्मान्तरं ते
न रूपेणायमसद्व्यपदेशः प्रागुत्पत्तेः सदेव कार्यं कारणरू
पेणाभिव्यंकृतमेतत् तदात्मानं स्वयमकुरुतेति दर्शनादीपा
धिकमर्त्यं वाक्यशेषादित्यर्थः तस्मादनन्यत्वम् ॥ १७ ॥

॥ युक्तेः शब्दान्तराच्च ॥ १८ ॥

युक्तेः शब्दान्तराच्चानन्यत्वमित्याह युक्तेरिति दधिघटरुच
कार्यार्थिभिः प्रागुत्पत्तेः नियतकारणानि क्षीरमृत्सुवर्णादीनि
उपादीयन्ते नियमेन तदर्थिभिरन्तिका दध्यर्थिभिर्दुग्ध

१ नासदासीदिति

न्नेदसत्कार्य पक्षेनोपपद्यते पूर्वं सर्वस्यासत्वे दुग्धादेव
दधीत्यादिनियमः कथमस्ति तस्मात्कारणस्यात्मभूत
शक्तिः शक्तेश्चात्मभूतं कार्यं किञ्च कार्यकारणयोर्द्रव्यगु
णयोश्चाश्वमहिषवद्भेदबुद्ध्याभावात्तादात्म्य
मङ्गीकार्यं समवायकल्पनेतस्यानित्यत्वानित्यत्वाभ्या
हतत्वात् अतउक्तयुक्त्या नन्यत्वं शब्दान्तरमपि पू
र्वोक्तासच्छब्दान्तरं सदेवसोम्येदमग्रआसीदि
दितत्वेदं शब्दस्य कार्यस्य प्रागुसत्तेः सच्छब्दवा
च्येन कारणेन सामानाधिकरण्यात् ॥१८॥

॥पटवच्च॥१९॥

दृष्टान्तमप्याह पटवदिति यथा संवेष्टितः पटो
नतया गृह्यते किमयं पटो न्यद्वेति प्रसारितं
तद्व्यं पट एवेति अभिव्यज्यते एवं चेतद्भिन्न
मविस्तारादि ग्रहणाग्रहणं न वासत्वा सत्वमव
हारेस्तथा सर्वकार्येषूपाधिकृतमसत्वं सत्वं न मुख्य
मिति भावः॥१९॥

॥यथाचप्राणादि॥२०॥

दृष्टान्तान्तरमाह यथाचेति यथा लोके प्राणापाना
दिप्राणप्रभेदेषु प्राणायामेन निरुद्धेषु कारणमात्र
रूपेण वर्तमानेषु जीवनमात्रं कार्यं निर्वर्त्यते ना
कुञ्चनप्रसारणादि कार्यान्तरं भेदेषु पुनः
तेष्वेवमाण

सत्कार्ये न समर्थ पटइति प्रसारित पिनवि शेषान्या मविस्ता रोगृह्यते प्रकारेण प्रसन्ने प्राणे तथा कार्यात्का रणमन न्यत्

अप्रवृत्तेषु जीवनाधिकमाकुञ्चनादिक्रियाविर्येते नच
भेदवत्
प्राणाभेदानां प्राणान्यत्वं वायुस्वभावाविशेषात् एवं का
र्यस्य कारणादनन्यत्वं अतः सिद्धमेकेन विज्ञानेन सर्वविज्ञा
नमिति ज्ञातम् ॥२०॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥२१॥

पुनश्चेतनकारणत्वमाक्षिपति इतरेति इतरस्य जीवस्य ब
ह्मात्मत्वं व्यपदिशन्ति तत्त्वमसीत्यादिना तत्सृष्ट्वा तदेवानु
प्राविशदिति ब्रह्मणः कार्यानुप्रवेशेन शरीरात्मत्वदर्शनात्
एवञ्च जीवात्मकः परमेश्वर यदि कर्त्ता तदा संसारिणां स्वे
ष्टम्यादिहितं रूप्तो न निर्मिमीते अहितं नरकहेतुमधर्मं
कुतः कुर्यात् इति नहि ज्ञानाकश्चन स्वस्याहितं करोतीति अ
हितस्याकरोतीति तस्मादात्मा न कारणम् इति ॥२१॥

॥ अधिकन्तु भेदनिर्देशात् ॥२२॥

समाधत्ते अधिकन्त्विति यः सर्वज्ञः सर्वशक्तिर्ब्रह्म शारीराद
धिकं, आत्मा द्रष्टव्यः सोऽन्वेष्टव्य प्राज्ञेनात्मारूढ इतिक
र्तृकर्मभेदनिर्देशात् तदेव जगत्कारणं न जीवभावाप
न्नं सर्वज्ञत्वादेव जीवे संसारस्य मिथ्यात्वं स्वस्यानित्यैपत्वं
करणादि
वपश्यति अतो न हिताहितभोक्तृत्वदोषः ॥२२॥

॥ अश्मादिवच्च तदनुपपत्तिः ॥२३॥

अस्मेति यथा पृथिवीत्वसामान्यमपि अश्मनां केचि
न्महार्हा मरकतवज्रादयः मध्यमाः सूर्यकान्तादयो निकृ
ष्टा वायसप्रक्षेपार्हा यथा पृथिवीत्वाविशेषेऽपि प्रयुक्त

कत्वादिवैचित्र्यमुपलभ्यते एवमेवैकस्यापि ब्रह्मणश्चे नमाङ्गरूपकत्वम् कार्यवैचित्र्यञ्चोपपद्यते अतो न तस्य दूषणासक्तिः ॥२३॥

उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥२४॥

लोके कुलालादयो घटादिकं कर्तुं मृद्दण्डचक्रसूत्राद्यनेककारकोपसंहारेण समर्था भवन्ति ब्रह्म त्वसहायं तथापि मतं तस्य साधनान्तरानुपसंग्रहे कथं स्रष्टृत्वं उपपद्येत इत्याशङ्क्य स्वभावविशेषादन्यथा क्षीरजलादि स्वयमेव दधिहिमभावेन परिणमते निरपेक्षं तथा ब्रह्मापि अनुपसंहारेति ॥२४॥

॥देवादिवदपि लोके ॥२५॥

ननु क्षीराद्यचेतनानां निरपेक्षसाधनत्वं न तु कुलालादिवच्चेतनस्य ब्रह्मण इत्याशङ्कायामाह देवादीति यथा चेतनाअपि देवपितृऋष्यादयो महाप्रभावाः अनपेक्षैव किञ्चिद्ध्यानमात्रेण नानाशरीरप्रासादादीनि निर्माणोपकरणं ते यथोर्णनाभिः स्वयमेव तन्तून् बलाकाचानेनैव गर्भं सृजन्ति तद्वदिति ॥२५॥

॥कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥२६॥

ब्रह्म जगत्कारणमिति स्थिति परिशुद्धये पुनराक्षिपति कृत्स्नेति निरवयवत्वात् कृत्स्नस्य ब्रह्मणः कार्यरूपेण परिणामः प्राप्नोति यदि सावयवं तदा घटादिव्यादि

वदेकदेशे परिणामो भवेत् न चासति निरवयवत्व प्रतिपादकशब्दानां निर्गुणं निष्क्रियं शान्तं इत्यादीनां कोपोऽप्रामाण्यस्यात् ॥२६॥

॥श्रुतेस्तु शब्दमूलत्वात् ॥२७॥

तु शब्दो व्यावृत्त्यर्थः नायमाक्षेपः श्रुतेः यथैव ब्रह्मणो जगदुत्पत्तिः श्रूयते एवं विकारव्यतिरेकेणापि ब्रह्मावस्थितिः श्रूयते प्रकृति विकारयोर्भेदेन व्यपदेशात् अनेन जीवेनात्मनानुप्रविश्येति तावानस्य महिमा ततो ज्यायांश्च पूरुषः इति हृदयायतनत्व वचनाच्च यदि कृत्स्न परिणामः तर्हि सता सोम्य तदा सम्पन्नो भवतीत्यनुपपन्नं स्यात् अविकृतस्याभावात् तस्मात् अस्त्येव अविकृतं ब्रह्म अतोऽकृत्स्नप्रसक्तिः निरवयवत्वं च श्रुतिबलादुपपादनीयम् तथा मणिमन्त्रौषधिप्रभृतीनां विचित्रकार्यविषयाशक्तयो दृश्यन्ते तद्वत् चिन्त्यशक्तित्वात्सर्वमुपपन्नं यथाह अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेत् प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणं तस्मान्मायाकल्पितभेदेन सर्वमुपपादनीयम् ॥२७॥

॥आत्मनि चैवं विचित्राश्च हि ॥२८॥

अपि च नात्र विवादशंका स्मिन्ब्रह्मणि स्वरूपानुपमर्देनैवानेकाकारा सृष्टिः सम्भविष्यति यथैकस्मिन्नात्मनि स्वप्ने स्वरूपानुपमर्देनैव रथाः पन्थानः सृज्यन्ते मायाविप्रभृतिः स्वरूपानुपमर्देन हस्त्यश्वादि तथैवैकात्मनि नाना सृष्टिः स्वरूपानुपमर्देन भविष्यति इत्याह आत्मनीति ॥२८॥

॥ स्वपक्षदोषाच्च ॥२९॥

परेषामपि निरवयवादि प्रधानं सावयवकार्यं उत्पा
दयति तत्रापि कृत्स्नप्रसक्तिर्निरवयवत्व श्रुतिकोपा
दयो दोषाः सन्त्येवेति नत्वयामतिसेप्तव्यम् दोषसाम्या
त् इत्याह स्वपक्षेति ॥२९॥

॥ सर्वोपेता च तद्दर्शनात् ॥३०॥

एकस्यापि विचित्रशक्तियोगाद्विचित्रकार्यजनकत्वं
इत्युक्तं तत्कथमवगम्यते तत्राह सर्वेति सर्वशक्तियु
ता च परादेवतेति कुतः तद्दर्शनात् सर्वकर्मा सर्वकामः
सर्वगन्धः सर्वरसः यः सर्वज्ञः ससर्ववित् एतस्य वाअ
क्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः इति ॥

॥ विकरणत्वान्नेति चेत्तदुक्तम् ॥३१॥

ननु अवस्तु एकमद्वितीयं सर्वागमनं इति श्रुतेः प्रति
सिद्धसर्वविशेषायाः देवतायाः कथमनेकत्वमिति
चेत्तत्र पूर्वमेव समाधानमुक्तं श्रुत्यैवेदं प्रति गम्यो
ऽर्थः ग्राह्यं नैवविद्याकल्पितरूपभेदोपन्यासेनोक्त
मेव तथाहि अपाणिपादो जवनो ग्रहीता इत्यादिना
सर्वसामर्थ्ययोगस्य दर्शितत्वात् इत्याह विकरणेति ॥३१॥

॥ न प्रयोजनवत्वात् ॥३२॥

पुनराक्षिपति नेति परात्मा इदं जगत् रचयितुं
नार्हतीति कुतः सर्वप्रवृत्तीनां प्रयोजनवत्वात्
सर्वपरितृप्तस्य प्रयोजनाभावात् कथं जगत्करणे
प्रवृत्तिरतो न चेतनः कर्तेति ॥३२॥

निषिद्धसर्वविशेषस्यापि ब्रह्मणः सर्वशक्तियोगसम्भवतोऽस्यत दृष्ट ८

॥लोकवत्तु लीलाकैवल्यम् ॥३३॥

समाधत्ते लोकवदिति यथा कस्यचिदाप्तैषणस्य राज्ञो राजामात्यस्य वा किञ्चित्प्रयोजनमनभिसन्धाय केवलं लीलारूपाः प्रवृत्तयः क्रीडाविहारेषु भवन्ति यथोच्छ्वासप्रश्वासादयोऽनभिसन्धाय प्रयोजनं स्वभावादेव एवमीश्वरस्याप्यनपेक्ष्य प्रयोजनान्तरं स्वभावादेव केवलं लीलारूपा प्रवृत्तिर्भविष्यति नहीश्वरस्य प्रयोजनं न्यायतः श्रुतितो वा सम्भवति आप्तकामश्रुतेर्नो प्रवृत्तिः सर्वज्ञत्वात् ॥३३॥

॥वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति ॥३४॥

पुनर्दोषमाशङ्क्य स्थूणानिखनन्यायेनेश्वरस्य कारणत्वमाक्षिप्य समाधत्ते नेश्वरो जगत्कारणं स हि देवादीनत्यन्तसुखभाजः करोति मनुष्यादीन्मध्यमभोगभाजः पश्वादीनत्यन्तदुःखभाजः करोति एवं स विषमसृष्टिं कुर्वतो रागद्वेषवत्त्वं श्रुत्यादिसिद्धस्वच्छत्वविलोपः दुःखदानात्प्रजासंहारादतिक्रूरत्वं नैर्घृण्यं वैषम्यञ्च स्यात् न चैतत्सम्भवति तस्मान्न कारणमिति प्राप्ते आह न सापेक्षत्वात् धर्माधर्मादिसापेक्षत्वात् तथा तयोर्न्यायात् विषमा इति सृज्यमानप्राणिधर्मानुसरणात् ईश्वरस्तु साधारणकारणं पर्जन्यवत् असाधारणं धर्मादिकं अपेक्षते तत्र किम्प्रमाणमिति चेच्छ्रुतिः तथा हि दर्शयति एष ह्येव साधु कर्म कारयति यमेभ्यो लोकेभ्य

उन्निनीषते पुरायं न पुरायो भवति पापः पापेनेति सृष्टिरपि वैषम्यमापद्यन्त इत्यादि ॥ ३४ ॥

॥ न कर्माविभागादिति चेन्नानादित्वात् ॥ ३५ ॥

सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं इति प्राक् सृष्टेर विभागावधारणात् सृष्टेरुत्तरं विभागापेक्षं कर्म कर्मापेक्ष्य विभागइत्यन्योन्याश्रयात् अतो विभागादूर्ध्वं कर्मापेक्ष ईश्वरः प्रवर्ततां प्राग्विभागात् वैचित्र्यकारिकर्मणोऽभावात् तुल्यैवाद्यासृष्टिः स्यात् इत्याशंक्याह न कर्मेति अनादित्वात् संसारस्य बीजाङ्कुरवत् ॥ ३५ ॥ अनादित्वं कुत इत्याह उपपद्यते ति

आदिमत्वे संसारस्याकस्मिकत्वापत्ते मुक्तानामपि संसारोन्मज्जनप्रसङ्ग इत्युपपत्तिः सत्तावपि संसारस्यानादित्वमुपलभ्यते न रूपमस्येह तथोपलभ्यते नान्तोनचादिर्नचसम्प्रतिष्ठा पुराणे चानादित्वं संसारस्योक्तम् ॥ ३६ ॥

उपपद्यते चाप्युपलभ्यते च ॥ ३६ ॥

॥ सर्वधर्मोपपत्तेश्च ॥ ३७ ॥ इति द्वितीयस्य प्रथमः पादः

स्वपक्षं उपसंहरन् ब्रह्मणोकारणत्वमहिमाणा दर्शितप्रकारेण सर्वमुपपद्यते सर्वज्ञं सर्वशक्ति महामायं च तद्ब्रह्मेति तस्मान्निर्दुष्टं औपनिषदं जगत्कर्तृत्वं ईश्वरस्येत्याह सर्वधर्मेति ॥ ३७ ॥ इति ब्रह्मसूत्रतात्पर्यविवरणे द्वितीयस्याविरोधाध्यायस्य प्र॰ पादः ॥

॥ रचनानुपपत्तेश्च नानुमानम् ॥ ३८ ॥ १ ॥

प्रधानादावपि सर्वज्ञब्रह्मधर्मोपपत्तिमाशङ्क्य निराच
ष्टे रचनानुपपत्तेश्चेति यद्यपि परपक्षनिराकरणम
युक्तम् तथापि तेन विना निःसन्दिग्धब्रह्मनिर्णया
नुपपत्तेस्तर्कपादे सांख्यादिदर्शनानि निराक्रिय
न्ते ईक्षतेर्नाशब्दमित्यादिना निराकृतमेव त-
थाप्यनस्वतन्त्र युक्तिप्रतिषेधार्थो विचारः न-
नु यथा घटादयो मृदात्मतया(तया)ऽन्वीयमाना मृ-
त्सामान्यपूर्वका लोके दृष्टास्तथा सर्वे बाह्याध्या
त्मिका भेदाः सुखदुःखमोहात्मकतयाऽन्वीयमानाः
सुखदुःखमोहात्मकसामान्यात्मकप्रधानपूर्वका
इति परिणामादिभिर्लिङ्गैस्तदेव प्रधानमनुमेयं
मित्याक्षेपे समाधानमाह यदि दृष्टान्तवलेनैत-
द्दृश्यते तर्हि नाचेतनं चेतनानधिष्ठितं किञ्चिद्वि
जातीयपुरुषार्थनिर्वर्तनसमर्थविकारोत्पादकं
दृष्टं लोके प्रज्ञावद्भिः कुलालैः शिल्पिभिर्विजा
तीया व्यवच प्रासादादयः सुखदुःखमोहस्वभावाः र
चितास्तथेदं जगत् नानाकर्मफलभोगयोग्यम्
बाह्याध्यात्मिकं शरीराद्यन्वितं प्रज्ञावद्भिः शिल्पि
भिर्मनसापि अशक्यालोचनं कथमप्रधानमचेतनं
रचयेत् कुम्भकारादिचेतनाधिष्ठितकुम्भादिर्वनावत्

तस्माच्चेतनम्विना रचनानुपपत्तेर्जगत्कारणत्व-
ह्न चकारेणाहेत्वसिद्धिसमुच्चयः ॥३८॥

॥प्रवृत्तेश्च॥३९॥

युक्त्यन्तरमाह प्रवृत्तेश्चेति सर्गदूर्नूं या प्रवृत्तिः
प्रधानस्य साम्यावस्यातः प्रच्युतिः गुणानामङ्गा
ङ्गिभावापत्तिः सापि चेतनम्विनान सम्भवति अ
तः प्रवृत्तेश्च चेतनमेव कारणं चेतनाधिष्ठितर
थगत्यादिवत् नच प्रवृत्तिरहितात्मनः कथं
परप्रवर्तकत्वं अयस्कान्तवत् रूपादेवच्चस्व
यमप्रवृत्तमपि अयसश्चक्षुरादीनाञ्च प्रवर्तक
त्वं तथा प्रवृत्तिरहितोपि ईश्वरः सर्वगतः सर्वात्मा
सर्वज्ञः सर्वशक्तिः सन् प्रवर्तयेत् अतः ॥३९॥

॥ पयोम्बुवच्चेत्तत्रापि ॥४०॥

यथास्वतएव वत्सविवृद्धये क्षीरम्प्रवर्तते यथा
वाम्बुघजलं स्वतएव लोकोपकाराय प्रवर्तते त
थास्वयमेवाचेतनं प्रधानं प्रवर्तेत इत्याशङ्का
तत्रापि चेतनगवादेः स्नेहेच्छया पयः प्रवर्तकत्वं
एवं जलं निम्नभूम्याद्यपेक्षमेव स्यन्दते इति

समाधत्ते पयइति ॥४०॥

॥व्यतिरेकानवस्थितेश्चानपेक्षत्वात्॥४१॥
युक्त्यन्तरमाह व्यतिरेकेति गुणत्रयसाम्यावस्थात्मकप्रधानस्य किञ्चिदन्यदपेक्षितं मन स्थितं न दृष्टं पुरुषस्तु उदासीन इति अनपेक्षम्प्रधानं तस्माच्च कदाचित महदाद्याकारेण परिणमते कदाचिन्नेति व्यतिरेकः स्यात् एतदसम्भवी ईश्वरस्तु सर्वज्ञत्वात् महामायत्वाच्च प्रवृत्त्यप्रवृत्ती न विरुध्येते ॥४१॥

॥अन्यत्राभावाच्च न तृणादिवत् ॥४२॥
ननु यथा तृणजलादि स्वभावादेव क्षीरादिरूपेण परिणमते तथा प्रधानमपि स्यात् इत्याशङ्क्य तत्रापि धेन्वोपयुक्तं तृणादि क्षीरम्भवति न प्रहीणमनुपयुक्तं वा धेन्वा सम्बन्धि इति तत्रापि चेतनाधिष्ठितत्वमित्याह अन्यत्रेति॥४२॥

॥अभ्युपगमेऽप्यर्थाभावात् ॥४३॥
ननु यदृच्छया स्वाभाविकी प्रधानप्रवृत्तिरभ्युपगम्यत इति चेत्तथा सति यथा सहकारिणं नापेक्षते तर्हि प्रयोजनमपि नापेक्षतेति प्रधानम्पुरुषार्थस्य साधनं इति तव प्रतिज्ञाभङ्गः स्यात् तथा च बन्धमोक्षव्यवस्था न स्यात् तस्मात्प्रधानस्य न जगत्प्रवर्त्तकत्वमित्याह अभ्युपगमेपीति॥४३॥

॥पुरुषाश्मवदितिचेत्तथापि॥४४॥

ननुयथादर्शनशक्तिसहितः प्रवृत्तिशक्तिरहितः कश्चि
त्पुरुषः पंगुः अपरम्प्रवृत्तिशक्तिसम्पन्नं दृक्शक्ति
रहितमंधं पुरुषमधिष्ठाय प्रवर्त्तयति अयस्का
न्तः स्वयमप्रवर्त्तमानोऽयः प्रवर्त्तयति एवम्पुरुषः
प्रधानम्प्रवर्त्तयिष्यतीतिशङ्कायां समाधत्ते पुरु
षेति तथापिनैवदोषपरिहारः अभ्युपेतहानदोषा
त् तथाप्रधानस्य स्वतन्त्रप्रवृत्त्यभ्युपगमात् क
थम्वोदासीनः पुरुषः प्रवर्त्तयेत् पंगुरन्धम्वागादि
भिः प्रवर्त्तयतिनैव म्पुरुषस्य कश्चिद्व्यापारः नि
ष्क्रियत्वान्निर्गुणत्वाच्च नापिसंनिधानमात्रेणा
यस्कान्तवत्प्रवर्त्तकः संनिधिनित्यत्वेन प्रवृत्तिनि
त्यत्वप्रसङ्गात् प्रकृतिपुरुषाभ्यामन्तरीयस्य स
म्बन्धुरभावात् योग्यताया अप्यनुच्छेदादनिर्मोक्षप
रमात्मनस्तु स्वरूपतऔदासीन्यंमायाव्यापाराश्च
यंप्रवर्त्तकत्वमित्यस्त्यतिशयः॥४४॥

॥अङ्गित्वानुपपत्तेश्च॥४५॥

युक्त्यन्तरमाह अङ्गित्वेति गुणानयस्य मिथोगुण
गुणिभावमुत्सृज्य साम्यस्वरूपमात्रेणावस्थानं
प्रधानावस्था तस्यां स्वस्वरूपनाशभयान्मिथोङ्ग
ङ्गिभावानुपपत्तेरन्यस्य क्षोभयितुरभावात् गुण
वैषम्यनिमित्तो महदाद्युत्पादो न स्यात्॥४५॥

॥अन्यथानुमितौ च ज्ञशक्तिवियोगात्॥४६॥

ननु कार्यवशेन साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणाऽवतिष्ठन्ति इत्यन्यथानुमीयते इत्याशङ्कैवं मपि प्रधानस्य ज्ञानशक्तिवियोगाद्रचनानुपपत्तिः स्वतः प्रवृत्त्यनुपपत्त्यादयः पूर्वोक्ता दोषाः तदवस्था एव ज्ञशक्त्यानुमाने तु चेतनमेकं अनेकप्रपञ्चस्योपादानमिति ब्रह्मवादप्रसङ्गः साम्यावस्थायां निमित्ताभावान्नैव वैषम्यं भावेन सर्वदैव वैषम्यमित्यपि दोषः॥८६॥

॥विप्रतिषेधाच्चासमञ्जसम्॥८७॥

परस्परविरोधादप्यसमञ्जसं सांख्यदर्शनं इत्याह विप्रतिषेधेति क्वचित्सप्तेन्द्रियाणि क्वचिदेकादशतथा क्वचिदहङ्कारात्क्वचिन्महतः पञ्चतन्मात्रोत्पत्तिः एवं क्वचित्त्रिरायन्तःकरणानि क्वचिदेकैवं वर्णयन्ति इति प्रसिद्ध एव ईश्वरकारणवादिश्रुतिस्मृतिविरोधः तस्मादयुक्तं सांख्यदर्शनम्॥८७॥

॥महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्॥८८॥ २ अ.

एवं प्रधानवादं निराकृत्य अणव्यादिकारणवादं निराकर्तुं स्वपक्षे तदुक्तं दोषं निराकरोति महद्दीर्घेति यथा शुक्लेभ्यः शुक्लोऽवयवी ह्यामेभ्यो ऽणुभ्योऽवयवी ह्यामएव तथा च सजातीयात् सजातीयमेवोत्पद्यते इति नियमात् कथञ्चेतनादचेतनं जगदित्याक्षेपे नायं नियमः परमाणवः पारिमाण्डल्ययुक्ताः न त्वणुह्रस्वपरिमाणा इति अह्रस्वानणुभ्यां अणुह्रस्वपरिमाणं द्व्यणुकं जायते तथा ह्रस्वाणुपरिमाणं यन्महद्दीर्घ

परिमाणरहितं द्व्यणुकं तादृशेभ्यस्त्रिभ्यो द्व्यणुके-
भ्यो दीर्घपरिमाणमणुह्रस्वपरिमाणरहितं त्र्यणु-
कं एवञ्चेतनादप्यचेतन मित्यर्थः ॥४८॥

॥उभयथापि न कर्मातस्तदभावः॥ ४९॥
कारणादादिमतप्रसिद्धाणुकारणवादं दूषयति उ-
भयथेति सर्गादौ तन्नैरपादृष्टवशात् परमाणुषु
परस्परसंयोगजनकं कर्म ततो विभागादिक्रमेण
द्व्यणुकादि एवमग्रेपि अन्त्यावयविपर्यन्तं कार्यं
सम्भवतीत्युक्तियन्तत्र विभक्तानस्थायां अणूनां सं-
योगः कर्मापेक्षः कर्मणश्च जन्यत्वान्निमित्तं कि-
ञ्चिदभ्युपगन्तव्यं अनभ्युपगमे कारणाभावा-
न्नाणुषु कर्मस्यात् अभ्युपगमे प्रयत्नोभिघा-
तादिर्वा भवेत् तच्च न सम्भवति तदानीमश-
रीरस्यात्मनः प्रयत्नाभावात् एवमभिघातादय-
पि न तज्जनक क्रियाद्यभावात् उभयथापि न
कर्म अतोणोरणु संयोगाभावः अदृष्टं नि-
मित्तमिति न तदात्मसमवेतं अणुसमवेतं वोभय-
थापि न निमित्तं तस्याचेतनत्वात् नत्वचेतनं
प्रवर्तते प्रवर्तयतिवाइत्युक्तमप्राक् अदृष्टवत्
रुषसंयोगो निमित्त मित्यपि न सम्बन्धसातत्ये
न प्रवृत्तिसातत्यप्रसङ्गात् तस्मात्कर्मनिमित्त
स्याभावान्नाणुकर्म न तु संयोगादि द्व्यणुकादि
कार्यं किञ्च एष संयोगः सर्वात्मना एकदेशे
न वा आद्ये उपचयानुपपत्तेः निरवयवयोः सं

योगादर्शनाच्च अन्ते सावयवत्वप्रसङ्गात् एवम्प्र
लयेऽपि विभागार्थं नाणुकर्म निमित्ताभावात् तदु
भयथा सर्गप्रलययोरनुपपत्तिः नात्र परमाणूनां हे
तुत्वम् ॥४९॥

॥समवायाभ्युपगमाच्च साम्यादनवस्थितेः॥५०॥

एवमरब्धोर्द्व्यणुकं समवेतमिति समवायस्तयोरतिरिक्त
इति तवानुमतं तत्र तयोः सति अतिरिक्तसमवायस्या
प्यतिरिक्तेनैव सम्बन्धेन स्थितिरित्यत्यन्तभेदस्य
समानत्वात् तस्याप्यतिरिक्त इत्यनवस्थास्यादित्या
ह समवायेति ॥५०॥

॥नित्यमेव च भावात् ॥५१॥

किञ्चाणवः प्रवृत्तिस्वभावा निवृत्तिस्वभावा उभय
स्वभावा अनुभयस्वभावा इति चतुर्धापि नोपपद्यते
आद्ये नित्यमेवप्रवृत्तेः प्रलयाभावप्रसङ्गः द्वितीये
सर्गाभावप्रसङ्गः तृतीये विरुद्धत्वात् चतुर्थेऽपि न अ
दृष्टादेर्निमित्तस्य तन्त्रत्वे नित्यसंन्निधानान्नित्यं
प्रवृत्तिप्रसंगोऽतन्त्रत्वे नित्यमवृत्ति (प्रवृत्ति) प्रसङ्ग
तस्मादपि नाणुवाद इत्याह नित्यमेवेति ॥५१॥

॥रूपादिमत्वाच्च विपर्ययो दर्शनात् ॥५२॥

हेत्वन्तरमाह रूपादीति रूपादिमन्तः परमाणवः रूपादि
मतां भौतिकानामारम्भका नित्या दृष्टा इति वैशेषिकान-

दृन्तितर्ह्यप्रसङ्गे नेरूपादिमत्त्वात्परमाणूनामणुत्वनित्य
त्वविपर्ययः परमकारणापेक्षयास्थूलत्वमनित्यत्वञ्च
प्रसज्येतेत्यर्थः कुत इति चेत् यद्बिलोके रूपादिमद्वस्तु
तत्स्वकारणापेक्षयास्थूलमनित्यञ्चेति दर्शनात् घट
स्तन्तूनपेक्ष्य स्थूलोऽनित्यश्च तन्तवोंऽश्वपेक्षया नचा
प्रत्यक्षरूपादिमद्यत्तन्नित्यमिति द्व्यणुकादीनामपिनि
त्यत्वापत्तेः ॥५२॥

॥उभयथा च दोषात् ॥५३॥

यथा गन्धरसरूपस्पर्शगुणका स्थूला पृथ्वी सूक्ष्मा आ
पः रूपस्पर्शगुणं तेजस्ततः सूक्ष्मम् स्पर्शमात्रगुणो वा
युः सूक्ष्मतम इत्येवं चत्वारि भूतान्युपचितापचितगु
णानि स्थूलसूक्ष्मतारतम्योपेतानि च लोके दृश्यन्ते त
द्वत्परमाणवोऽप्युपचितापचितगुणाः कल्प्येरन् वा
उभयथापि दोषोऽपरिहार्य एव उपचितापचितगुणा
नां मूर्त्युपचयादपरमाणुत्वप्रसङ्गः नचान्तरेण मू
र्त्युपचयं गुणोपचयो भवति कार्यद्रव्यगुणोपचये
द्रव्योपचयदर्शनात् नेवूपचित(पचित)गुणत्वानङ्गीकारे
परमाणुत्वसाम्याय यदि एकैकगुणा एवेत्युप
गमे तेजआदिषु स्पर्शादीनामनुपलब्धिप्रसङ्गः
कार्यगुणानाङ्कारणगुणपूर्वकत्वात् यदि सर्वे च

नुर्गुणास्तदाऽप्यपि गन्धोपलम्भापत्तिः नचैतदनुभवा रूढं तस्मादपि न परमाणुकारणवाद इत्याह उभयथेति॥५३॥

॥अपरिग्रहाच्चात्यन्तमनपेक्षा॥५४॥

युक्त्यन्तरमाह अपरिग्रहादिति प्रधानकारणवादो वैदिकैर्मन्वादिभिः सत्कार्यत्वाद्यंशोपजीवनाय निबद्धः ननु परमाणुकारणवादोऽङ्गीकृतसैरियन्तानादरणीयो वैदविद्भिः किन्तु विनाप्यवयवसंयोगं क्षीरजलादिभ्यो दधिहिमादिकार्यारम्भदर्शनात् असारतरतर्कावलम्बनं ईश्वरादिकारणवादिश्रुतिविरुद्धश्चेति नतरां श्रेयोर्थिभिर्विश्वसनीयमिति वाक्यशेषः॥५४॥

॥समुदाय उभयहेतुकेऽपि तदप्राप्तिः॥५५॥ ४ अ॰

एवमर्धवैनाशिकतार्किकादीन्दूषयित्वा प्रसङ्गात्सर्ववैनाशिकबौद्धादीन्दूषयति समुदाय इति सर्ववैनाशिकास्त्रयः सर्वास्तित्ववादिनः विज्ञानमात्रास्तित्ववादिनः सर्वशून्यवादिनश्चात्राद्यानाम्भूतभौतिकचित्तचैत्तं वस्तु बाह्याभ्यन्तरभेदेन द्वेधा इति भूतम्पृथिव्यादयः भौतिकं चक्षुरादयो रूपादयश्च पृथिव्यादिपरमाणवः खरस्नेहोष्णेरण स्वभावास्ते पृथिव्यादिभावेन संहन्यन्ते इति मतं द्वितीया रूपस्कन्धो विज्ञानस्कन्धो वेदनास्कन्धः संज्ञास्कन्धः संस्कारस्कन्ध इतीत्यध्यात्मं सर्वव्यवहारास्पदभावेन संहन्यन्ते इति मतं तद्दूषणं योयमुभयहेतुक उभयप्रकार

चित्तसं...
...

समुदायः अणुहेतुकः स्कन्धहेतुकश्च तादृशेऽङ्गीकृय
मारोतदप्राप्तिः समुदायभावानुपपत्तिः स्यात् समुदायि
नामचेतनत्वात् चित्ताभिज्वलनस्य च समुदायसि
द्ध्यधीनत्वात् अन्यस्य च स्थिरस्य कस्यचिच्चेतनस्य
भोक्तुः प्रशास्तुर्वा संहन्तुरभावात् निरपेक्षप्रवृत्त्युपगमे
च प्रवृत्त्यनुपरमापत्तेः आशयस्याऽन्यत्वानन्यत्वाभ्यां
दुर्निरूप्यत्वात् क्षणिकत्वेन निर्व्यापारत्वात् प्रवृत्त्य
नुपपत्तिरतः समुदायानुपपत्त्या तदाश्रयालोकयात्रा
नुपपत्तिरिति भावः ॥५५॥

आलय विज्ञानसन्तानस्य आलय विज्ञानस्य

॥ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् ॥५६॥
ननु तिरिक्तस्य संहन्तुरभावेपि अविद्यास्मितादयः पर
स्परकारणभूताः सन्तो लोकयात्रां विधास्यन्तीति स
र्वेषां सौगतादीनां मतं तेषु मिथो निमित्तनैमित्तिकभा
वेन घटीयन्त्रवदनिशमावर्तमानेषु अर्थाक्षिप्तः उपपन्नः
संघात इत्याशंकां दूषयति इतरेतरेति तत्र इतरेतर
निमित्तत्वात् सङ्घात उपपद्येत यदि तन्निमित्तमतिरिक्तं
स्यात् न तु तदस्ति यदि अविद्यादयः संघातं विना अल
ब्धात्मनः संघातमपेक्षन्ते तर्हि तस्य निमित्तं वाच्यम
त्त्वारम्भवादेष्विव क्षणिकवादेऽपि किञ्चिदतिरिक्त
न्त्वया समुदायनिमित्तं नाङ्गीक्रियते अथ संघातात्सं
घात इत्यनाद्यनवस्थास्तु इति चेत्तर्हि पूर्वसमुदायात्स
जातीय एव संघातः स्यात् तथा च पुद्गलस्य मनुष्यदे
वतिर्यग्योनिनारकप्राप्त्यभावः स्यात् सजातीयानियमे

मनुष्य एव कदाचिद्भुस्यादि देवो वा मनुष्यो वा स्यात् उभयमप्य
नुभववाधितं अपि च यदर्थं संघातः स स्थिरो भोक्ता नास्त्येनेति
भोगो भोगार्थ एवेति नान्येन प्रार्थनीयः तथा मोक्षो मोक्षार्थ एवेति
मुमुक्षुणा नान्येन भवितव्यम् अन्येन चेत्प्रार्थनीयस्तदा भोगकाला [मोक्ष]
वस्थायिना भवितव्यम् अवस्थायित्वे क्षणिकाभ्युपगमविरोधः त
स्मात्संघातो नैव सिध्यतीति भावः ॥ ५६ ॥

॥ उत्तरोत्पादे च पूर्वनिरोधात् ॥ ५७ ॥

अविद्यादीनामुत्पत्तिमात्रनिमित्तत्वान्न संघातसिद्धिरस्तीत्यु
क्तं तदुत्पत्तिमात्रनिमित्तत्वमपि न सम्भवतीत्युच्यते उत्तरेति
क्षणिकत्ववादिना हि उत्तरक्षणे उत्पद्यमाने पूर्वक्षणो निरुध्यते
इत्यङ्गी क्रियते एवं सति पूर्वोत्तरक्षणयोर्हेतुफलभावः कथं
अपि नेष्टाकान्ते वक्तुं निरुद्धस्य निरुद्धमानस्य वा पूर्वक्षणस्याभा
वग्रस्तत्वात् उत्तरक्षणहेतुत्वानुपपत्तेः यदि निष्पन्नावस्थः पूर्व
क्षणो हेतुरिति तु न भावभूतस्य पुनर्व्यापारकल्पनायां क्षणान्तर
सम्बन्धप्रसङ्गात् क्षणिकत्वादुपरमेण प्रकारान्तरं न सम्भवति
तस्मादसङ्गतं सौगतादिमतम् ॥ ५७ ॥

॥ असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥ ५८ ॥

अहेतुका सहेतुका वोत्पत्तिरिति विकल्प्याद्यं दूषयति असती
ति तथा सति तव प्रतिज्ञाविरोधः चतुर्विधहेतून्प्रतीत्य चित्तचैत्ता
उत्पद्यन्ते इति अस्या उपरोधात् सर्वं सर्वत्रोत्पद्येत पूर्वक्षणः
यावदुत्तरोत्पत्तिमनुवर्तेत तदा फलहेत्वोर्यौगपद्यं स्यात् स
र्वक्षणिकत्वप्रतिज्ञाविरोधः ॥ ५८ ॥

110

॥प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥५९॥

अपिच वैनाशिकाः बुद्धिबोध्यमत्रयादन्यत् संस्कृतं क्षणि
कञ्चेति अयं प्रतिसंख्याप्रतिसंख्यानिरोधावाकाशञ्चेत्यङ्गी
कुर्वन्ति त्रयमप्यवस्तुभूतं निरुपाख्यमिति मन्यन्ते अभा
वमात्रं तत्राकाशं परस्तात्प्रत्याख्यास्यति निरोधद्वयम
त्र प्रत्याख्यायते प्रतिसंख्याऽप्रतिसंख्यानिरोधयोर
प्राप्तिरसम्भवः कुतः अविच्छेदात् यौ निरोधौ सन्तानगो
चरौ भावगोचरौ वा नाद्यः सर्वसन्तानेषु सन्तानिना
मविच्छेदेन हेतुफलभावेन सन्तानविच्छेदासम्भवा
त् न द्वितीयः नहि भावानां निरन्वयो निरुपाख्यो विना
शः सम्भवति सर्वास्वप्यवस्थासु प्रत्यभिज्ञानादन्वयाविच्छेदद
र्शनात् दृष्टान्वयाविच्छेदेनान्यत्रापि तथानुमानात् त
स्मात्परिकल्पित निरोधद्वयस्यानुपपत्तिः ॥५९॥

॥उभयथा च दोषात् ॥६०॥

^प्रतिसंख्यानिरोधान्तःपातो

याऽयं विद्याविद्यानिरोधः परकल्पितः स सपरिकर
सम्यग्ज्ञानात् स्वयमेव वा प्रथमे निर्हेतुकविनाशाभ्यु
पगमहानिः द्वितीये मार्गोपदेशानर्थक्यप्रसंगः एवमु
भयथापि दोषात् ॥६०॥

॥आकाशे चाविशेषात् ॥६१॥

यदपि निरोधद्वयं गगनञ्च निरुपाख्यं त्रितत्र निरो
धद्वयस्य निरुपाख्यत्वं निराकृतं आकाशस्य निरुपा
ख्यत्वं निराकरोति आकाशेति पूर्ववद्वस्तुत्वं प्रतिप

त्तरविशेषात् आत्मन आकाशः सम्भूत इति श्रुत्या शब्दादि
गुणहेतुकानुमानेन वा तत्सिद्धेर्निरूपाख्यं आवरणाभा
वमात्रं तत् अभावमात्ररूपत्वे एकस्मिन् सुपर्णे पतति
आवरणस्य सत्त्वात् सुपर्णान्तरस्योत्पित्सतो निरवकाश
त्वप्रसङ्गः यत्रावरणाभावः तत्र पतिष्यतीति चेत् यत्तद्
येन वस्तुभूत आकाश एव नावरणाभावमात्रं किञ्च सौगतशास्त्रे
भगवः पृथिवी किं संनिश्रया इत्यादिना उपक्रम्य वायुराकाशसन्नि
श्रय इत्युक्तं तदाकाशस्य वस्तुत्वे एव तत्सम्भवं स्यात् एवम
न्यदपि दूषणं बोद्धव्यम् ॥ ६१॥

॥ अनुस्मृतेश्च ॥ ६२॥

अपि च सर्वस्य क्षणिकताभ्युपगमे उपलब्धिमनुस्मृत्यनुप
पत्तिः अनुभवस्मरणयोरेककर्तृकत्वात् तदनुभवितुरात्म
नो नष्टत्वात् स्मर्तुरस्थायित्वात् कथं वा अहमदोऽद्राक्षमिद
म्पश्यामीति च पूर्वोत्तरदर्शिन्येकस्मिन् प्रतिपत्तिर्भवेत् यदा
न्यः कर्तास्यात् तदाऽहं स्मरामि अन्योऽद्राक्षीत् इत्यापत्तिः
अहमदोऽद्राक्षमिति दर्शनस्मरणयोरात्मानमेकं वैनाशि
कोऽप्यवगच्छति न नाहं इति दर्शनं निह्नुते एवं अद
र्शनस्मरणाश्रयाद्वयसम्बन्धे क्षणिकताभ्युपगमो वैनाशिकस्य
नैव सम्भवति पुराऽहं बाल आसं स एवाहं स्थविर इति प्रत्यभि
ज्ञाविरोधश्च न च सादृश्यनिमित्तं प्रत्यभिज्ञानं वस्तुद्वयग्रहीतु
रेकस्याभावात् उभयसाधारणैकधर्माभावाच्च एकस्य क्ष
णद्वयावस्थायित्वे क्षणिकत्वहानिः तदेवेदं तत्सदृशं वेति
सन्देहो (भवेदपि) प्यनुपपन्नः उपलब्धुस्तु स एवाहं तत्सदृशो वेति तु
नैव सम्भवति य एवाहं पूर्वमद्राक्षं स एवाहं स्मरामीति दर्शना
त् तस्मादनेन वैनाशिकसमयो (युक्तः) ॥ ६२॥

॥नासतोऽदृष्टत्वात् ॥६३॥

युक्त्यन्तरमाह नासत इति विनष्टाद्बीजात् किलाङ्कुर उत्पद्यते विनष्टात्क्षीराद्दधि नष्टान्मृत्पिण्डाद्घटः कूटस्थाच्चेत्कार्योत्पत्तिस्तदाऽविशेषात्सर्वं सर्वस्मादुत्पद्येत अतएवोक्तं नानुपमृद्य प्रादुर्भावादिति तस्मादभावग्रस्तेभ्यो बीजादिभ्योऽङ्कुरादीनामुत्पन्नत्वादभावाद्भावोत्पत्तिरिति मन्यन्ते वैनाशिकाः तत्र यद्यभावाद्भावस्तदाऽभावत्वाविशेषात् कार्यमप्यभावरूपमेव स्यात् नह्युपमृदितबीजाभावस्य निःस्वभावत्वाविशेषात् शशशृङ्गादेर्विशेषोऽस्ति येन बीजादेवाङ्कुरः क्षीरादेव दधि इत्येवङ्कारणाविशेषाभ्युपगमोऽर्थवान्स्यात् निर्विशेषाभावस्य कारणत्वे न शशशृङ्गादप्यङ्कुरः स्यात् अभावस्य उपादानहेतुत्वमपि न सम्भवति अभावात्तु तदा कार्यं स्यात् यदि शशशृङ्गादपि स्यात् न चैवं दृश्यते किञ्चाणुभ्यः चित्तचैत्ता उत्पद्यन्ते इति स्वप्रतिज्ञाविरोधः ॥६३॥

॥उदासीनानामपि चैवं सिद्धिः ॥६४॥

यद्यभावादुत्पत्तिस्तदा उदासीनानामनीहमानानां जनानां फलसिद्धापत्तिरभावस्य सुलभत्वात् एवं कृषीवलादेरप्रयतमानस्यापि सस्यादिनिष्पत्तिः स्यात् स्वर्गापवर्गादि न कश्चित्समीहेदित्याह उदासीनेति ॥६४॥

५ सू.

॥नाभाव उपलब्धेः ॥६५॥

ननु विज्ञानैकस्कन्धवादस्याभिमतत्वात् बुद्ध्यारूढेन रूपेणान्तस्थ एव प्रमाणप्रमेयफलव्यवहारः सर्वः उपपद्यते सत्यपि बाह्येऽर्थे बुद्ध्यारोहं विना प्रमाणादिव्यवहारानवतारात् किञ्च बाह्योऽर्थोऽभ्युपगम्यमानः किम्परमाणवादयः तत्समूहो वा नाद्यः घट

पटस्तम्भादिषु परमाणुत्वप्रत्ययस्याभासत्वानुपपत्तेः अप्रत्यक्षत्व
ञ्च स्यात् नापि द्वितीयः परमाणवन्यत्वानन्यत्वाभ्यां दुर्निरूप्य
त्वात् किञ्च ज्ञानत्वाविशेषेऽपि घटज्ञानं इति विषयपक्षपातः
स ज्ञानगतविशेषम्बिना न सम्भवति इति विषयसारूप्यं ज्ञानस्या
ङ्गीकार्यं सति तस्मिन् विषयाकारस्य ज्ञानेनैवावरुद्धत्वात् अ
पार्थिकार्थसद्भावकल्पना किञ्च सहोपलब्धिसद्भावादप्यभेदो
ज्ञानविषययोः यथास्वप्नमृगतृष्णागन्धर्वनगरप्रत्ययादीना
म्बिनैवार्थेन ग्राह्यग्राहकभावस्तथा जाग्रत्प्रत्यया अपीति बी
जांकुरवत् ज्ञानवासनयोरन्योन्यं निमित्तनैमित्तिकभावेन
वैचित्र्यमप्युपपन्नं तस्मान्न विज्ञानातिरिक्तं वस्त्विति द्वि
तीयम्बौद्धमतं दूषयति नेति न बाह्यार्थापलापः सम्भवति
उपलब्धेः स्तम्भः कुम्भः पट इत्यादिप्रत्यक्षेणैव सिद्धेः विज्ञा
नव्यतिरेकेणानोपलम्भ इति तु न निरंकुशत्वात्तन्मुखस्य
युक्तत्वात् नहि उपलब्धिरेव स्तम्भः कुड्यं चेति उपलभन्ते
अन्यथा कस्माद्भेद इति ब्रूयुः नहि वैचित्र्यं वन्ध्यापुत्रवदवभास
ते इति घटज्ञानं पटज्ञानमिति विषयभेदेन धीवैलक्षण्यमप
पाश्रुकोगोः कुब्जो गौरिति तस्मात् ज्ञानार्थयोर्भेद एव किञ्च द्वयोर्ज्ञा
नयोः पूर्वापरयोः स्वसम्वेदनेनैवोपक्षीणयोरितरेतरग्राह्यग्रा
हकत्वानुपपत्तिरतो विज्ञानभेदप्रतिज्ञाक्षणिकत्वादिधर्मप्रति
ज्ञा विद्योपप्लववन्धमोक्षस्वप्रतिज्ञा हीयेरन्नतः प्रदीपवत्स्व
व्यतिरिक्तग्राहकत्वम् ॥ ६५॥

॥ वैधर्म्याच्च न स्वप्नादिवत् ॥ ६६॥

यदुक्तं स्वप्नादौ तद्विषयम्बिनैव सर्वे प्रत्ययास्तदपि दूषयति वैध
र्म्यादिति न स्वप्नादिवज्जाग्रत्प्रत्ययः वैधर्म्यात् बाध्यत्वाबाध्य
त्वरूपधर्मभेदात् स्वप्नोत्तरं जागरणे मिथ्या मया महाजनसमाग
मो दृष्टः स्वप्नो न सत्यः एवं मिथ्यात्वमिदं मृगतृष्णायां मिथ्यासर्पो

114

रज्जौ दृष्ट इति वा धात् नह्येवं जागरिते घटादिज्ञानं मिथ्या घट इत्या
दि किन्तु सदेव घटादि दृष्टमिति धर्मभेदान्न जागरितज्ञानं मिथ्या ॥६६

॥ नाभावोऽनुपलब्धेः ॥६७॥

यदुक्तं विनाप्यर्थेन वासनावैचित्र्यात् ज्ञानवैचित्र्यमिति तद्दूषयति
नेति न भावो वासनानामुपपद्यते तव बाह्यानामनुपलब्धेः अर्थोप
लब्धिनिमित्ता हि नाना वासनाः अनुपलभ्यमानेष्वर्थेषु किं
निमित्ता वासनावैचित्र्यं भवेयुः अनादित्वे ऽन्धपरम्परान्
यायः व्यवहारलोपिनी स्यात् किञ्च वासना संस्कारः स च
नाश्रयम्विना सञ्चनेऽपत्त्वयेति न किञ्चिदेतत् ॥६७॥

॥ क्षणिकत्वाच्च ॥६८॥

यदप्यालयविज्ञानं वासनाश्रयत्वेन कल्प्यते तदपि
क्षणिकत्वाद् द्रव्यवस्थितमेव शून्यवादस्तृतीयस्तु सर्वप्रमाण
प्रतिसिद्ध इति तन्निराकरणेऽनादरः ॥६८॥

॥ सर्वथानुपपत्तेश्च ॥६९॥

किञ्चायं वैनाशिकसमय उपपत्तये परीक्ष्यते यथा यथा तथा तथा
सिकताकूपवद्विदीर्यत एव न कामप्युपपत्तिं पश्यामोऽतः सर्व
थानुपपन्नः सुगतसमयः अश्रद्धेय इत्याह सर्वथेति ॥६९॥

॥ नैकस्मिन्नसम्भवात् ॥७०॥ ६ अ॰

निरस्तः सुगतः आर्हतः परो विवसनः तन्मतं दूषयति नैकस्मि
न्निति आर्हतमते जीव अजीवश्चेति द्वौ पदार्थौ जीवश्चेतनः शरी
रपरिमाणः सावयवः अजीवः अणुमहीधरादिपर्यन्तः जी
वाजीव आस्रव सम्वर निर्जर बन्ध मोक्षाः सप्तपदार्थाः विस्तर
तः । आस्रवति अनेन जीवो विषयेष्वित्यास्रवः इन्द्रियसम्पातः
(प्रवृत्तिः) सम्वृणोतीति सम्वरो विवेकः (यमनियमादिः) निःशे
षेण जीर्यत्यनेन कामक्रोधादीति निर्जरः केशोल्लुञ्चन तप्तशि
लारोहणादिः कर्माष्टकेन घात्यादिना जन्ममरणपरम्परा बन्धः
चत्वारि घातिकर्माणि चत्वारि चाघातिकर्माणि । कर्मवाश

नाशे सति अलोकाकाशप्रविष्टस्य जीवस्य सततोर्ध्वगमनम्
मोक्षः एतेषु सप्तभङ्गीरूपन्यायं व्यवस्थाप्यन्ते स्यादस्ति, स्या
न्नास्ति स्यादस्तिच नास्तिच, स्यादवक्तव्यः स्यादस्तिचाव
क्तव्यश्च स्यान्नास्तिचावक्तव्यश्च स्यादस्तिच नास्तिचावक्तव्य,
श्चेति स्याच्छब्द ईषदर्थेनाचीनेषाम्प्रति वादिनः सप्त सद्वा
दी असद्वादी सदसद्वादी अनिर्वचनीयतावादी सदनिर्वाच्य
वादी असदनिर्वाच्यवादी सदसदनिर्वाच्यवादी चेति
सप्त त्वं तन्मते मोक्षोस्ति नवेति सद्वादिनः प्रश्ने ईषत् (क
थञ्चित्) अस्तीत्युत्तरं एवमुत्तरेषाम्प्रश्नेषु उत्तराणि
ततः सर्वे नोत्तरम्प्राप्ति पद्यन्ते अतोस्य सप्तानाम्भङ्गात्
सप्तभङ्गीन्यायस्य सत्वाज्जीवादि सप्त पदार्थानां सिद्धौ कि
ङ्कारणमिति प्राप्ते प्राह नेति सप्तभङ्गी अन्याय एव एकस्मि
न्धर्मिणि युगपत्सदसत्वादि विरुद्ध धर्म समावेशासम्भवात् शीतो
ष्णवत् नचजीवस्यसावयवत्वं अनित्यत्वापत्तेरिष्टापत्तौकस्य
मोक्षः पुरुषार्थः स्यात् तस्मान्न्यायाभासेन सप्तभङ्ग्या नजी
वादि सप्तसिद्धिः ॥७०॥

॥ एवं चात्माऽकार्त्स्न्यम् ॥ ७१॥

यत्तु पुद्गलसंज्ञेभ्योऽणुभ्यः संघातासादप्यणु कारणवादनिरा
करणेन निराकृतं एवं जीवस्याकार्त्स्न्यापादनेन शरीरपरिमाण
त्वमस्यनिराकरोति एवञ्चेति जीवस्य शरीरपरिमाणत्वेऽ
कृत्स्नोऽसर्वगतः परिच्छिन्नः स्यात् अतो मध्यमपरिमाणत्वा
त् घटादिवदनित्यत्व प्रसङ्गः एकस्यैव कर्मवशात् गजन
पिपीलिकादि परिमाणात् एकजन्मन्यपि कौमारयौवन
स्य विरुद्धत्वादनित्यत्वापत्तिः ॥७१॥

॥ नच पर्यायादप्यविरोधो विकारादिभ्यः ॥७२॥

अप्रास्
नोऽपि
जीवस्
कात्स्न्
नपरि
ष्टत्या
है १

न न्वनन्तावयवोजीवः तस्यसन्तएवावयवा अल्पशरीरेसं
कुचेयुः महतिविकसेयुरितिचेत्तदपिदूषयति नचेति अ
नन्तावयवस्यदेहपरिमाणत्वं अविरोधेनोपपादयितुं
नचशक्यं विकारादिदोषप्रसङ्गात् अनिशमापूर्यमाणा
स्यापक्षीयमाणस्यच जीवस्य विकारवत्त्वमपि परिहार्य
मेव विकारित्वे चर्मादिवदनित्यत्वं ततश्च बन्धमोक्षानुपप
त्तिः कर्माष्टकवेष्टितजीवस्यात्मानुवत्संसारसागरमग्नस्य
बन्धोच्छेदादूर्ध्वगामित्वं हि मोक्षस्तत्र आगच्छतामपगच्छ
तांचावयवानामागमापायधर्मवत्त्वादेवानात्मत्वं शरी
रादिवत् किञ्च आगच्छन्तोपगच्छन्तश्च कुतः आयान्ति
कुत्रलीयन्त इतिवक्तव्यं नहि भूतेभ्य आगमापायौ अ
मौतिकत्वादात्मनः एवमन्येपि दोषा ऊहनीयाः ॥ ७२॥

॥अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ७३॥

अपिचान्त्यस्य मोक्षावस्थायिनः जीवपरिमाणस्य नित्यत्वमिष्यते
नैः तद्वत्पूर्वयोरपि आद्यमध्यमपरिमाणयोरपि नित्यत्वप्रस
ङ्गादविशेषप्रसङ्गः स्यात् एकपरिमाणतैव स्यात् नोपचितापचि
तशरीरान्तरप्राप्तिः स्यादिति आर्हतमतमप्यसदेव ॥ ७३॥

॥पत्युरसामञ्जस्यात् ॥ ७४॥ ७ अ॰

प्रकृतिश्चप्रतिज्ञादृष्टान्तानुरोधादित्यादिना उपादानत्वमुक्तम्
तदसहमानास्तार्किकशैवादयः केवलंनिमित्तत्वमात्रं मन्यन्ते
तद्दूषयति तन्मते कार्यकारणयोगविधिदुःखान्ताः पञ्च पदार्थाः
पशुपतिनेश्वरेण पशुपाशविमोक्षायोपदिष्टाः पशुपतिरीश्वरो
निमित्तमात्रं इतितत्रोत्तरं पत्युरिति पत्युरीश्वरस्य प्रधा
नपुरुषयोरधिष्ठातृत्वेन कारणत्वं तन्न असामञ्जस्यात्
हीनमध्यमोत्तमभावेन भेदान्विदधत ईश्वरस्य रागद्वेषादि
दोषप्रसक्तेरनीश्वरत्वापत्तेः कर्मापेक्षित्वे परस्पराश्रयदोष
प्रसङ्गः अनादित्वेऽन्धपरम्परापत्तेस्तस्मादुपादाननिमित्तत्व ॥

॥सम्बन्धानुपपत्तेश्च॥७५॥

असामञ्जस्यान्तरमाह सम्बन्धेति न प्रकृतिपुरुषातिरिक्त ईश्वरो विना सम्बन्धं ईशिता स च न संयोगः प्रधानपुरुषेश्वराणां निरवयवत्वात्सर्वगतत्वाच्च न समवायः आश्रयाश्रयिभावानिरूपणात् कार्यकारणभावस्यासिद्धत्वेन सम्बन्धान्तरासिद्धेः अस्माकन्तु तादात्म्यमेव श्रुतिबलात् न वनु दृष्टान्तबलेन यच्चादृष्टमेव सर्वं न श्रुतिबलात् आगमात् सर्वज्ञसिद्धिः सर्वज्ञप्रत्ययाच्चागमसिद्धिरित्यन्योन्याश्रयात् तस्मात्सांख्ययोगजादीनामीश्वरकल्पना एव मन्यास्वपि वेदबाह्यकल्पनासु असामञ्जस्यं योजनीयम् इत्याह सम्बन्धेति॥७५॥

॥अधिष्ठानानुपपत्तेश्च॥७६॥

किञ्च तार्किककल्पितं ईश्वरस्य प्रवर्तकत्वं मृदादीनां कुम्भकारस्येव न सम्भवति न ह्यप्रत्यक्षं निरूपं प्रधानं अधिष्ठेयम् सम्भवति मृदादिवैलक्षण्यात् इत्याह अधिष्ठानेति।७६॥

॥करणवच्चेन्न भोगादिभ्यः॥ ७७॥

ननु यथा करणग्रामश्चक्षुरादिरप्रत्यक्षो रूपादिहीनश्च पुरुषाधिष्ठितः एवम्प्रधानमप्यधिष्ठास्यतीति चेन्न पुरुषस्य भोगादिदर्शनात् न चेश्वरस्य भोगादयोऽतो न प्रधानाधिष्ठातृत्वमित्याह करणेति॥७७॥

॥अन्तवत्त्वमसर्वज्ञता वा॥७८॥

इतश्च तार्किकोक्तं ईश्वरकल्पनं न सम्यक् अनन्तप्रधानमनन्ताश्च पुरुषा मिथो भिन्नाः त्वयाङ्गीक्रीयन्ते तत्र सर्वज्ञेनेश्वरेण पुरुषादीनाम् आत्मनश्च इयत्ता परिच्छिद्येत न वा आद्ये प्रधानपुरुषाणाम्परिच्छिन्नत्वात् अनित्यत्वप्रसङ्गः यद्धि लोके इयत्तापरिच्छिन्नं घटादि तदन्तवत् दृष्टम् न द्वितीयः ईश्वरस्य सर्वज्ञतानुपपत्तेः तस्मादसङ्गतस्तार्किकसमय इत्याह अन्तवत्त्वेति॥७८॥

॥उत्पत्त्यसम्भवात्॥७९॥ ८ अ.

येषाम्पुनरीश्वरः प्रकृतेरधिष्ठाता च उभयात्मकं कारणम् तेषां मतन्दूषयति उत्पत्तीति न च विदमभिन्ननिमित्तोपादानत्वं सिद्धान्तेऽप्यनुमतं अतः कथं दूषणमिति न उभयरूपत्वे पदूषणीयत्वेऽपि अंशान्तरदूषणीयत्वात् भागवता ईश्वरकारणवादिनः वासुदेवो निरञ्जनस्वरूपः परमात्मा एव चतुर्धा भूत्वा वासुदेवव्यूहः परमात्मा संकर्षणाख्यो हि जीवः प्रद्युम्नो नाम मनः अनिरुद्धोऽहंकारः तत्र वासुदेवः परा प्रकृतिः –

सङ्कर्षणादयः कार्यम् तम्भगवन्तं मिन्याध्ययनस्वाध्याय योगैर्वर्षशतमभि
गम्य क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति वदन्ति तदेकस्यानेकधा
व्यूहस्थित इत्यादि रस्तु यत्तु वासुदेवात्सङ्कर्षणः जीवः उत्पद्यते
ततः प्रद्युम्नः प्रद्युम्नादनिरुद्ध इति तद्दूष्यते न जीवोत्पत्तिः अप्र
नित्यत्वप्रसङ्गात् तथा च भगवत्प्राप्तिर्मोक्षो नैव स्यात् कारण
प्राप्तौ कार्यस्य प्रविलय प्रसङ्गात् जीवस्यानित्यत्वं च श्रुत्यादि
प्रतिबिद्धम् तस्मान्नैनम् ॥ ७९ ॥

॥ न च कर्तुः करणम् ॥ ८० ॥

न हि जीवात्कर्तुः करणमुत्पद्यमानं दृष्टं श्रुतं वा न हि छिदा कर्तुः कुठारा
द्युत्पत्तिर्दृष्टा श्रुता वा इत्याह न चेति ॥ ८० ॥

॥ विज्ञानादिभावे वा तदप्रतिषेधः ॥ ८१ ॥

ननु नैते सङ्कर्षणादयो जीवाः किन्त्वीश्वरा एव एते इत्युक्तेऽपि प्रका
रान्तरेण दोषमाह विज्ञानादीति यदि भिन्ना एते तुल्यधर्माणस्त
र्ह्यनेकेश्वरकल्पना वैयर्थ्यम् भगवानेवैको वासुदेवः परमार्थ
तत्त्वमिति विरोधश्च यदि चत्वारो व्यूहास्तुल्यधर्माणः तर्हि
पूर्वोक्ततदवस्थ एवोत्पत्त्यसम्भवः न च चतुर्णामेव भगवद्व्यूह
त्वं ब्रह्मादिस्तम्बपर्यन्तस्य जगतो भगवद्व्यूहत्वे न चतुष्कस्या
पार्थकत्वात् ॥ ८१ ॥

॥ विप्रतिषेधाच्च ॥ ८२ ॥

विप्रतिषेधश्चास्मिन् दृश्यते गुणगुणित्वकल्पनया ज्ञानैश्वर्यश
क्तिबलवीर्यतेजांसि गुणाः आत्मान एवैते भगवन्तो वासुदेवाः
इत्यादिदर्शनाच्च वेदविरुद्धश्च चतुर्षु वेदेषु परं श्रेयो
ऽलब्ध्वा शाण्डिल्य इदम्भागवत शास्त्रमधीतवानित्यादि
वेदनिन्दादर्शनात् तस्मादसङ्गतैषा कुसृष्टिः ॥ ८२ ॥ इति श्री
ब्रह्मसूत्रतात्पर्य विवरणे द्वितीयाध्यायस्य द्वितीयः पादः ॥
सांख्यायोगाः पाशुपताः सार्विका जिनबुद्धकाः ॥
निरस्ता यत्प्रभावेण तस्मै साम्बात्मने नमः ॥ १ ॥

॥ न वियदश्रुतेः ॥ ८३॥ १ सू॰

वेदान्तेषु तत्र तत्र भिन्नक्रमेणोत्पत्तिः क्वचिदाकाश क्रमेण क्वचिद्वायुक्रमेण क्वचित्तेजः क्रमेणेति विरुद्ध उत्पत्तिक्रमः श्रूयते एवं जीव प्राणादीनां क्रमादि द्वारको विप्रतिषेध उपलभ्यते अतोऽविरोधाय परः सन्दर्भः प्रपञ्च्यते न वियदिति ॥ ८३॥

॥ अस्ति तु ॥ ८४॥

तत्रादावाकाशस्योत्पत्तिरस्ति नवेति चिन्त्यते न वियदिति उत्पत्तिप्रकरणे श्रवणमाकाशस्य नोपलभ्यते सदेव सोम्येदमग्र आसीदित्युपक्रम्य तत्तेजोऽसृजत इति त्रयाणामेव तेजोऽबन्नानां श्रवणात् नाकाशोत्पत्तिरिति प्राप्ते आह अस्तीति तु शब्दो नेत्यर्थः भृग्वल्लरे (?) सत्यं ज्ञानमित्युपक्रम्य आत्मन आकाशः सम्भूतः इत्यादिश्रुतेरस्येवोत्पत्तिः ॥ ८४॥

॥ गौण्यसम्भवात् ॥ ८५॥

ननु परस्परश्रुतिविरोधान्नाकाशस्योत्पत्तिः सम्भवति इति विप्रतिषेधादिति प्राप्ते कश्चिदाह गौणीति समवायिकारणादीनामभावात् सम्भवो गौणः अस्तीत्यर्थकः आकाशं कुर्वितिवत् ॥ ८५॥

॥ शब्दाच्च ॥ ८६॥

स एव स्वार्थे उपष्टम्भकमाह शब्दाच्चेति वायुश्चान्तरिक्षं चैतदमृतमिति शब्दादपि नोत्पत्तिर्मुख्येत्यर्थः ॥ ८६॥

॥ स्याच्चैकस्य ब्रह्मशब्दवत् ॥ ८७॥

ननु तेजः प्रभृतिषु मुख्यः सम्भवः कथं आकाशे गौण इति चेत्तत्राह स्याच्चेति यथैकस्यापि ब्रह्मशब्दस्य तपो ब्रह्मेत्यादौ अन्नादिषु गौणः आनन्दे मुख्यः तद्वदाकाशशब्दो पीत्यर्थः ॥ ८७॥

॥ प्रतिज्ञाहानिरव्यतिरेकाच्छब्देभ्यः ॥ ८८॥

कश्चिन्मतं दूषयित्वा मुख्योत्पत्तिमुपपादयति प्रतिज्ञेति येनाश्रुतं श्रुतम्भवतीत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञा हीयेत तथा सत्यनुपपन्ना स्यात् यदि नित्यं स्यात्तदा कारणात्मकत्वादेकविज्ञानप्रतिज्ञाहानिः शब्देभ्यश्चैवं कार्यजातं ब्रह्मणः प्रदर्श्य व्यतिरेकप्रदर्शक

शब्देभ्यः ऐतदात्म्यमिदं सर्वं ब्रह्मादिदं सर्वं यदयमात्मा ब्रह्मैवेदम् अमृतं पुरस्तादित्यादिभ्यः तेजआदिवत् जन्यत्वमेवाकाशस्य नहीयं श्रुति स्तेजोजनि प्रधानाकाशस्योत्पत्तिं वारयति एकवाक्य त्वानुपपत्तेः क्रमविरोधोऽपि एकः क्रमेणानेकं सृष्ट्वं स्रजतो त्येकवाक्यत्वे सम्भवति न श्रुतिहानिर्युक्ता नचतज्जलानीति शान्त उपासीतेति शमविधानार्थेः वा नोत्पत्तिरभिमता नहि तेजः प्राथम्यानुरोधेन श्रुत्यन्तर सिद्धस्याकाशस्य परित्या ज्यत्वं सम्भवति क्रमस्य पदार्थधर्मत्वात्यागो युक्तः क्रमवा चकशब्दाभावात् अर्थक्रमस्य तु श्रुत्यन्तर सिद्धेन क्रमेणा स्य बाधितत्वात् च सर्वकार्याणामन्यदेशकालत्वात् प्रतिज्ञो पपत्तिरिति तु न विकृतिप्रकृति न्यायेनैवेदं सर्वं विज्ञा नं मृदादिदृष्टान्तकथनात् नेत्यलम् अतः सर्वस्य ब्रह्म कार्यत्वापेक्षयोपपद्यते ॥८॥

॥यावद्विकारं तु विभागो लोकवत् ॥९॥

यदुक्तमसम्भवाद्वायोरुत्पत्तिरिति तत्राह यावदिति तु शब्दो ऽसम्भवशंकानिवृत्यर्थः यतः यावत् घटादि विकारजातं ता वानेव विभागो लोके उपलभ्यते न त्वविकृतं कुतश्चिद्वि भक्तं दृश्यते आकाशस्य पृथिव्यादिभ्यो विभागोवगम्यते अतः सोपि विकार एव भवति एतेन दिक्कालमनः परमा णूनां विकारत्वं व्याख्यातम् नहि आत्मनस्तु अहमेव भूतभूवत भविष्यच्च भवामीति ज्ञातुरन्यथाभावोस्तिसर्वदा वर्तमानस्वभावत्वात् भस्मीभवत्यपि देहादौ नात्मन उच्छेदः नन्वथाआ काशस्य अतः कार्यत्वमाकाशस्य आकाशमनित्यम नित्यगुणा श्रयत्वात् घटादिवदिति श्रुत्यनुगृहीतानुमानञ्च यदुक्तं शब्दा च्चेति तदपि अमृतादिवौकसइतिवत् तदुपपत्तिः अतो न्यदर्तमिति श्रुतेश्च तस्माद् ब्रह्मकार्यं वियत् ॥९॥

2 अ०

॥एतेन मातरिश्वा व्याख्यातः ॥१०॥

एवं नाख्यादिवत्पौ ह एतेनेति न चसूत्रान्तरवैयर्थ्यं मन्द धि

यां शब्दमात्रकृताशङ्का निवृत्यर्थत्वात् ॥८॥

३ अ.

॥ असम्भवस्तु सतोऽनुपपत्तेः ॥९॥

नन्वनुपलभ्यमानो (असम्भाव्यमानो) त्पत्तिकस्याकाशादेरुत्पत्तिस्तर्हि ब्रह्मणोऽप्युत्पत्तिरस्त्वित्याशंक्याह असम्भवस्त्विति सन्मात्रं ब्रह्म न तस्य सन्मात्रादेवोत्पत्तिः असत्यतिशये प्रकृति विकृति भावानुपपत्तेः नहि विशेषेभ्यः सामान्योत्पत्तिः अपि तु सामान्याद्घटादयो विशेषाः स कारणं करणाधिपाधिपो न चास्य कश्चिज्जनिता न चाधिप इति श्रुतिश्च न च मूलप्रकृतेस्तदुत्पद्यते सर्वमूलप्रकृतेरेव न, ब्रह्मत्वात् ॥९॥

४ अ.

॥ तेजोऽतस्तथा ह्याह ॥१०॥

ननु छान्दोग्ये सदुपक्रम्य तत्तेजोऽसृजतेति श्रुते तेजसः सन्मूलत्वं तैत्तिरीये वायुमूलत्वमिति सन्देहे त्याह तेज इति अतो ब्रह्मणः सदेवेत्युपक्रम्य तत्तेजोऽसृजतेति श्रुतेः सर्वविज्ञान प्रतिज्ञायाः सर्वस्य ब्रह्मस्वभावत्व उपपत्तेः एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादौ सर्वस्याविशेषेण ब्रह्मजन्यत्वोपदेशात् स तपस्तप्त्वेदं सर्वमसृजत यदिदं किञ्चेति अविशेषश्रवणात् वायोरग्निरिति तु पारम्पर्येणाप्युपपन्नं वायुं सृष्ट्वा वायुभावापन्नं ब्रह्म तेजोऽसृजतेति कल्पनात् तस्याः स्तनं तस्याः दधि इतिवत् तदात्मानं स्वयमकुरुतेति विकारात्मना तस्मात् ब्रह्मण उपपद्यन्ते भवन्ति भावा भूतानां मत्त एव पृथग्विधा इति भगवद्वाक्येषु एतेनाक्रमवादिन्यः श्रुतयो व्याख्याताः सर्वं श्रयत्व मात्रस्याश्रवणात् ना व्यवधानमपि प्रयोजनम् ॥१०॥

५ अ.

॥ आपः ॥११॥

अपामपि तदपोऽसृजत अग्नेरापः इति श्रुतेर्मूले सन्देह इत्याह आप इति अतस्तथा ह्याहेत्यनुवर्तते ॥११॥

६ अ.

॥ पृथिव्यधिकाररूपशब्दान्तरेभ्यः ॥१२॥

ता आपः अन्नमसृजन्तेति श्रुतेर्तत्रान्नं किं ओदन व्रीह्यादि अन्नं उत पृथिव्यादि तत्रान्नशब्दो व्रीह्यादिषु लोके वेदे च प्रत्ययात् तस्मादन्न

क्व च वर्षति तदेव भूयिष्ठमन्नम्भवतीति वृष्टिसाध्यत्वश्रवणा
द्व्रीह्यादिरेवेति प्राप्ते आह पृथिवीति पृथिव्येवोक्ता; तत्तेजोऽसृ
जत तदपोऽसृजतेति महाभूताधिकारात् यत्कृष्णं तद
न्नस्येति रूपात् नहि व्रीह्योदनादि कृष्णमेव अद्भ्यः पृ
थिवीति श्रुतिशब्दान्तराच्चेत्यर्थः ॥१२॥

॥तदभिध्यानादेव तु तल्लिङ्गात्सः॥१३॥

किं वियदादीनि भूतानि स्वयमेव स्वतन्त्राणि विकारान्सृजन्ति
किं वा तथा परमेश्वर एवेति संशये आकाशाद्वायुरिति
स्वातन्त्र्यश्रवणाद्वियदादेरेवेति प्राप्ते आह तदभीतीश्व
र एव तत्तदात्मनावस्थितमभिध्यायन् सृजति लिङ्गात्
यः पृथिव्यां तिष्ठन् यः पृथिव्या अन्तरो यं पृथिवी न वेद
यस्य पृथिवी शरीरम् यः पृथिवीमन्तरो यमयतीत्यादि
साधकप्रमाणमिव भूतानां प्रवृत्तिदर्शनात् नान्योऽतोऽस्ति
द्रष्टेत्यादि तदात्मानं स्वयमकुरुतेति दर्शनाच्च ॥१३॥

॥विपर्ययेण तु क्रमोऽत उपपद्यते च॥१४॥

तदेवम्भूतानामुत्पत्तिक्रमो निर्णीत इदानीं प्रलयक्रमश्चिन्त्यते
किमुत्पत्तिक्रमेण लयो विपर्ययेण वेति तत्राविशेषादनिय
मः श्रुतत्वादुत्पत्तिक्रमेणैव वेति प्राप्ते आह विपर्ययेणेति यथा
लोके येन क्रमेण सोपानारोहणं तद्विपरीतक्रमेणावरोहणम्
तथात्रापि विपर्ययेण लय उपपद्यते च तथा दृष्टत्वात् प्रदेशा
तं घटादि पृथिव्येव लयमाप्नोति हिमकरकादि अद्भ्यो जातम
प्स्वेव लीयते एवमन्यादि स्वयंकारणद्वारा आत्मन्येव लीय
त इति पृथिव्यप्सु प्रलीयते ज्योतिष्यापः इत्यादि स्मृतेश्चेति
चशब्दार्थोऽयम् ॥१४॥

॥अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥[illegible]

एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृ
थिवी विश्वस्य धारिणीति श्रुतेः पूर्वोक्तोत्पत्तिप्रलयक्रम

मूङ्प्रसङ्गो भूतानामिति प्राप्ते आह अन्तरेति यदीन्द्रियादीनि करणानि भौतिकानि वा उभयथापि पूर्वोक्त उत्पत्तिप्रलयक्रमः न तयोरक्रमः अभौतिकत्वे श्रुतिश्च अन्नमयं हि सौम्य मनः आपोमयः प्राणः तेजोमयी वाक् इत्यादि तदा भूतत्वाविशेषात् भिन्नव्यपदेशो ब्राह्मणपरिव्राजकन्यायेनातो लिङ्गे येन क्रमो नोपपद्यते ब्राह्मणपरिव्राजकन्यायेन यद्यभौतिकानि तथापि न विशेषः प्रथमं करणानि ततो भूतानि आदौ भूतानि ततः करणानि तथापि सतएवोत्पत्तिप्रलयौ तस्मान्न पूर्वोक्तभूतोत्पत्तिलयक्रमभङ्गः ॥१६॥

॥चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् ॥१७॥

देवदत्तो जातो मृत इति व्यपदेशात् जातकर्मादिसंस्कारविधानाच्च स्यादुत्पत्तिप्रलयौ जीवस्येत्याशङ्कायामाह चराचरेति न जीवस्योत्पत्तिप्रलयौ शरीरानुविनाशित्वे जीवे शरीरान्तरगते इष्टानिष्टप्राप्तिपरिहारार्थौ विधिप्रतिषेधौ अनर्थकौ स्याताम् श्रुतश्च जीवापेतं वाव किलेदं म्रियते न जीवो म्रियते लौकिकौ जन्मादिव्यपदेशौ चराचरव्यपाश्रयः स्थावरजङ्गमविषयौ भाक्तौ तद्भावभावित्वात् शरीरप्रादुर्भावविनाशयोः जीवस्य तौ व्यवहारौ न तौ शरीरं विना न हि शरीरादन्यत्र तौ जीवस्य अयं पुरुषो जायमानः शरीरमभिसम्पद्यमानः स उत्क्रामन् म्रियमाण इति जातकर्मादिकमपि देहप्रादुर्भावापेक्षम् देहाश्रयौ स्थूलावुत्पत्तिप्रलयौ जीवस्य नेत्येतावदत्रोच्यते उत्तरसूत्रेतु वियदादिवत् परात्मनः जीवोत्पत्तिर्निराक्रियते ॥१७॥

॥नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः॥१८॥

जीवः शरीरेन्द्रियपञ्जराध्यक्षः कर्मफलभोगी स वियदादिवत् परस्मादुत्पद्यते यथाग्नेर्विस्फुलिङ्गा इत्यादिदर्शनात् अपहतपाप्मत्वादिधर्मकात्परमात्मनो भिन्नजातीयस्य विकारसिद्धेः विकारत्वादेतस्य जन्मादि इति प्राप्ते आह

नात्मेति नजीव उत्पद्यते अश्रुतेः विस्फुलिङ्गवच्छ्रवणोऽपि ताभ्यः नजीवो म्रियते अनेन जीवेनात्मनानुप्रविश्य नामरूपे अजो नित्यः शाश्वतोऽयम्पुराणः नजायते म्रियते इत्यादिभ्यो नित्यत्वावधारणात् चकारादजत्वं ग्राह्यम् ॥९९॥

॥ ज्ञोऽत एव ॥१००॥

स किमागन्तुकचैतन्यः उत नित्यचैतन्यो वेति न आत्ममनःसंयोगजज्ञानं नित्यचेतनत्वे सुप्तमूर्छितग्रहाविष्टा अपि चेतनाः स्युरिति प्राप्ते प्राह ज्ञ इति ज्ञः नित्यचैतन्यः अत एव यस्मादेवं परब्रह्मैवोपाधिना जीवत्वेन तिष्ठति नोत्पद्यते अतः सुप्तादीनामविषयाभावात् अचेतना न चैतन्याभावात् यथाविद्यमानप्रकाशस्य प्रकाश्याभावादनभिव्यक्तिः तथेहापि तस्मान्नित्यचेतनः वैशेषिकादितर्कस्त्वाभास एव ॥१००॥

॥~~उत्क्रान्तिगत्यागतीनाम्~~ युक्तेश्च॥१०१॥

विषयाभावे ज्ञानानुपपत्तेश्चेति युक्त्यन्तरमाह युक्तेश्चेति ॥१०१॥

॥उत्क्रान्तिगत्यागतीनाम्॥१०२॥

इदानीं जीवोऽणुपरिमाणः उत मध्यमः महान्वेति चिन्तायां तत्र शरीरात्समुत्क्रामतीति उत्क्रान्तिश्रवणात् चन्द्रमसमेव ते गच्छन्तीति गतेः तस्माल्लोकात्पुनरैतीत्यागतिश्रवणात् परिच्छिन्नः तत्र मध्यमपरिमाणस्य आर्हतनिरासे निरस्तत्वादणुरात्मेति आशङ्कते उत्क्रान्तीति ॥१०२॥

॥स्वात्मना चोत्तरयोः॥१०३॥

चक्षुषो मूर्ध्नो वा इत्यादिना शुक्रमादाय पुनरैतीति स्वात्मनैव उत्तरयोः गमनागमनयोः सत्वात् गम धातोः कर्तृस्थक्रियत्वात् अप्यणुत्वमपीत्याह स्वात्मनेति ॥१०३॥

॥नाणुरतच्छ्रुतेरितिचेन्नेतराधिकारात्॥१०४॥

मध्ये स एष महानज आत्मेति श्रुतेः अणुत्व विपरीत महत्व श्रुतेर्नाणुत्व-
मिति समाधानमाशंक्य दूषयति नाणुरिति नेतत् इतरस्य परात्मनः अधि
कारात् जीवस्याणुत्वे विरोधः नचयोयं विज्ञानमयप्राणेष्विति शरीर एव
महत्व परिमाणत्वेन निर्दिष्टः शास्त्रदृष्ट्या वामदेववत् निर्देशात् तस्मा
ज्जीवोऽणुः ॥१०४॥

॥स्वशब्दोन्मानाभ्यां च ॥१०५

एषोऽणुरात्मा चेतसा वेदितव्य इति साक्षात् श्रुतेः बालाग्र शतभागस्य श
तधा कल्पितस्य तु भागो जीवः स विज्ञेय इति आराग्रमात्रो ह्यवरो
पि दृष्ट इति चोन्मानात् अणुत्वमित्याह शब्देति

॥अविरोधश्चन्दनवत् ॥१०६॥

नन्वणुत्वे एकदेशस्थस्य सकल देह गतोपलब्धि र्विरुद्धा य
था गङ्गा ह्रद निमग्नानां सर्वाङ्ग शैत्यस्य निदाघे परितापस्य चोप-
लब्धेर्विरोधः इत्यत्राह उत्तरयति अविरोध इति यथा चन्दन बि-
न्दुः शरीरैक देश सम्बद्धोपि सकल देह माह्लादयति तद्वत् आत्मापि
सर्वत्रोपलब्धिं करिष्यतीति न विरोधः ॥१०६॥

॥अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥१०७॥

तदयुक्तं
नविरोध इत्युक्तम् दृष्टान्त वैषम्यात् चन्दनस्य त्वेकदेशस्थत्वं वै
बत्य दृश्यते आत्मनस्तु नैकदेश वर्तित्वं प्रत्यक्षम् अनुमेयं हि तत्
इति शंकायामाह अवस्थितेरिति आत्मनोपि एकदेशस्थत्वं हृदिय
ष आत्मा प्राणेषु हृद्यन्तर्ज्योतिरिति श्रुतिषु अभ्युपगमात् अनुमेय
मिति दृष्टान्त सङ्गतिः ॥१०७॥

॥गुणाद्वालोकवत् ॥१०८॥

ननु चन्दनस्य सावयवत्वात् सूक्ष्माणूनां विसर्पेणापि सर्वदेह व्या
पित्वं यथा मणि प्रदीपादि एकदेशस्थ मपि सकल देहश वर्ति
प्रभादि कार्य द्रव्य करोति तद्वदेकस्थापि जीवः सर्व शरीरे
चैतन्य गुण व्याप्तिं करिष्यति चैतन्यस्य गुणत्वान्नहि गुणो गुणि
व्यतिरेकेणान्यत्र वर्तते तु नीर्दिष्ट प्रभा तु द्रव्यं न गुणः तस्माज्जी
वस्याणुत्वमित्याशङ्क्याह गुणादिति ॥१०८॥

126

॥व्यतिरेको गन्धवत्॥१०९॥

महा पूर्व पक्षौ समाधत्ते व्यतिरेकेति यथा गुणस्यापि गन्धस्य कुसुम
व्यतिरेकेण वृत्तिः अप्राप्तेष्वपि कुसुमेषु तद्गन्धोपलब्धेरेव मणो
रपि चैतन्य गुण व्यतिरेकः॥१०९॥

॥तथा च दर्शयति॥११०॥

हृदयायतनत्वं अणुत्वञ्च आत्मनोऽभिधीयते तस्यैवालोमभ्य आ
नखाग्रेभ्य इति चैतन्येन गुणेन समस्त शरीरव्यापित्वं च दर्शयतितथा
च दर्शयतीति ॥११०॥

॥पृथगुपदेशात्॥१११॥

प्रज्ञया शरीरं समारुह्येति च आत्मनः प्रज्ञायाश्च कर्तृकरण भावेन
पृथगुपदेशाच्चैतन्यगुणेनैवास्य शरीर व्यापिता गम्यते तदेषाम्प्रा
णानां विज्ञानेन विज्ञान मादायेति कर्तुः शरीरात् पृथग् विज्ञानोप
देशः एतमभिप्रायं उपोद्बलयति पृथगुपदेशेति तस्मादणुरात्मा॥१११॥

॥तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत्॥११२॥

अणुत्वं खण्डयति तद्गुणेति तुर्व्वः पूर्ववत् उत्पत्त्यश्रवणात् परस्यै
व प्रवेश स्मरणात् तादात्म्योपदेशाच्च ईश्वर एव जीव इत्युक्तं एव
ञ्च यावद्देहं तावज्जीवः ब्रह्मणाश्च विभुत्व मुक्तमेव एवञ्च जीव
विषया विभुत्व वादाः श्रौताः स्मार्ताश्च समर्थिताः न चाणोर्जीव
स्य सर्वशरीर वेदनोपपद्यते शरीर त्वक् सम्बन्धादिति चेत् कं
टक त्वोदनेऽपि सकल गतैव वेदना प्रसज्येत पाद एव वेदना
प्रतीते न चाणोर्गुणस्य व्यापित्वं उपपद्यते गुणस्य गु[illegible]देश
त्वात् गुणत्वनाशप्रसङ्गे गुणत्वमेव हीयेत प्रदीप प्रभाया द्र
व्यान्तरत्वमेव गन्धोऽपि गुणत्वादेव स्वाश्रय एव सञ्चरति
गुणत्वात् यदा च चैतन्यं सर्वशरीरव्यापी तदा नैवाणुर्जीवः
तस्माच्चैतन्य मेवास्य स्वरूपम् अग्नेरिव उष्ण प्रकाशौ महत्प
रिमाणत्वञ्च दूषितमेव कथमणुत्व व्यपदेशः तत्राह तस्या
बुद्धेः गुणाः इच्छादयः सारम् प्रधानं यस्य आत्मनस्तत्त्वात् संसारेण
तस्मादौपाधिक मणुत्वादि दृष्टेर्य त्वाभिप्रायं नाणुत्वम् ॥११२॥

॥ यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥१२३॥

ननूपाधिप्रयुक्तमणुत्वं यदि तदा बुद्ध्यात्मनोः संयोगावसानं
व्यावश्यकमिति बुद्धिवियोगे तस्यात्मनस्त्वादसत्त्वमसंसारि
त्वं च स्यादत उत्तरयति यावदिति पूर्वोक्तेन बुद्धिसंयोग
स्य यावदात्मभावित्वात् यावदयं संसारी तावदस्य बुद्धिसंयो
गः परमार्थतः नास्य संसारित्वं जीवत्वं च किन्तु बुद्ध्युपाधिकल्पि
तं स्वरूपं तु ब्रह्मैव नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोतेति अहं ब्र-
ह्मास्मि तत्त्वमसि इत्यादिश्रुतिशतेभ्यः कथमेतदवगम्यते तद्दर्श
नात् तथाश्रुतिषु दृष्टत्वात् योयं विज्ञानमयः प्राणेषु हृद्यन्त
र्ज्योतिः ध्यायतीव लेलायतीवेत्यादिषु बुद्धिमयत्वमुक्तं
तद्गुणसारत्वमेव यथा स्त्रीमयोऽयं पुमान् इति किञ्च मिथ्या
ज्ञानपुरःसर एव बुद्ध्युपाधिसम्बन्धः मिथ्याज्ञानस्य च सम्यग्ज्ञा
नस्य दर्शनेनाशादिति अतो यावत्तत्त्वज्ञानं नोत्पन्नं तावत्संसारे
न नश्यति तमेव विदित्वाति मृत्युमेति नान्यः पन्था इत्यादि दर्शयति॥१२३॥

॥पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात् ॥१२४॥

ननु सुषुप्तिप्रलययोर्नात्मनो बुद्धिसम्बन्धः सता सोम्य सम्पन्नो भ
वति इत्यादिना सर्वविकाराणां लयदर्शनात् कथं यावज्जीव
भावित्वं बुद्धिसम्बन्धस्य तत्राह पुंस्त्वादिवदिति यथा पुंस्त्वादी
नि बाल्येऽपि जीवात्मना विद्यमानान्येवानुपलभ्यमानान्यवि
द्यमानवदभिज्ञातानि यौवनादिष्वाविर्भवन्ति नाविद्यमानान्युत्प
द्यन्ते षंढादीनामपि तदुत्पत्तिप्रसङ्गात् एवं बुद्धिसम्बन्धोऽपि
शक्त्यात्मना सुषुप्तिप्रलययोः सन् प्रबोधप्रसवयोराविर्भवति
न ह्याकस्मिकी कस्याप्युत्पत्तिरिति प्रसंगात् सतिसम्पद्य न वि
दुः सति सम्पद्यामह इति त इह व्याघ्रो वा सिंहो वा वराहो वेत्यादि
तस्मात् सिद्धमेतद्यावदात्मभावी सम्बन्ध इति ॥१२४॥

128

॥नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतर नियमो वान्यथा॥११५॥

नित्योपलब्धीति तदुपाधिभूतमन्तःकरणं मनो बुद्धिर्विज्ञानं चित्तमित्यनेकधात्रतत्राभिलप्यते क्वचित्संशयादिवृत्तिकं मन इत्युच्यते निश्चयात्मिका बुद्धिरित्यादि तच्चैवम्भूतमन्तःकरणमवश्यमभ्युपगन्तव्यम् अन्यथा नित्यमुपलब्धेरनुपलब्धेर्वा प्रसङ्गः आत्मेन्द्रियविषयाणां सत्त्वात् फलानङ्गीकारे नित्यमेवानुपलब्धिप्रसङ्गः अथ आत्मन इन्द्रियादेर्वा शक्तिप्रतिबन्ध एव तदानीमस्तु किमन्तःकरणेनेति तन्न आक्रियत्वेनात्मनः शक्तिप्रतिबन्धासम्भवात् नापीन्द्रियस्य न हि तत्स्य पूर्वोत्तरयोः क्षणयोरप्रतिबद्धशक्तिकस्य सतोऽकस्माच्छक्तिः प्रतिबन्धो ततस्माद् यदवधानानवधानाभ्यामुपलब्ध्यनुपलब्धी भवतः तन्मनः अन्यत्र मना अभूवं नादर्शं नाश्रौषं मनसा ह्येव पश्यति मनसा शृणोति कामादयस्तस्यैव वृत्तयः कामः सं कल्पो विचिकित्सेत्यादि सर्वं मन एव तस्माद्युक्तं बुद्धिगुणसारत्वात्तद्व्यपदेश इति॥११५॥

॥कर्त्ता शास्त्रार्थवत्त्वात्॥११६॥ [१ अ॰]

तद्गुणाधिका एवान्येऽपि धर्मा इत्याह कर्त्तेति अयं जीवः कर्त्ता स्यात् यजेत दद्यात् जुहुयात् इत्यादिविधयोऽपि सार्थका भवन्ति अन्यथाऽनर्थका एव स्युः एवं हि द्रष्टा श्रोता मन्तेत्यादि॥११६॥

॥विहारोपदेशात्॥११७॥

जीवप्रक्रियायां सन्ध्यस्थाने स ईयतेऽमृतो यत्र कामम् इति स्वशरीरे यथा कामं परिवर्तत इत्यतोऽपि जीवस्य कर्तृत्वमित्याह विहारेति॥

॥उपादानात्॥११८॥

प्राणानां विज्ञानेन विज्ञानमादायेत्युपादानश्रवणादात्मकर्तृत्वं इत्याह उपादानेति॥११८॥

॥व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः॥११९॥

कर्त्तेत्ययुक्तं तस्माद्व्यपदेशेति यतो वैदिकक्रियासु क

र्तृत्वं व्यपदिश्यते विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपि
चेति अतोऽपि कर्तृत्वं न च विज्ञान बुद्धिः तस्यैव कर्तृत्वमु
क्तम् न जीवस्येति जीवस्यैवायं निर्देशो न बुद्धेः एवं न बुद्धेर्जी
वस्य तदा विज्ञानेनेति करणत्वेन निर्देशविपर्ययः स्यात् यथा
करणत्वविवक्षया प्राणानां विज्ञानेन विज्ञानमादायेति तथे
हापि स्यात् इह तु तनुत इति कर्तृसामानाधिकरण्यात् बु
द्धिभिन्नस्यैवात्मनः कर्तृत्वं सूच्यते ॥११९॥

॥उपलब्धिवदनियमः ॥१२०॥

यदि बुद्धिव्यतिरिक्तो जीवः कर्ता स्यात् स्वतन्त्रः सन् प्रियं हितं चात्मनो
नियमेन सम्पादयेत् न विपरीतं तथा सम्पादयन्नुपलभ्यते न च स्वतन्त्रस्येदृ
शी प्रवृत्तिरनियमेनोपपद्यते तत्रोत्तरमाह उपलब्धिवदिति यथाऽऽत्मोपल
ब्धिं प्रति स्वतन्त्रोऽप्यनियमेनेष्टमनिष्टं चोपलभते एवमनियमेनेष्ट
ानिष्टसम्पादयित्यापि न चोपलब्धिवदिति हेतूनां अपक्षपातोऽप्युपल
ब्धौ स्वातन्त्र्यं न विषयकल्पनामात्रहेत्वपेक्षणात् बुद्धौ स्वातन्त्र्यमवे
तव्ययोगात् किञ्चान्यक्रियायामपि देशकालनिमित्ताद्यपेक्षत्वात् सहकारी
वैचित्र्याच्चेष्टानिष्टक्रियास्वनियमेन प्रवृत्तिर्न विरुध्यते ॥१२०॥

॥शक्तिविपर्ययात् ॥१२१॥

यदि बुद्धिरेव कर्त्री तदा कर्तृत्वे करणत्वविपर्ययः स्यात् करणत्वं
हीयेत कर्तृत्वं च स्यात् तथा च संज्ञामात्रभेदः स्यान्न तु वस्तुभेदः करण
भिन्नस्य कर्तृत्वाङ्गीकारात् इत्याह शक्तीति ॥१२१॥

॥समाध्यभावाच्च ॥१२२॥

योऽपि औपनिषदप्रतिपत्तिप्रयोजनः समाधिरुक्तः आत्मा वा अरे
द्रष्टव्यः श्रोतव्यो निदिध्यासितव्यः ॐ इत्येवं ध्यायथ आत्मान
मित्यादि सोऽपि कर्तृत्वे सत्येवोपपद्यते इत्याह समाधीति ॥१२२॥

॥यथा च तक्षोभयथा ॥१२३॥ १५ अ॰

यत्कर्तृत्वं तदेव शास्त्रार्थवत्त्वादिहेतुभिः स्वाभाविकमेव नो
पाधिप्रयुक्तं इत्यत्राह यथा चेति स्वाभाविकत्वेऽनिर्मोक्षप्रसङ्गः अ
ग्निरिवौष्ण्यात् साधननिधानान्मोक्ष इति तन्न साधनापन्नस्या
नित्यत्वात् किञ्च नित्य शुद्धमुक्तात्मप्रतिपत्त्या मोक्षः कर्तृत्वेनैतदुप-

यत्ते श्रुतिरपि ध्यायतीव लेलायतीवेति यत्र त्वस्य सर्वमा-
त्मैवाभूत्तत्केन कं पश्येदित्यादिना कर्त्तृत्वादिनिषेधात् सूत्रे
नकारस्त्वर्थः यथा तु लोके तक्षा वास्यादिकरणसापेक्षो दुःखी भ-
वति विमुक्तः वास्यादिः स्वगृहं प्राप्तः स्वस्थो भवति तथा मोक्षा-
वस्थायां यावं निद्रया विधूय केवलः सुखी भवति एतेन निरु-
पादानेनास्तत्त्विके परिहृते ॥१२३॥

॥परात्तु तच्छ्रुतेः ॥१२४॥ १६ अ.

सोपाधिकं कर्तृत्वमपि किं ईश्वरमनपेक्ष्य उतेश्वरापेक्षं त-
त्र प्रयोजनाभावान्निरपेक्षस्यैव कारकान्तरसहकृतस्य कृष्यादि-
वत् जन्तूनां धर्माधर्मसहकारेण वैषम्यनैर्घृण्यापवारणात् इ-
ति प्राप्ते आह परात्विति त्वर्थः पूर्ववत् जीवावस्थायां अविवेक-
दर्शिन स्तिमिरान्धस्य सतः कर्माध्यक्षात् साक्षाच्चेतयितुरीश्वरा-
त्तदनुज्ञया कर्तृत्वभोक्तृत्वरूपसंसारस्य सिद्धिस्तदनुग्रहहे-
तुकेनैव विज्ञानेन मोक्षसिद्धिर्भवति तत् श्रुतेः एष ह्येव साधु
कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते एष ह्येवासाधु कर्म
कारयति तं यमधो निनीषते य आत्मानमन्तरो यमयतीत्यतः ॥१२४॥

॥कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः ॥१२५॥

नन्वेवमपि ईश्वरस्य कारयितृत्वे वैषम्यनैर्घृण्ये स्यातां अकृताभ्या-
गमश्च जीवस्येत्याशंक्याह कृतप्रयत्नेति तुशब्दो व्यावृत्त्यर्थः कृत-
प्रयत्नौ धर्माधर्मौ तदपेक्षस्तु परमेश्वरः कथमीश्वरस्तदपेक्ष इ-
त्यत आह विहितप्रतिषिद्धावैयर्थ्यादिभ्यः यजेत न हन्तव्य इत्या-
दिवैयर्थ्यात् आदिनावेदप्रामाण्यं न स्यात् पुरुषकारवैयर्थ्यं च ॥१२५॥

॥अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥१२६॥

जीवेशयोरुपकार्योपकारकभाव उक्तः स च सम्बन्धयोरेव लोके दृष्टः
स्वामिभृत्ययोरग्निविस्फुलिङ्गयोरिव जीवेश्वरयोः किमात्यन्ति-
कभेदप्रयुक्तः स्वामिभृत्यादिवत् सम्बन्धः उत भेदाभेदावगमात्
अग्निविस्फुलिङ्गयोरिवेति तत्र स्वामिभृत्यवत् अनिय

मोवेति पाप्ने आह अंशइति अंशइवांशः निरवयवत्वात् मु ख्यांशत्वं तु न सम्भवतीति कुतः सवचन नानाव्यपदेशात् सोन्वेष्टव्यः सः जिज्ञासितव्यः एवं विदित्वा मुनिर्भवति य आत्मनि तिष्ठ न्नात्मानमन्तरो यमयतीत्यादि निर्देशो नासति भेदे युज्यते ननु स्वामि भृत्य सारूप्ये युज्यते नानात्व व्यपदेश इत्यतो अ न्यथा चापि इति नाना व्यपदेशादेव नांशत्व प्रतिपत्तिः कि न्त्वभेद प्रतिपादकोपि व्यपदेशोऽस्ति एके आथर्वणिकाः ब्रह्मदाशा ब्रह्म दासा ब्रह्मेमे कितवा इति ये चान्ये कितवा द्यूत कृत स्ते सर्वे ब्रह्मैवेति हीन जन्तूदाहरणेन सर्वेषामेव नाम रूपकृ त कार्य करण संघात प्रविष्टानां जीवानां ब्रह्मत्व माह एवं त्वं स्त्री त्वं पुमान् असि त्वं कुमार उत वा कुमारी त्वं जीर्णो द ण्डेन वञ्चसि त्वं जातो भवसि विश्वतो मुख इति सर्वाणि रूपाणि विचित्य धीरः नामानि कृत्वे त्यादिना नान्योतोस्ति द्रष्टे त्यादि भ्य श्चास्यार्थस्य सिद्धिः चैतन्यं चाविशिष्ट मग्निरापः अग्नि विस्फुलिङ्गयो रिवोष्णय तस्माद्भेदाभेदा भ्या मंशत्व मित्यर्थः ॥१२६॥

॥मन्त्रवर्णाच्च॥१२७॥

तावानस्य महिमा ततो ज्यायांश्च पूरुषः पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि अत्र भूत शब्देन स्थावर जंगमानि पादं श इव न चान्तर मिति मन्त्र वर्णाद्धी त्याह मन्त्रेति॥१२७॥

॥अपि च स्मर्यते ॥१२८॥

स्मर्यते च ममैवांशो जीव लोके जीव भूतः सनातन इत्यादीत्या ह अपिचेति ॥१२८॥

॥प्रकाशादिवन्नैवम्परः॥१२९॥

नन्वंशांशिनो जीवकारे जीव दुःखेनांशिन ईश्वरस्यापि दुःखि त्वापत्तिः यथा हस्त पादादि दुःखेन देवदत्तस्य दुःखित्वं एवमु सम्यग् दर्शनानर्थक्य मित्याशंकामपाकरोति प्रकाशादिवदिति

जीवस्य आविद्यक नामरूप नामरूप कृत देहेन्द्रियाद्युपाधित्वा दात्माभिमानेन देहगतदुःखादिकस्य अनुभवः न पारमार्थिकः नैवं सर्वज्ञ ईश्वरस्य देहाद्यात्मभावो दुःखाभिमानो वास्ति तेन दुःखित्वं स्नेहातिशये पुत्रमित्रादिदुःखम्भान्यापतयेति भावः ॥१२९॥

॥स्मरन्ति च॥१३०॥

नहि जैवेन दुःखेन परात्मा दुःखभाग्भवेत् तत्र यः परमात्मा हि स नित्यो निर्गुणः स्मृतः नालिप्यते फलैः जापि पद्मपत्र मिवाम्भसेत्यादि तयोरन्यः पिप्पलं स्वाद्वत्तीति च ॥१३०॥

॥अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् ॥१३१॥

ननु जीवब्रह्मणो मुख्य मंशांशित्वं न युक्तं नहि ऋतौ भार्यामुपेयादित्यनुज्ञा गुर्वङ्गनां नोपगच्छेदिति परिहारः एवं लोके मित्रमुपसेवेत शत्रुः परिहर्तव्यः इत्यनुज्ञापरिहारौ तयोरुपपत्तिर्नास्येति तामाह अनुज्ञेति देहेन सम्बन्धः अयमिन्द्रियादि संघातो देहोऽहमेवेति विपरीत प्रत्ययोत्पत्तिः सा च सर्वप्राणिनां अहङ्गच्छामि अहन्तिष्ठामित्यादिरूपा नह्यस्याः सम्यग्ज्ञानव्यतिरिक्तं निवारक मस्ति तदेव मविद्योपाधिसम्बन्ध कृत विशेषादेकात्म्याङ्गीकारेपि अनुज्ञापरिहाराववकल्प्येते सम्यग्दर्शने सति तयोरानर्थक्यं कृतार्थत्वान्नियोज्यत्वानुपपत्तेः तस्माद्देहसम्बन्धादेवानुज्ञापरिहारौ यथा ज्योतिष एकत्वेऽपि क्रव्यादाग्निः परिहार्यः नेतरस्तद्वत् ॥१३१॥

॥असन्ततेश्चाव्यतिकरः॥१३२॥

ननैवमपि कर्मफलसम्बन्ध ऐकात्म्ये व्यतिकीर्येत स्वाम्येकत्वादिति प्राप्ते आह असन्ततेरिति नहि कर्तुर्भोक्तु रात्मनः सन्ततः सर्वशरीरसम्बन्धः उपाधितन्त्रो जीवः इत्युक्तो यदि असन्तानात्वे न जीव सन्तानः ततः कर्मव्यतिकरः फलव्यतिकरो वा न भविष्यति ॥१३२॥

॥आभास एव च ॥१३३॥

आभास एवेति अयञ्जीवः परमात्मनो जलसूर्यवच्चिदाभास एव नेश्वर एव साक्षात् नापि वस्त्वन्तरमतश्च यथानेकजल सूर्ये कम्पमाने जलसूर्यान्तरं कम्पते एवं नैकजीवे कर्मफलसम्बन्धे सति जीवान्तरस्य सम्बन्धापत्तिः अतः पापिपुण्यकर्मफल योरव्यतिकरः आभासस्य चाविद्याकृतत्वात् तदाश्रयसंसारस्याप्यविद्याकृतत्वात्तन्निरासेन पारमार्थिकब्रह्मात्मभावस्योपपत्तिः बहवो जीवाः वास्तवा इति वैशेषिकादीनां मते तु एकस्यात्मनः सुखादियोगे हेत्वविशेषात्फलाविशेषाच्च सर्वात्मनामेव समानसुखदुःखित्वं प्रसज्येत ॥१३३॥

॥ अदृष्टानियमात् ॥१३४॥

अदृष्टनिमित्तो नियमो भविष्यतीत्यत आह अदृष्टेति बहुषु सर्वगतेष्वात्मसु प्रतिशरीरं बाह्यान्तराविशेषेण सन्निहितेषु मनोवाक्कायैरदृष्टमुपार्ज्यत इति अस्यैवेदमदृष्टमस्यैवेति नियमहेत्वभावात् दोष एव दोषः स्यात् ॥१३४॥

॥ अभिसन्ध्यादिष्वपि चैवम् ॥१३५॥

नन्वहमिदं फलं प्राप्नवानि इदं परिहरामि इदानीं प्रयते इत्थं करवाणि इत्येवम्विधा अभिसन्ध्यादयः प्रत्यात्मं प्रवर्तमाना अदृष्टस्यात्मनां स्वस्वामिभावं नियस्यन्तीत्याशंक्याह अभिसन्ध्यादीति अभिसन्ध्यादीनामपि साधारणेनैवात्मसंयोगेन सर्वात्मसन्निधौ क्रियमाणानां नियमहेत्वभावादुक्तदोष एव स्यात् ॥१३५॥

॥ प्रदेशादिति चेन्नान्तर्भावात् ॥१३६॥ इति तृतीयः पादः

ननु विभुत्वेप्यात्मनः शरीरप्रतिष्ठेन मनसा संयोगः शरीरावच्छिन्न एवात्मप्रदेशे भविष्यति अतः प्रदेशकृताव्यवस्था अभिसन्ध्यादृष्टसुखदुःखादीनां भविष्यतीत्याशङ्क्याह प्रदेशादिति तदपि नोपपद्यते अन्तर्भावात् विभुत्वाविशेषात्सर्वेष्वात्मानः सर्वशरीरेष्वन्तर्भवन्ति एवञ्च सर्वात्मसन्निधावुत्पद्यमानमपि शरीरमेतदात्मन एव नेतरेषामिति नियन्तुं न शक्यते

प्रदेश विशेषाभ्युपगमेऽपि च समान सुखदुःख भागोऽद्वयोरात्मनोः कदाचिदेकेनैव शरीरेणोपभोगः स्यात् द्वयोरात्मनोः समान प्रदेशस्यादृष्टस्य सम्भवात् ब्राह्मणादि शरीर प्रदेशेऽदृष्ट निष्पत्तेः स्वर्गीय भोगस्य च शरीरान्तरे प्रदेशान्तरे च जायमानत्वात् भवन्मते यागादिकर्तुः स्वर्गादिषूपभोगो न स्यात् आत्मप्रदेशस्याभिन्नस्य कर्तृत्वात् भिन्नस्यात्मान्तरस्य भोक्तृत्वात् सर्वगतत्वानुपपत्तेश्च तस्माद् विज्ञानैनित्यादेन सर्वोपपत्ति सम्भवे आत्मैकत्वपक्ष एव निर्दोष इति भावः अत एवाकाशादीनामपि विभुत्वमप्रसन्नादे सिद्धान्तेनकार्यत्वात् ॥१३६॥ इति ब्रह्मसूत्रतात्पर्ये विवरणे द्वितीयाध्यायस्य तृतीयः पादः ॥०॥

अथ तुरीयः पादः ॥

॥ तथा प्राणाः ॥१३७॥

पूर्वस्मिन् यदादि विषया उत्पत्तिः प्रतिपादिता इदानीं प्राणादि विषयो विरोधः परिहृयते तत्तेजोऽसृजत आकाशाद्वायुरित्यादौ प्राणादीनामुत्पत्तिरपादिता क्वचित्त्वानुत्पत्तिरेवैषामाम्नायते तदाह किन्तदासीदिति ऋषयो नाव ते अग्रे असदासीत् तदाहुः के ते ऋषय इति प्राणा वाव ऋषय इति अत्र प्रागुत्पत्तेः प्राणसद्भावश्रवणात् क्वचिच्चात्मनः प्राणानामुत्पत्तिः आत्मनः सर्वे प्राणा इति एवं विप्रतिपत्तौ अनियम एवेति गौणीनां प्राणादीनामुत्पत्तिरिति प्राप्ते आह अथेति यथा लोकादयः परब्रह्मण उत्पद्यन्ते तथा प्राणादयोऽपि एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चेत्यादौ श्रुतत्वात् न हि क्वचिदनुत्पत्ति श्रवणेऽपि अन्यत्र नेति वक्तुं शक्यं तस्मात् प्राणादय उत्पद्यन्ते ॥१३७॥

॥ गौण्यसम्भवात् ॥१३८॥

गौणीति कस्मिन्नु भगवो विज्ञाते इत्यादिनाऽनेक विज्ञानेन सर्व विज्ञान प्रतिज्ञा भङ्गभयात् गौण्यपि प्राणोत्पत्तिर्न सम्भवति किन्तु मुख्यैवेत्यर्थः असम्भवात् यतः एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरापः पृथ्व्यादौ जायते इत्यस्या आकाशादौ मुख्योत्पत्तिपरत्वे पूर्ववर्ति प्राणेऽप्यपि मुख्यैवोत्पत्ति नैकस्मिन्पदे क्वचिन्मुख्यमन्यत्र गौणं वेत्युभय प्रसङ्गात् तस्मात्प्राणा अपि ब्रह्मविकाराः ॥१३८॥

॥ तत्प्राक्श्रुतेश्च ॥१३९॥

इतश्च प्राणानामपि मुख्यैव जन्मश्रुतिः कुतः जायत इत्यस्य प्राणेभ्यः प्राक्श्रुतं सत् उत्तरेष्वप्याकाशादिष्वनुवर्ततेत्याह तत्प्रागिति ॥१३९॥

॥ तत्पूर्वकत्वाद्वाचः ॥१४०॥

अत्रैव प्रकरणे तेजोबन्नपूर्वकत्वं वाक्प्राणमनसां आम्नायते अन्नमयं हि सोम्य मनः आपोमयः प्राणः तेजोमयी वाक् इति अतोऽपि प्राणानां ब्रह्मविकारत्वसिद्धिः ॥१४०॥

॥ सप्तगतेर्विशेषितत्वाच्च ॥१४१॥ २अ.

उत्पत्तिः प्राणानामाख्याय तस्याख्या संख्याविचारः क्रियते केचित्सप्तप्राणाः प्रभवन्ति तस्मादिति श्रुताः अष्टौ ग्रहाः अष्टावतिग्रहा इत्यन्ताष्टौ सप्त वै शीर्षण्याः प्राणा द्वाववाञ्चौ इत्येवं नव नव वै पुरुषे प्राणा नाभिर्दशमीति दश एवं विप्रतिपत्तौ सप्तैव गतेः अवगतेः सप्त प्राणाः प्रभवन्ति तस्मादित्यत्र सप्त वै शीर्षण्याः प्राणा इति विशेषितत्वाच्च इति पूर्वपक्षमाह सप्तगतेरिति ॥१४१॥

॥ हस्तादयस्तु स्थितेऽतो नैवम् ॥१४२॥

हस्तौ वै ग्रहः स कर्मणाति ग्रहेण गृहीतो हस्ताभ्यां हि कर्म करोतीति श्रुतेः सप्तभ्यो व्यतिरिक्ताः प्राणाः उत्तरत्र दशेमे पुरुषे प्राणा आत्मैकादश इत्येकादशत्व श्रवणात् आत्माऽन्तःकरणं करणादिकारणात् इति सिद्धान्तमाह हस्तादय इति हस्तौ वै ग्रहः स कर्मणातिग्रहेणेत्यादिना सप्तव्यतिरेके स्थिते सप्तत्वं नानिनेयम् अतो नैवं मन्तव्यं सप्तैवेति सर्वेषां स्पर्शानां त्वगेकायनं इत्यत्र द्वादश चक्षुश्च द्रष्टव्यं चेत्यत्र त्रयोदश इति कथमेकादशेति न ह्येकादशभ्यः कार्यजाते भाः अधिकं

कर्मोस्ति यदर्थमधिकं करणं कल्प्येत श्रोत्रादिपञ्चग्रहणार्थं श्रोत्रादीनि पञ्च वचनादानविहरणानन्दार्थानि पञ्च सर्वार्थविषयं त्रैकाल्यं मनः एवं द्विरेकादशमनोवृत्तिभेदात् क्वचिन्मनो बुद्ध्यहंकारश्चित्तमिति एवं संख्यान्तरं वृत्तिभेदादवोहनीयम् तस्माच्छ्रुतेः कार्यतश्चैकादशैव प्राणाः ॥१४२॥

॥अणवश्च ॥१४३॥ ३ अ॰

प्राणानां धर्मान्तरमाह अणवइति एते प्राणा अणवः अणुत्वश्चैषां सूक्ष्मत्वं अनिन्द्रियत्वं परिच्छिन्नत्वं च न परमाणुत्वं कृत्स्नदेहव्याप्तिकार्यानुपपत्तेः यदि स्थूलाः मरणकाले देहान्निःसरन्तो बिलादहिरिवोपलभ्येरन् म्रियमाणस्य पार्श्वस्थैः अपरिच्छिन्नत्वे गत्यागतिश्रुतिकोपः तद्गुणसारत्वं च जीवस्य न सिध्येत् ॥१४३॥

॥श्रेष्ठश्च ॥१४४॥ ४ अ॰

मुख्यप्राणोऽपि ब्रह्मविकार एवेत्याह श्रेष्ठइति नन्व विशेषेण सर्वेषां ब्रह्मविकारत्वमुक्तमेवेति कुतः पुनर्विचारः प्रागिकाशंका परिहाराय नासदासीद् ब्रह्मसूक्ते न मृत्युरासीदमृतं न तर्हि न रात्र्या अह्न आसीत् प्रकेतः आनीदवातं स्वधया तदेकं इति मन्त्रे उत्पत्तेः प्राक् आनीदिति अननरूपप्राणकर्मोपादानात् पूर्वं प्राणोप्यस्तीति सूचयति तस्मादजः प्राणः इत्यधिकाशंकायां आनादिति विशेषणात् अप्राणोह्यमना इति च मूलप्रकृतेः प्राणादिसर्वरहितत्वस्य दर्शितत्वात् कारणसत्वप्रतिपादनार्थं एवायम् आनीत शब्दः श्रेष्ठइति मुख्यप्राणमभिदधाति प्राणो वाव ज्येष्ठश्च श्रेष्ठश्चेति नवे शक्यामस्त्व इते जीवितुमिति गुणाधिक्यश्रुतेः ॥१४४॥ ५ अ॰

॥न वायुक्रिये पृथगुपदेशात् ॥१४५॥

कोसौ मुख्यप्राण इति विचारयति न वायुक्रियइति वायु

नीतः किं प्राणा मुख्यप्राणाः उत ताभ्यामन्य एवेति तत्र यः प्रा
णः स वायुः आयवाशास्त्रान्तरान्समस्तकरणवृत्तिः प्राण
इति प्राप्ते आह न वायुः प्राणो नापि करणव्यापारः पृथगु
पदेशात् प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा
भाति च तपति च वागादिकरणेषु तान्यनुक्रम्य तत्र
पृथक् प्राणस्यानुक्रमणात् वृत्तितद्वतोरभेदात् न हि क
रणव्यापारः सत्करणेभ्यः पृथगुपदिश्यते नेति एतस्माज्जा
यते प्राणो मनः सर्वेन्द्रियाणि च खं वायुर्ज्योतिरित्यादौ
पृथगुपदेशात् यः प्राणः स वायुरिति तु अध्यात्मपञ्च
व्यूहविशेषात् प्राण उच्यते न तत्त्वान्तरमिति भेदाभेदस्य
त्युपपत्तेः ॥१८५॥

॥चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः॥१८६॥

ननु प्राणस्यापि जीववत् स्वातन्त्र्यप्रसङ्गः तत्राह चक्षुरा
दिति तु शब्दः स्वातन्त्र्यं निवारयति यथा चक्षुरादीनि राज्ञो
जीवस्य कर्तृत्व भोक्तृत्वादौ उपकरणानि न स्वतन्त्राणि
तथा मुख्यप्राणो राजमन्त्रीवज्जीवस्योपकरणभूतः कुतः
प्राणसम्वादे हि चक्षुरादिभिः सहैव मुख्यप्राणः शिष्यते
समानधर्माणां हि सहशासनं युक्तम् बृहद्रथान्तरादि
वत् आदिना संहतत्वाचेतनत्वादीनां हेतूनां ग्रहणम् ॥१८६॥

॥अकरणत्वाच्च न दोषस्तथा हि दर्शयति ॥१८७॥

ननु प्राणस्याकरणत्वे चक्षुरादीनां रूपादिवदस्यापि वि
षयान्तरं स्यात् इत्याशङ्कायां पूर्वमेकादश विषयद्वारा ए
कादश ग्रहणवत् द्वादशस्यापि अन्य प्रतिपादनं भवेत्
अप्रोत्तरं अकरणत्वेनेति न चक्षुरादिवत् विषयपरि
च्छेदकः किमर्थं तर्हि प्राणः शरीरस्थित्यर्थं अथ ह
प्राणा अहं श्रेयसे व्यूदिरे इत्युपक्रम्य यस्मिन्वः उत्क्रा
न्ते इदं शरीरं पापिष्ठमिव दृश्यते स वः श्रेष्ठ इत्यादिना त
प्राणनिमित्तां शरीरेन्द्रियस्थितिं दर्शयति ॥१८७॥

॥पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥१४८॥

इतश्चास्ति मुख्यप्राणस्य कार्यविशेषः प्राणादिपञ्चवृत्तिरूपः प्राणः उच्छ्वासादिकर्मा, अवाक् निश्वासोऽपानः, व्यानस्तयोः सन्धिः वीर्यवत्कर्महेतुः, उदानः ऊर्ध्ववृत्तिः उत्क्रान्त्यादिहेतुः, समानः समं सर्वेष्वङ्गेषु अशितपीतरसान्नयति इति पञ्चवृत्तिकः प्राणः मनोवत् अत एव जीवोपकरणत्वमपि इत्याह पञ्चेति ॥१४८॥

॥अणुश्च ॥१४९॥

अयं मुख्यः प्राणः सूक्ष्मोऽतीन्द्रियः परिच्छिन्नश्चेत्याह अणुश्चेति कैश्चिद्विभुत्वमाम्नातं हिरण्यगर्भेण प्राणात्मना न व्यात्मकेन ॥१४९॥

॥ज्योतिराद्यधिष्ठानं तु तदामननात् ॥१५०॥

ते प्राणाः किं स्वमहिम्नैव स्वकार्याय प्रभवन्त्युत देवताधिष्ठिता त्र स्वत एवेत्यङ्गीकारे तासामेव भोक्तृत्वप्रसङ्ग इति प्राप्त आह ज्योतिरादीति अग्न्याद्यभिमानी देवतादिरधिष्ठितं वागादि स्वकार्येषु प्रवर्तते कुतः तदामननात् अग्निर्वाग्भूत्वा मुखं प्राविशदित्यादिना वायुः प्राणो भूत्वा इत्यादि तथा वागेव चतुर्थः पादः साग्निना ज्योतिषा भाति च तपति चेति वक्तव्यमधिभूतञ्च वह्निस्तत्राधिदैवतमिति स्मृतेश्च ॥१५०॥

॥प्राणवता शब्दात् ॥१५१॥

यदुक्तं देवतानामेव भोक्तृत्वापत्तिस्तत्राह प्राणेति सन्ति यद्यपि देवतासु प्राणवता संघातस्वामिना जीवेन प्राणसम्बन्धः श्रुत्यावगम्यते अथ यत्रैतदाकाशमनुविषण्णं स चाक्षुषः पुरुषो दर्शनायेति अपि वशत्वात् तासामनेकत्वात् एकोऽस्मिन् शरीरे भोक्तावगम्यते प्रतिसन्धानात् ॥१५१॥

॥तस्य च नित्यत्वात् ॥१५२॥

शरीरस्य शरीरे भोक्तृत्वेन नित्यत्वं देवतानां ताः हि परस्मिन्नैश्वर्येऽवतिष्ठमाना न हीनशरीरे भोक्तृत्वं प्रतिलब्धुमर्हन्तीति श्रुतिश्च पुण्यमेवामुं गच्छति न हि वै देवान् पापं गच्छति इति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति करणपक्षस्यैव देवता न भोक्तृत्वपक्षस्येत्याह तस्य चेति ॥१५२॥

॥त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात्॥१५३॥

किं मुख्य प्राणस्यैव वृत्तिभेदा इतरे प्राणा वागादयः उत तत्त्वान्तराणि इति तत्र तत्त एतस्यैव रूपमभवन्निति श्रुते वृत्तय एव त इति प्राप्ते प्राह त इति तत्त्वान्तराण्येव वागादीनि एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणीति श्रेष्ठात्प्राणादन्यत्र भिन्नव्यपदेशात् न च मनोवज्जीनामपि इन्द्रियाणां प्राचीको एकादशत्व दर्शनात् ॥१५३॥

॥भेदश्रुतेः॥१५४॥

मुख्यात्प्राणाद्भेदे वचनान्तर मपीत्याह भेद इति तेह वाचमूचुरित्युपक्रम्य वागादीन् असुर पाप्माविध्वस्तानुपन्यस्य अथ हेममासन्यं प्राणमूचुरिति असुर ध्वंसिनो मुख्यप्राणस्य पृथगुपक्रमात् ॥१५४॥

॥वैलक्षण्याच्च॥१५५॥

युक्त्यन्तरमाह वैलक्षण्येति सुप्तेषु वागादिषु मुख्य एवैको जागर्ति इति देहधारणहेतुर्विषयालोचन वृत्तित्वमिन्द्रियाणां न प्राणस्येति लक्षणभेदोऽस्ति तस्मात् तत्त्वान्तराणि प्राणात् इन्द्रियाणि ॥१५५॥ तस्यैवनन्द्रियाणाम

॥संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्॥१५६॥

तेजोऽबन्नानाम सृष्टिमभिधायोक्तम् सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि तासां त्रिवृतं त्रिवृतमेकैकां करवाणीति तत्र किं जीव कर्तृकं नामरूप व्याकरणमुत परमेश्वर कर्तृकं तत्र अनेन जीवेनेति करणात् यथा चारेणाहं परसैन्यं प्रविश्य संकलयानीत्यादौ चार कर्तृकमेव तत्सैन्य संकलनं हेतुकर्तृकत्वात् राजात्मन्यारोपयति उत्तम पुरुष प्रयोगेण तद्वत् जीव एवेति प्राप्ते प्राह संज्ञेति

नु शब्दाव्याख्यार्थः संज्ञा मूर्तिक्लृप्तिर्नाम रूप व्याकरणम्
त्रिवृत्कुर्वत इति परमेश्वरं लक्षयति उपदेशात् त्रिवृत्करणं
तस्य निरूपणात् कर्तृत्वेन निर्देशात् इयं मनेक भूत भौतिकप्र
त्याकृति अनेक प्रकारा नाम रूपादि कृतिः सा तेजोऽबन्नकर्तुः
रीश्वरस्यैव उपदेशात् व्याकरवाणीति उत्तम पुरुष प्रयोगा
दीशस्यैव निर्देशात् जीवेनेत्यनुप्रवेश्येत्यत्रान्वयोऽव्यवहि
तत्वात् आकाशो वै नाम रूपयोर्निर्वहिता इत्यादि श्रुतेश्च॥१५६॥

॥मांसादि भौमं यथाशब्दमितरयोश्च॥१५७॥

ननु भूम्यादि सर्वं त्रिवृत्कृतं चेत् मांसमनः प्राणादीनां विलक्ष
णत्वानुपपत्तिरत आह मांसादीति अन्नमशितं त्रेधा वि
धीयते तस्य यः स्थविष्ठो धातुः तत्पुरीषं भवति यो मध्य
मः तन्मांसोऽणिष्ठस्तन्मनो भवतीति त्रिवृत्कृता भूरेव
वी ह्याद्यन्न रूपेणाद्यते तस्य स्थूलं रूपं पुरीषं मध्यमं मांसं
सूक्ष्मांशो मन इति स्थूल भागस्य मूत्रं मध्यमस्य लोहितं सू
क्ष्मं प्राणः अशितास्तेजः स्थूल भागस्य अस्थीति मध्यमो मज्जा
सूक्ष्मो वाक् इत्यादि श्रुतेः सूक्ष्मत्वादि कृतमेव वैलक्षण्यं
परन्तु त्रिवृत्कृतमेवेति भावः एवं यथाशास्त्रं अप्तेजसोरपि बोध्यम्॥

॥वैशेष्यात्तु तद्वादस्तद्वादः॥१५८॥

यदि सर्वं एव त्रिवृत्कृतं तत्कथं इदं तेजः इदं जलमित्यादि व्यवहार
स्तत्राह वैशेष्यादिति विशेषस्य भावो वैशेष्यं आधिक्यं अग्नेस्तेजो
भूयस्त्वं उदकस्याप् भूयस्त्वं पृथिव्या अन्न भूयस्त्वं इत्येवं
त्रिवृत्कृतेष्वपि तत्तद्भागानां वैशेष्यात्तदीयत्वव्यवहारः त्रि
गुणात्त्वात् तस्माद्वैशेष्यात्तद्वादस्तद्वादः पदाभ्यासोऽध्यायस
माप्त्यर्थः॥१५८॥ इति ब्रह्मसूत्र तात्पर्य विवरणे द्वितीयाध्या
यस्य चतुर्थः पादः॥ समाप्तश्च द्वितीयाध्यायः॥

॥तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्॥१॥

द्वितीयाध्याये श्रुतिस्मृतिन्यायविरोधो ब्रह्मदर्शने परपक्षाश्च सापक्ष परिहृताः जीवव्यतिरिक्तानि तत्त्वान्युपकरणानि जीवब्रह्मणो जायन्त इत्याद्युक्तं इदानीं सोपकरणजीवस्य संसारगतिप्रकारः तदवस्थान्तरं ब्रह्मसतत्त्वं विद्याभेदाभेदौ गुणोपसंहारौ सम्यग्दर्शनोपायादि तृतीये चिन्त्यते प्रथमपादे पञ्चाग्निविद्यामाश्रित्य संसारगतिभेदः प्रदर्श्यते जीवः सेन्द्रियप्राणोऽविद्याकर्मपूर्वप्रज्ञापरिग्रहः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यते इति श्रूयते स किं देहबीजैर्विनैव उत सूक्ष्मैः सम्परिष्वक्तः इति अत्र चिन्त्यते तत्र करणोपादानवत् भूतसूक्ष्मोपादानस्याऽश्रुतत्वात् नाकाशे वच्चक्षुरादीनामिव ग्रहणात् सर्वत्र तेजोमात्रासमभ्याददान इत्यत्रापि मात्राशब्देन करणोपादानात् यत्रैव देहारम्भस्तत्रैव भूतानां सुलभत्वात् तेषां नयनं व्यर्थं तस्मादसम्परिष्वक्तो यातीति प्राप्ते ब्रूमः तदन्तरेति देहान्तरप्रतिपत्तौ भूतमात्रसम्परिष्वक्तो रंहति गच्छति कुतः प्रश्ननिरूपणाभ्याम् वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति प्रश्ने द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीरुक्त्वा इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्तीति निरूपणात् प्रतिवचनात् तस्मादद्भिः परिवेष्टितो यातीति गम्यते अद्भिरितरेषां भूतानामुपलक्षणं एवं च देहान्तरं त्यक्त्वा शुकादिवदाशु न्य वृक्षान्तरमिव देहान्तरं गच्छतीत्यादिकल्पनाः निरस्ताः श्रुतिविरोधात्॥१॥

॥ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥२॥

अप्शब्दमात्रश्रवणात् कथं सर्वैर्भूतैरिति शंकां वारयति त्र्यात्मकेति त्र्यात्मिका आपः त्रिवृत्करणश्रुतेः त्र्यात्मकश्च देहः त्रयाणां तेजोबन्नानामुपलब्धेः वातपित्तकफैर्धातुभिश्च त्रिधातुत्वात् तस्मात् यारणमाक्षेपको अप्शब्दः अपाम्भूयस्त्वात् अप् इत्येनेन व्यवहारः॥२॥

॥प्राणगतेश्च॥३॥

प्राणानां देहान्तरे गतिश्रुता तमुत्क्रामन्तं प्राणोनुत्क्रामतीत्य तो प्राणानामाश्रयमविना गत्यसम्भवादतोऽपि भूतान्तरोपसृष्टानामेषां गतिर्न हि निराश्रया गच्छन्तीति छान्तिवा जीवताऽदर्शनादित्याह प्राणेति॥३॥

॥अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात्॥४॥

ननु यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति वातं प्राण इत्यादि श्रुतेः कथं सह गच्छन्तीत्याशंका अग्न्यादिगमनं गौणम् ओषधींर्लोमानि वनस्पतिन्केशा इत्यादौ तदसम्भवात् वागोना गाद्यधिष्ठातृणामग्न्यादिदेवतानां उपकारनिवृत्तिमपेक्ष्य गच्छन्तीति न तु स्वरूपतयो भवतीत्युपचर्यते इत्याह अग्न्यादि गतीति॥४॥

॥प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः॥५॥

ननु कथं पञ्चम्यामाहुतावापः पुरुषवचसः इत्थं प्रथमेऽपामश्रुतत्वात् द्युलोकप्रभृतिषु पञ्चस्वग्निषु श्रद्धादि पञ्चानां होमद्रव्यत्वेन उत्तरेषु च पर्जन्यादिचतुर्षु सोमादि चतुर्णामब्बहुलत्वोपपत्तेश्चतुर्णामाप्भूयस्त्वात् अपत्वं प्रथमे तु श्रद्धायाः कलावत्वमभावनिश्चयरूपत्वेनापत्वाभावात् अयुक्तमपञ्चम्यामपां पुरुषभाव इत्याशंका प्रथमे श्रोता एवापः श्रद्धाशब्देनोच्यन्ते उपपत्तेः एवं सति एकवाक्यत्वमुपपद्यते अन्यथा प्रश्न प्रतिवचनाभावानुपपत्तेः तासो मत्वष्ट्यादि स्थूलीभवदब्बहुलं श्रद्धाकार्यं कारणस्यापि श्रद्धाया अपत्वं गमयति न ह्यत्र पश्वादिभ्योऽन्य हृदयानीव जीवधर्मो निश्चयविशेषः श्रद्धाग्रहीतुं शक्या होमायोपादातुं मशक्यत्वात् अतः उत्तरकार्यानुरोधात् अप एवात्र श्रद्धा श्रद्धा वै श्रद्धा वा आप इति श्रुतेः तनुत्वेन श्रद्धेव श्रद्धा इत्युक्तं मंचशब्द इव मञ्चस्थेषु श्रद्धाहेतुत्वाच्चास्थी आपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे इति श्रुतेरित्याह प्रथम इति॥५॥

॥अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः॥६॥

ननु आपः श्रद्धादिक्रमेणापञ्चम्यां पुरुषाकाराः भवन्तु न तु तत्सम्परिष्वक्ता जीवा रंहन्ति अश्रुतत्वात् अतोऽयुक्तं रंहतीति परिष्वक्त इति आशंक्याह अश्रुतत्वादिति नैष दोषः इष्टादिकारिणां प्रतीतेः अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति इत्युपक्रम्य ते धूमादिना पितृयानेन चन्द्रप्राप्तिं कथयति आकाशाच्चन्द्रमसमेष सोमो राजा, त एवात्रापि प्रतीयन्ते तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा सम्भवतीति श्रुतिसामान्यात् तेषां इष्टापूर्ते यागादिसाधनदधिपयः प्रभृति द्रव्यं द्रवमयत्वात् प्रत्यक्षमेवापः सन्ति ता आहवनीये हुताः सूक्ष्माऽदृष्टरूपाः सत्यः इष्टापूर्तादिकारिणं आश्रयन्ते तेषां शरीरं पितृमेधविधानेनान्त्ये [illegible] ऽग्नौ ऋत्विजो जुह्वति असौ स्वर्गाय लोकाय स्वाहेति ततस्ताः श्रद्धायुक्तकर्मसमवायिन्यः आहुतिमय्यः आपोऽदृष्टरूपाः सत्यः भोक्तृपुरुषमावेष्ट्यामुं लोकं फलदानायनयन्तीति यत्तदत्र जुहोतिनाभिधीयते श्रद्धां जुह्वतीति तस्मादाहुतिमयीभिरद्भिः सम्परिष्वक्तो रंहतीति ॥६॥

॥भाक्तं वाऽनात्मवित्त्वात्तथाहि दर्शयति॥७॥

कथम्पुनरिष्टादिकारिणां स्वर्गफलोपभोगाय रंहणं सम्भवति यतस्तेषां धूमादिवर्त्मना चन्द्रमसं गतानामन्नभावं दर्शयति एष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति ते चन्द्रं प्राप्यान्नं भवन्ति इति च देवैर्भक्षितत्वात् कथं तेषां फलोपभोगः व्याघ्रादिभक्षितानामिवेति प्राप्ते आह भाक्तमिति वशब्दो व्यावृत्त्यर्थः भाक्तमेषामदनीयत्वं न मुख्यं किन्तु उपभोगसाधनत्वमात्रं मन्त्रीवत् विशोऽन्नं राज्ञां पशवोऽन्नं विशां इतिवत् भाक्तम् स्त्रीपुत्रभृत्यादिगणैरिव इष्टादिकारिभिर्यत्सुखविहारादि तद्देवानां भक्षणम् न मोदकादिवत् चर्वणं ([illegible]) निगरणं वा न ह वै देवा अश्नन्ति न पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति देवानां चर्वणादिव्यापारप्रतिषेधात् इष्टादिकारिणां देवान्प्रति गुणभावोपगतानामप्युपभोगउपपद्यते राजोपजीविनामिव अनात्मविदो देवोपभोग्यतां श्रुतिरपि दर्शयति तस्मात् रंहणमुपपद्यते ॥७॥

॥ कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवञ्च ॥ ८॥

इत्यादिकारिणा चन्द्रमण्डलं गतानां भोगानन्तरं ततोऽवरोहणं भुक्तं यावत्सम्पातमुषित्वाथैतमध्वानं पुनर्निवर्तन्ते यथेतमिति रमणीयचरणा ब्राह्मणादियोनिं कपूयचरणाः श्वादियोनिमाप्नुवन्ति तत्र भुक्तकृत्स्नकर्मणो निरनुशयाः अवरोहन्ति उतानुशयिष्ट कर्मणः इति निरनुशया इति यावत्सम्पातमिति विशेषणात् सम्पातः कर्म, तस्मान्निरनुशया एव इत्याशंक्य दृष्टस्मृतिभ्यां तद्यइह रमणीयचरणा अभ्याशो ह यत्ते रमणीयां योनिमापद्येरन् ब्राह्मणयोनिं वा क्षत्रिययोनिं वेत्यादि दर्शनात् चरणशब्देनानुशयः स्मृतिरपि वर्णाश्रमाश्च कर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तवित्तसुखमेधसो जन्म प्रपद्यन्ते इति सानुशयानामेवावरोहणं दर्शयति अनुशयो नाम स्वर्गार्थस्य कर्मणोऽवशेषः कश्चित्स्नेहभाण्डानुशक्तस्नेहवत् न ह्यवशेषमात्रेण चन्द्रोऽवस्थितिः सम्भवति सेवकस्य भुक्तसर्वसामग्रीकस्य पादुकामात्रावशेषस्य देशान्तरे नवस्थानमिवेति तथा चपूर्वकृतस्थूलानि नानावृत्तिभिरनुभूय सूक्ष्मेण भुक्तेन विशिष्टे युक्तः अवरोहति यथा समानेमानि ध्यसोऽपि स्थूलं रूपमभिव्यनक्ति न सूक्ष्मं तद्वत् तत्त्वावरोहणम् यथागमनं तद्विपरीतक्रमेणाऽप्राप्युपसंख्यानात् तत्स्याद्यसम्भवणात् ॥ ८॥

॥ चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजिनिः ॥ ९॥

ननु अनुशयः सूक्ष्मं कर्म चरणमाचरणं यथाकारी यथाचारीति श्रुतो भेदेनोक्तत्वात् तस्माच्चरणादेव योन्यापत्तिश्रुतेर्नानुशयात् रमणीयचरणा रमणीयां योनिमिति श्रुतेरित्याशंक्य अनुशयोपलक्षणार्था चरणश्रुतिरिति कार्ष्णाजिनिर्मन्यते इत्याह चरणादिति ॥ ९॥

॥ आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥ १०॥

ननु चरणं शीलमिति प्रसिद्धम् न, कथमनुशयश्चरणमित्याशंका कर्मज्ञानं हि चरणापेक्षं न स्वाचारहीनः कश्चिद्धिकृतः आचारहीनं न पुनन्ति वेदा इति स्मृतेः तत्पावककर्मणः आचर

तच्चरणो प्रत्याय

णां शीलं कर्मणो विना न तत्] न स्यात् कर्मापि तच्छीलं न भूतं कर्मयोन्याय
नौ कारणमिति तच्छीलं न हि पदभ्यां चलितुं समर्थः तानुभ्यां रहि
तुं अर्हतीति इत्याह आनर्थक्यमिति

॥सुकृत दुष्कृते एवेति बादरिः ॥११॥

बादरिस्तु सुकृतदुष्कृते एवं चरणशब्देन निर्दिश्यते इति मन्यते कर्म
चरणयोब्राह्मणपरिव्राजक न्यायः रमणीयचरणाः रमणीयकर्माणः
इत्यर्थ इत्याह सुकृतेति ॥११॥

॥अनिष्टादिकारिणामपि च श्रुतम् ॥१२॥

इष्टादिकारिणां चन्द्रमण्डले गमनमुक्तं अनिष्टादिकारिणोऽपि चन्द्र
गच्छन्ति न वेति तत्र अनिष्टादिकारिणोपि गच्छन्तीति केचित्
स्मात्सो कात्प्रयन्ति सर्वे ते चन्द्रमसं गच्छन्तीति कौषितकि श्रुतेरित्या
शङ्क्य अनिष्टादीति ॥१२॥

॥संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥१३॥

समाधत्ते संयमनेत्विति नैतत् सर्वे चन्द्रमसं गच्छन्तीति यतः भोगायैव
तत्रारोहणं न निष्प्रयोजनं प्रत्यवरोहायवा नहि पुण्यफलभोगं विना
निष्प्रयोजनं पतनायैव वा कश्चित् आरोहति भोगश्चानिष्टकारिणां
चन्द्रमसि नास्ति तेषां संयमने यमपुरे भोगोक्तेः एवमनुभूयेतरेषामारोहा
वरोहौ, तद्गतिदर्शनात्, नाचिकेतसम्प्रति यमवचनदर्शनात् न साम्
परायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढं अयं लोको नास्ति
पर इति मानी पुनः पुनर्वशमापद्यते मे इति, वैवस्वतं संगमनं जनानां,
यमं राजानं हविषा इत्यादि दर्शनाच्च ॥१३॥

॥स्मरन्ति च ॥१४॥

किञ्च मनुव्यासप्रभृतयः संयमने यमायत्तं कपूयकर्मविपाकं स्म
रन्ति नाचिकेतोपाख्यानादिषु इत्याह स्मरन्ति चेति ॥१४॥

॥अपि च सप्त ॥१५॥

रौरवप्रमुखाः सप्त नरका पापफल भोगभूमित्वेन पौराणिकाः स्म
रन्ति इति कथं चन्द्रं प्राप्नुयुरित्याह अपि चेति

॥तत्रापि च तद्व्यापारादविरोधः ॥१६॥

ननु कथं तत्र यमाधीनायातनाः चित्रगुप्तादयोऽधीश्वराः
स्मर्यन्ते इति पापसत्रापि यमप्रयुक्ता एव तेऽधीश्वराः इते

तत्रापि प्रयोजकत्वेन यमस्यैवाधिकारत्वमित्याह तत्राप्रयोगी

||विद्याकर्मणोरिति तु प्रकृतत्वात् ||१७||

पञ्चाग्निविद्याया प्रश्नप्रतिवचनावसरे श्रुतं श्रयते यो: पथोर्नैकतरेणाच न तानीमानि क्षुद्राण्यसकृदावर्तीनि भूतानि भवन्ति जायस्व म्रियस्वेत्येतत्तृतीयं स्थानं तेनासौलोको न पूर्यत इति। तेन योर्देवयानपितृयानपथो ग्रहणं प्रकृतत्वात् विद्यासाध्ये देवयानेऽधिकृताः कर्मिणः पितृयानतया न अधिकृतानां क्षुद्रजन्तूनां असकृदावर्ति तृतीयः पन्था भवति अतोऽपि अनिष्टादिकारिणां न चन्द्रलोकम् इत्याह विद्येति

^ अवरोहाभ्युपगमात् सम्पूर्णोपपत्तिरिति चेन्नाश्रुतत्वात्—

||न तृतीये तथोपलब्धेः ||१८||

ननु कीटादीनामवरोहणाभ्युपगमान्न सम्पूर्यत इत्यस्य विरोध इत्याशंक्याह अवरोहेऽपि तिरुमृतानादित्यासति तृतीयस्थानेऽत्यन्तर्यत्नप्रसंगात् ||१८||

|| न तृतीये तथोपलब्धेः ||१९||

ननु तेषामपि चन्द्रमसाऽसह्यैव तृतीयस्थानगमनमस्तु देहान्तरलाभाय संख्यानियमस्तथोपलब्धेः विनैव संख्यानियमं, पूर्वोक्तप्रकारेण तृतीयस्थानप्राप्तेः जायस्व म्रियस्वेति मनुष्यदेहहेतुत्वेन संख्याश्रवणात् आरोहावरोहाभ्यर्थ्यत्वात् असौलोको न सम्पूर्यत इति श्रुतत्वाच्चेति ||१९||

||स्मर्यतेऽपि च लोके ||२०||

सर्वत्राहुतिर्नियमः इति निदर्शनेनाह स्मर्यत इति लोके धृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनामयोनिजत्वं द्रोणादीनां योषित् विषया अहुतिर्नास्ति धृष्टद्युम्नादीनां योषित्पुरुष विषये द्वे अप्याहुती न स्तः तद्वदत्रापि एवमलाकापि रतः सकम्बिना इति ||२०||

||दर्शनाच्च ||२१||

जरायुजाण्डजस्वेदजोद्भिज्ज चतुर्विधभूतग्राममपि स्वेदजोद्भिज्जयोर्ग्राम्यधर्ममन्तरेणोत्पत्तिदर्शनादाहुतिसंख्यानादर इत्याह दर्शनादिति ||२१||

||तृतीयशब्दावरोधः संशोकजस्य ||२२||

ननु श्रुत्यन्तरे जीवजमण्डजमुद्भिज्जमिति त्रैविध्यदर्शनात् कथं चतुर्विधत्वमित्याशंक्य उद्भिज्जशब्देन स्वेदजस्यापि संग्रहात् स्वेदजोद्भिज्जयोर्भूम्युदकोद्भेदप्रभवत्वस्य तुल्यत्वात् न विरोध इत्याह तृतीयेति ||२२||

॥ तत्साभाव्यापत्तिरुपपत्तेः ॥ २३ ॥ अ४

सानुशयानामवरोहप्रकारमाह श्रुतिः, यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवति अभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षतीति, तत्राकाशादिभावः, किं स्वरूपमेव, उत साम्यमात्रमिति, स्वरूपमेवेति प्राप्ते, साभाव्यमिति चन्द्र मण्डले ये चन्द्रमयं शरीरमुपभोगार्थमासीत् तत्प्रविलीयमानं सूक्ष्ममाकाशसमं सूक्ष्मम्भवतीत्युक्त उपपत्तेः, नह्यन्यस्यान्यभावो मुख्यः, गगनस्वरूपत्वे च सति वाय्वादिवदवरोधो न सम्भवति, विभुना चाकाशेन नित्यसम्बन्धात् सादृश्येनैवोपपत्तेः ॥ २३ ॥

॥ नातिचिरेण विशेषात् ॥ २४ ॥ अ५

प्राक् व्रीह्यादिभावापत्तेः गगनादिसादृश्येन दीर्घकालमवस्थाय यानुभावादिरुत्तारूयमाणेऽपि नियमो नास्तीति प्राप्ते आह नातीति अल्पमल्पं कालं गगनादिसदृशो भूत्वा वर्षधाराभिः सह इमां भूमिमापतन्तीति विशेषदर्शनात् [व्रीह्या]दिभावोत्तरं भूत मतो वै खलु दुर्निष्प्रपतरं इतीतकारस्यैकोऽलुप्तः छान्दसत्वात् दुर्निष्प्रपतनतरं दुःखतरं व्रीह्यादिभावानिःसरणम् भवति, यर्थेन पूर्वं सुखनिःसरणम् लभ्यते तस्मात्प्रागल्पेनैव कालेनावरोहः ॥ २४ ॥

॥ अन्याधिष्ठितेषु पूर्ववदभिलापात् ॥ २५ ॥ अ६

ननु व्रीह्यादिस्थावरदेहाभिमानिनः तत्र सुखदुःखभाजो भवन्तु, अन्यजीवाधिष्ठितेषु व्रीह्यादौ अनुशयिनः इति संशये संसर्गमात्रं तद्वदेवेत्यभिप्रायात्, यथाकाशादिप्रवर्षणात् न तेषु किञ्चित्कर्मव्यापारः, परमप्रशस्ते एव व्रीह्यादावपि न स्यात् तत्र सुखदुःखादिभागित्याह अन्येति ॥ २५ ॥

॥ अशुद्धमिति चेन्न शब्दात् ॥ २६ ॥

ननु पशुहिंसादियोगाद्यागादिकर्माशुद्धं अनिष्टफलमिति तस्मान्मुख्यमेव व्रीह्यादिजन्मानुशयिनामस्तु इत्याशङ्क्याह अशुद्धमिति नेयं हिंसाऽधर्मः, धर्माधर्मयोः शास्त्रैकगम्यत्वात् य एवान्यत्र धर्मः स एवान्यदेशकालादावधर्मः, शास्त्रादेव याज्ञीय हिंसायां धर्मत्वं कथमुपपन्नं भवेत्, न हिंस्यात् सर्वा भूतानि इत्युत्सर्गतो निषेधः, तदपवादोऽग्नीषोमीयं पशुमालभेत, उत्सर्गापवादयोर्व्यवस्थितविषयत्वं तस्मात् विशुद्धं वैदिकं कर्मेति न तत्फलं जातिस्थावरत्वं न च श्वसूकरादि—

१ रतः सिग्योगाय ॥ २ किं च प॰ तो ब्रीह्यादिभाव रमनुशयिनो रेतः ॥

148

जन्मतः फलं तस्य कपूयचरणानधिकृत्योक्तं वा तत्र ब्रीह्यादिसंस
र्गमात्रमनुशयिनां[2] सिद्धभाव आम्नातो यो यो ह्यन्नमत्ति यो रेतः सि
ञ्चति तद्भूय एव भवतीति च तत्रापि ब्रीह्यादिसंसर्गमात्रं न चात्र
मुख्यो रेतः सिग्भावः संभवति चिरजातः प्राप्तयौवनो रेतः सिग्भवति
कथमनुपचरितं तद्भावं प्रतिपद्यमानाननुशयिनां प्रतिपद्येत
तो रेतः सिग्योगमात्रं तत्राप्यवश्यं ब्रीह्यादियोग एवेत्यविरोध
इत्याह रेतः सिगिति ॥२६॥

॥योनेः शरीरम् ॥२७॥ इति तृतीयाध्यायस्य प्रथमः पादः

रेतः सिग्भावानन्तरं योनौ निषिक्ते रेतसि योनेरधि शरीरमनुश
यिनामनुशयफलोपभोगाय जायत इत्याह योनेरिति रमणीय
चरणा रमणीयां इति तस्मादवगम्यते नात्र ब्रीह्यादिभावा
वसरे तच्छरीरमेव सुखाद्यन्वितं इति संश्लेषमात्रं तज्जन्मेति
सिद्धम् ॥२७॥ इति ब्रह्मसूत्रभा॰ पर्यविवरणे तृतीयाध्याये सा
धननिरूपणे प्रथमः पादः ॥

॥अथ द्वितीयः पादः ॥

॥सन्ध्ये सृष्टिराह हि ॥१॥

जीवस्य संसारगतिभेदप्रदर्शनानन्तरं तस्यैव भेदा अवस्थाभेदाः प्र
दर्श्यन्ते स यत्र प्रस्वपितीत्युपक्रम्य न तत्र रथा न रथयोगा न पन्थानो
भवन्त्यथ रथान्रथयोगान्पथः सृजत इत्यादि तत्र प्रबोधे इव स्वप्ने
ऽपि पारमार्थिकी सृष्टिरुत मायिकी इति प्रबोधसम्प्रसादस्थानयो
र्द्वयोर्लोकयोः स्थानयोर्वा सन्ध्यौ भवतीति सन्ध्यं तस्मिन्सन्ध्ये स्थाने
स्वप्ने तथ्यैव सृष्टिः अथ रथान इत्यादिश्रुतिराह यत इत्याशङ्कते
सन्ध्य इति ॥१॥

॥निर्मातारं चैके पुत्रादयश्च ॥२॥

अपि च केचिच्छाखिनः सन्ध्ये स्थाने कामनिर्माणारं आत्मान
मामनन्ति य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण
इति पुत्रादयश्च कामाः कामानां त्वा कामभाजं करोमि इति
दर्शनात् प्राज्ञकर्तृकप्रकरणात् प्राज्ञः स्रष्टा जागरितस्थाना

प्राक् ब्रह्मज्ञानात् व्यवस्थिति; स्वाप्निकस्तु प्रतिदिनं बाध्यते अ
तो वैशेषिकमिदं सन्ध्यास्य मायामात्रत्वमुक्तम् यदप्युक्तं प्राज्ञस्य
तस्य निर्मातृत्वे तदसत् पुरुषं कामं कामं पुरुषे स्वयं विहृत्य स्वयं निर्माय
स्वेन भासा स्वेन ज्योतिषा प्रस्वपितीति जीवस्य व्यापारश्रवणात् य
एष सुप्तेषु जागर्ति इति कामानिर्माता जीव: श्रुत: तस्यैवानुवाक्य
शेषेण तदेव शुक्रं तद्ब्रह्मेति ब्रह्मभाव उपदिश्यते तज्जीवस्य
ब्रह्म पाद्य व्यापारस्तु न प्रतिषिध्यते इत्याशङ्कायां प्राह सूत्र
कृत्सूत्रे ॥४॥

॥पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥५॥

ननु जीवांश ईश्वरांशश्च अग्निविस्फुलिङ्गवत् तयो: समानज्ञानैश्व
र्यशक्तौ एवम् सामर्थ्यात् सांकल्पिको स्वप्नरथादिस्रष्टृत्वसाध्यो
भविष्यतीति प्राप्ते प्राह परेति सत्यप्यंशांशिभावे प्रत्यक्षमेव
जीवस्येश्वरविपरीतधर्मत्वं ईश्वरसमानधर्मत्वं तु अविद्यादि
व्यवधानात्तिरोहितं तदभिध्यायतो यतमानस्य विधूतध्वान्तस्ये
श्वरप्रसादात् संसिद्धस्य कस्यचिदाविर्भवति न स्वभावत: सर्वस्या
विर्भवतीति कुत: ततो हि ईश्वरस्वरूपापरिज्ञानाद्बन्ध: तत्परिज्ञानान्मो
क्षो हि ॥५॥

॥देहयोगाद्वा सोऽपि ॥६॥

कुतस्ताहि ईश्वरत्वं तिरस्कृतं ज्ञानैश्वर्यं भवतीति तत्राह देहेति
सत्यमेवैतत् तथापि अविद्याकृतनामरूपदेहयोगादिहेन्द्रिय
मनोबुद्धिविषयवेदनायोगाद्वा सतिरस्कृतं वं भवति यथाग्नेर्द
हनप्रकाशनसमर्थस्याप्यरणिगतस्य दहनप्रकाशने तिरोहिते
भस्मच्छन्नस्यापि तद्वद्विवेककृतस्तिरस्कार: नाशङ्केत जीवेश्वर
योरन्यत्वाशंकाच्यावर्त्य: ॥६॥

॥तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥७॥ अ२

स्वप्नावस्थामुक्त्वा सुषुप्तिमाह तदभाव इति यत्रैतत्सुप्त: समस्त:
सम्प्रसन्न: स्वप्नं न विजानाति आसु तदा नाडीषु सृप्तो भवति तामि: प्र
त्यवसृप्य पुरीतति शेते यदा सुप्त: स्वप्नं न कञ्चन पश्यति अथास्मि
न्प्राण एवैकधा भवति सता सोम्य तदा सम्पन्नो भवति प्राज्ञेनात्म
ना सम्परिष्वक्तो न बाह्यं किञ्चन वेदनान्तरमिति च तत्र येतानि
नाड्यादीनि परस्परनिरपेक्षाणि भिन्नानि सुषुप्तिस्थानानि उत
परस्परापेक्षयैकमेव सुषुप्तिस्थानमिति

तत्रैककार्यत्वाद्विकल्पानि नद्यः कार्या नां व्रीहियवादीनां परस्परापेक्षाना ड्यादीनां चैकार्थतासु सोऽद्रवयते नाडीषु सृप्तो भवति पुरीतति शेते इत्यादिषु सप्तमीति निर्देशात् सति सम्पद्य न विदुरिति कदाचित् किमित्स्यानं कदाचित् ह्यन्यत् स्वापाय सर्पतीति प्राप्ते आह तद्भाव इति दर्शनाभावः सुषुप्तं नाडीषु आत्मनि च समुच्चये नेतानि नाड्यादीनि स्वापायो वेत्ति न विकल्पेन जन्कुतः सर्वे षामेव सुप्तिस्थानत्वं भूयते तत्समुच्चये सम्भवति विकल्पपक्षबाधः स्यात् सप्तमीभिर्देशमात्रे समानेऽपि नैकार्थत्वं प्रासादे शेते पर्यङ्के शेते इत्यादिवत् श्रुतिरीतितिब्रह्मणि चशेते इति समुच्चयः प्राणाः एवैकधा भवन्तीति प्राणो ब्रह्म नाडीद्वारा ब्रह्मणेवावेति एतेषु एवं य एषोऽन्तर्हृदय आकाशस्तस्मिन् शेत इत्यादीनामप्येकवाक्यता ओणोसुप्तिस्थानानि कीर्तितानि नाड्यः पुरीतद्ब्रह्मेति तत्रापि द्वे द्वारमात्रं ब्रह्मैव स्थानम् ॥७॥

॥ अतः प्रबोधोऽस्मात् ॥८॥

यत आत्मैव सुप्तिस्थानमत एवास्मादात्मनः प्रबोधः कुतएतदगादिति प्रश्नप्रतिवचनावसरे यथाग्नेर्विस्फुलिङ्गा व्युच्चरन्ति एवमेवैतस्मादात्मनः सर्वे प्राणा इत्यादिना सत आगत्य न विदुः सत आगच्छामह इति च सुषुप्तिस्थानविकल्पे आत्मन एव प्रबोध इति नोपपद्यते इत्याह अत इति ॥८॥

॥ स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥९॥

य एव सति सम्पन्नः स एव प्रतिबुध्यते उत स वान्यो वा इत्यनियमे यथा कश्चिज्जलबिन्दुः जलराशौ प्रतिक्षिप्तो राशिरूपः पुनरुद्धरणे स एव बिन्दुरिति न नियमः स चेहापीति प्राप्ते आह स एवेति कुतः कर्मानुस्मृतिशब्दविधिभ्यः पूर्वेद्युरनुष्ठितस्य कर्मणः परेद्युः शेषमनुतिष्ठति तस्मादेक एव पूर्वानुभूतस्य प्रबोधोत्तरस्मरणे एकत्वे सम्भवतः नह्यन्योऽनुभवति अन्यः स्मरति पुनः प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैव सर्वाः प्रजा अहरहर्गच्छन्त्यः इति शब्दात् कर्मविद्याविधिभ्यश्चैवम् अन्यथा विधयो अनर्थकाः स्युः अन्यात्थानपक्षे सुषुप्तमात्रो मुच्येतेत्यापत्तेः तस्मात्स एवोत्तिष्ठतीति ॥९॥

152

अ४

॥मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥१०॥

ति स्त्रस्थानत्रयस्यावस्थाः जाग्रत्स्वप्नसुषुप्तयः चतुर्थी शरीरादपसृप्तिर्नीतः पञ्चमी अवस्थास्तीति मुग्धो मूर्छितः किमवस्थेति चेन्न तत्रान्यतमावस्थेत्यासे आह मुग्ध इति जाग्रत्स्थानं स्वरूपं मुग्धतायामिन्द्रियैर्विषयानीक्षणात् न चेषुकारवत् व्यासक्तमनानान्यान्निवयान् मुग्ध इक्षतेति इषुकारो हि इषुमेव तावत्कालमुपलभ्यमानो ऽभून्मुग्धस्तु अन्धे तमसि अहमेतावन्तं कालमासिषीति नकिञ्चिदवदिषमिति अज्ञानमभिनयति धरायायामुपतति अतो न व्यासक्तमानसत्वं मुग्धत्वं नापि स्वप्नस्थानः निःसंज्ञत्वात् नापि चतुर्थी मरणावस्था तस्याम्प्राणोष्मणोरदर्शनात् नापि सुषुप्तिर्विलक्षणत्वात् मूर्छितः कदाचिच्चिरमपि नोच्छ्वसिति सवेपथुश्च भयङ्करवक्त्रो विस्फारितनेत्रः नैवं सुषुप्तः यतः पाणिपेषणमात्रेणोत्तिष्ठति अतः परिशेषादर्धसम्पत्तिः मुग्धतेति न चोपाध्युपरमाद्भुक्तिवत् सर्वब्रह्मसम्पत् नार्धसम्पन्नश्चार्धं सम्पन्नो जीवस्य ब्रह्मणा पञ्च विवक्षितः ॥ किन्तु अर्धेन सुषुप्तपक्षस्य मुग्धत्वं अर्धेन अवस्थान्तरपक्षस्येति अर्धसम्पदं ब्रह्मविद इच्छन्ति एवञ्च पञ्चमी अवस्था लोके आयुर्वेदेन प्रसिद्धत्वात् नातिजरायते ॥ १०॥

अ५

॥न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥११॥

यत्र ब्रह्मणा सुषुप्त्यादिषु जीव एकी उपाध्युपरमात् प्राप्नोति तस्य ब्रह्मणो स्वरूपं निर्धार्यते सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरस इति सविशेषलिङ्गं अस्थूलमनण्वह्रस्वमदीर्घमित्यादि निर्विशेषलिङ्गमतो भयलिङ्गं ब्रह्म उभयलिङ्गं उतान्यतरलिङ्गं मुन्यनुग्रहादुभयलिङ्गमिति प्राप्ते आह न स्थानतो न स्वत उभयमुपपद्यते विरोधात् नापि स्थानतः पृथिव्याद्युपाधिना अपमं न ह्युपाधिना अन्यादृशं भवति न च स्वच्छः स्फटिकोऽलक्तकादिना अस्वच्छः अतोऽन्यतरपरिग्रहे समस्तविशेषरहितं निर्विकल्पं ब्रह्म सर्वत्र ब्रह्मवाक्येषु अशब्दमस्पर्शमरूपमव्ययं इत्यादि निरस्तसर्वविशेषमेवोपदिश्यते अतः ननु भिन्ना हि प्रतिविद्यं ब्रह्माकारा उपदिश्यन्ते चतुष्पाद् ब्रह्म षोडशकलं वामनीभूत मनीषि वैश्वानरं त्रैलोक्यशरीरं इत्यादौ तस्मात् सविशेषमेवेत्याशंक्याह न भेदादिति कुतः प्रत्येकं अतद्वचनात् पन्युपाधिभेदं ब्रह्मभेदं एव ब्रह्म तः भावयति भेददर्शनं निन्दापूर्वकमभेददर्शनमामनन्ति

मनसैवेदमाप्तव्यं नेह नानास्ति किंच मृत्योः स मृत्युमाप्नोति यश्चायम
स्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीर
स्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मेत्यादि श्रुतेर्नाभि
न्नाकारः शास्त्रीयः ॥११॥ ~~अपि चैवमेके~~ ॥ अपि चैवमेके ॥१२

~~(॥न भेदादिति चेन्न प्रत्येकमतद्वचनात्॥१२॥~~

किञ्चैके शाखिनः मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति भोक्ता भो
ग्यं प्रेरितारं च मत्वा सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत् इत्याह अपि चेति ॥१२॥

॥ अरूपवदेव हि तत्प्रधानत्वात् ॥१३॥

ननु साकारश्रुत्या सविशेषमेवाकिं न स्यात् अत आह अरूपेति अरूपमे
व कुतः तत्प्रधानत्वात् अस्थूलमनण्वित्यादीनि वाक्यानि
निष्प्रपञ्चब्रह्मात्मतत्त्वप्रधानानि नार्थान्तरप्रधानानीति व्यवस्थापि
तं समन्वयसूत्रे तस्मान्निर्विशेषमेव ब्रह्म॥१३॥

॥प्रकाशवच्चावैयर्थ्यात् ॥१४॥

का तर्हि साकारश्रुतीनां गतिस्तत्राह प्रकाशवदिति यथा सौरश्चान्द्रो
वा प्रकाशः वियद्व्याप्यावतिष्ठमानो अङ्गुल्याद्युपाधिसम्बन्धात्तेषु
ऋजुवक्रादिभावं प्रतिपद्यमानेषु तद्भावमिव प्रतिपद्यते एवं ब्रह्मापि
पृथिव्याद्युपाधिसम्बन्धात्तदाकारतामिव प्रतिपद्यते तदालम्बनो
ब्रह्मण आकारोपदेश उपासनार्थोऽतो न वैयर्थ्यं एवं सगुणब्रह्मवा
क्यानां निर्वाहः ॥१४॥

॥आह च तन्मात्रम् ॥१५॥

श्रुतिरप्याह चैतन्यमात्रमित्याह आह चेति यथा सैन्धवघनोऽ
नन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्मानन्तरोऽबाह्यः कृ
त्स्नः प्रज्ञानघन एवेत्यादि ॥१५॥

॥दर्शयति चाथो अपि स्मर्यते॥१६॥

निर्विशेषत्वादेव परप्रतिषेधेनैव ब्रह्मोक्तं बाष्कलिना पृष्टो बाध्वः
अवचनेनैव ब्रह्म प्रोवाच स होवाचाधीहि भो इति स तूष्णीं बभूव
तं ह द्वितीये वा तृतीये वा वचन उवाच ब्रूमः खलु त्वं तु न विजानासि
उपशान्तोऽयमात्मेति स्मृतिरपि ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वा
मृतमश्नुते अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते माया ह्येषा
मया सृष्टा यन्मां पश्यसि नारद सर्वभूतगुणैर्युक्तं नैवं मां ज्ञातुमर्ह
सि इति प्राह दर्शयतीति ॥१६॥

॥अत एव चोपमा सूर्यकादिवत् ॥१७॥

यत एवात्मा चैतन्यरूपो निर्विशेषोऽत एवास्योपाधिनिमित्तामपार्थिकी
म्विशेषवत्तामादाय जलसूर्यकादिवदित्युपमोपादीयते मोक्षशास्त्रेषु य
थाह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोऽनुगच्छन् उपाधि
ना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा इत्यादौ इत्यर्थः

॥अम्बुवदग्रहणात्तु न तथात्वम् ॥१८॥

न त्वयुक्तः सूर्यकादिदृष्टान्तः सूर्यादिस्तत्पृथग्भूतं विप्रकृष्टं मूर्तञ्च
जलमुपयत्क्षमिति युक्तस्तत्प्रतिबिम्बभावः अत्र तु न चात्मा मूर्तो
न चास्मात्पृथग्भूता विप्रकृष्टा उपाधयः सर्वगत्वात् सर्वानन्यत्वा
च्चेत्याशङ्क्य तत्राम्बुवदिति ॥१८॥

॥वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥१९॥

नहि दृष्टान्तसारूप्यं सर्वांशे दार्ष्टान्तिकस्य बाधात् किन्तु विवक्षापा
तु अत्रापि शास्त्रोक्तस्य तस्य वृद्धिह्रासभाक्त्वेन विवक्षा तथा यथा ज
लसूर्यो जलवृद्धौ वर्धते जलह्रासे ह्रसति जलचलने चलति जलभेदे भि
द्यते इति जलधर्मानुविधायी भवति न तु परमार्थतः सूर्यस्य तथा
त्वं एवं परमार्थतोऽविकृतमेकरूपमपि सत् देहाद्युपाध्यन्तर्भावात्
भजते इवोपाधिधर्मान् वृद्धिह्रासादीनीति समाधत्ते वृद्धीति ॥१९॥

॥दर्शनाच्च ॥२०॥

श्रुतिरेवाह ब्रह्मणो देहाद्युपाधिष्वन्तरनुप्रवेशम् पुरश्चक्रे द्विपदः
पुरश्चक्रे चतुष्पदः पुरः स पक्षी भूत्वा पुरः पुरुष आविशत् अने
न जीवेनात्मनानुप्रविश्येति च तस्मात्सिद्धमेकलिङ्गमेव ब्रह्म
नोभयलिङ्गमित्याह दर्शनादिति ॥२०॥

अ ६ ॥प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥२१॥

द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं चेत्युपक्रम्य महताप्रपञ्चेन पृथिव्य
प्तेजोलक्षणं मूर्तं वाय्वाकाशलक्षणममूर्तं अमूर्तस्य रूपं, च प्र
ब्रह्मोपदिष्टं इदमुक्तं अथात आदेशो नेति नेतीति न ह्येतस्मादिति
नेत्यन्यत्परमस्तीति तत्र किं ब्रह्मणो रूपं ब्रह्म चोभयं निषिध्यते उ
तैकमेव तत्राप्येकं किं रूपं निषिध्यते उत ब्रह्म वा प्रतिषिध्यते किं

प्राप्तं तत्र प्रकृतैतावत्त्वविशेषादुभयमपि न न इति प्रतिषेधेन निषिध्यत इति प्राप्ते नतावदुभयं निषिद्धं शून्यवादप्रसङ्गात् किन्त्वपारमार्थिकमात्मरूपा परमार्थः प्रतिषिध्यते यथारज्ज्वादिषु सर्पादयः तथा चात्र न ब्रह्म निषिध्यते ब्रह्मतेब्रवाणीत्युपक्रमविरोधात् असन्नेव स भवति असद् ब्रह्मेति वेद चेत् इतिनिन्दाविरोधात् अस्तीत्येवोपलब्धव्य इत्यवधारणाच्च सर्ववेदान्तकोपप्रसङ्गात् यतो वाचो निवर्तन्ते इति वाङ्मनसातीतं अविषयं प्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेति प्रतिपादनाय ब्रह्मणो रूपद्वयप्रतिषेधो नेति ब्रह्म परिशेषार्थः नञ्वीप्सा व्याप्तोप्रयमनत्वा मूर्तामूर्तयोर्द्वितीयेन मूर्ताश्माश्वस्य मूर्ताज्ञानस्य च निषेधः अतो न ब्रह्म निषेधः सत्यस्य सत्यमिति निषेधाविषयत्वात् यद्वा द्वितीयेन वासना प्रतिषिध्यते यद्वा यत्किञ्चिदुत्प्रेक्ष्यते तन्निषेधस्तस्मात्प्रपञ्चमेव कल्पितं प्रतिषेधति परिशिनष्टि च ब्रह्मेत्याह प्रकृतैतावत्त्वमिति ॥२१॥

॥तदव्यक्तमाह हि॥२२॥

अवशिष्टं ब्रह्म कुतो न गृह्यते तत्राह तदव्यक्तमिति न चक्षुषा पश्यति कश्चिदेनं अग्राह्यो न हि गृह्यते यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्ते इत्यादि श्रुतिराह यतः स्मृतिरपि अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते इति श्रुत्यात् गृह्यत एव तादित्यर्थः ॥२२॥

॥अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥२३॥

किञ्चैनमात्मानं संराधनकाले पश्यन्ति संराधनं च भक्तिध्यानप्रणिधानाद्यनुष्ठानं कृत एतत्प्रत्यक्षानुमानाभ्याम् पराञ्चि खानि व्यतृणत् स्वयम्भूस्तस्मात्पराङ् पश्यति नान्तरात्मन् कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन् ज्ञानप्रसादेन विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः स्मृतिश्च यं विनिद्राजितश्वासाः सन्तुष्टाः संयतेन्द्रियाः ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनमित्याह अपि संराधनेति ॥२३॥

॥प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥२४॥

ननु संराध्य संराधकभावाभ्युपगमाज्जीवपरयोरन्यत्वं स्यादिति प्राप्ते आह आकाशादीनि यथा प्रकाशाकाशसवितृप्रभृतयोऽङ्गुलिकरकोदकप्रभृति कर्मसु उपाधिषु सविशेषा इवावभासन्ते न स्वाभाविकीम विशेषात्मता

156

अर्हति एवमौपाधिकेन रूपेणाय मात्मभेदः। स्वतस्त्वैकात्म्यमेववेदान्तो

मुक्ताभ्यासात् प्रसक्तजीवप्राज्ञयोर भेदउक्तस्तस्मात् ॥२४॥

॥अतोऽनन्तेन तथाहि लिङ्गम् ॥२५॥

अतःस्वाभाविकत्वादभेदस्य भेदस्याविद्याकृतत्वाच्च जीवःप्राज्ञेना

नन्तेनैकतां गच्छतीति तथालिङ्गमस्ति सयो ह वै तत्परं ब्रह्म वेद ब्रह्मैव

भवति ब्रह्मैव सन् ब्रह्माप्येतीत्याह अतइति ॥२५॥

॥उभयव्यपदेशात्त्वहिकुण्डलवत् ॥२६॥

संराध्यसंराधकभावे मतान्तरे स्वमत शुद्धये सूत्रमाह क्वचिद्धि व्यपदि

श्यते क्वचिद्भेदः उभयमव्याहि कुण्डलवत् अत्रापि भवितुमर्हति

अहि रित्यभेदः कुण्डलाभोगप्रांशुत्वादि इति भेदः॥२६॥

॥प्रकाशाश्रयवद्वा तेजस्त्वात् ॥२७॥

यथाप्रकाशः सावित्रः तदाश्रयः सविता च नात्यन्तभिन्नौ उभयोरपि

तेजस्त्वात् अथच भेदव्यपदेशभाजौ तद्वदित्याह प्रकाशेति॥२७॥

॥पूर्ववद्वा॥२८॥

प्रकाशादिवच्चावैशेष्यमिति पूर्ववद् विद्याकृतत्वाद्भन्दः स्वविषया

मोक्ष उपपद्यतेइत्याह पूर्ववदिति ।२८॥

॥प्रतिषेधाच्च ॥२९॥

यतःपरस्मात्मनोऽन्यच्चेतनं प्रतिषेधति शास्त्रं नान्योतोस्ति द्रष्टेत्या

दि नेतिनेतीति ब्रह्ममात्रपरिशेषाच्चैवमित्याह प्रतिषेधादिति।२९॥

॥परमतःसेतून्मानसम्बन्धभेदव्यपदेशेभ्यः॥३०॥

कानिचिद्वाक्यानि ब्रह्मणः परं अन्यत त्वं आपाततः प्रतिपादयन्तीत्याश

ङ्कते परमत इति परस्मात् तत्वान्तमन्यत्वमेवकुतः सेतुन्मानसम्बन्ध

भेदानां व्यपदेशात् अथ य आत्मा ससेतुर्विधृतिः अत्र सेतुं तीर्त्वा

अन्धात्मा नमसेतुं प्राप्नोति एवं तदेतद्ब्रह्म चतुष्पात् षोडश कं षोडश

कलं इति उन्मितादन्यदस्ति कार्यपरिणामिता द्वन्त्सवर्तादि

यथा तद्भूत प्राज्ञेनात्मना सम्परिष्वक्त इति सम्बन्धः उक्तः सचौभ

न सम्बन्धिनौ भवति अतोऽपि भेदः आदित्ये पुरुषो दृश्यते

चक्षुषि पुरुष इत्यादाधाराधेययो र्भेदादपि भेदः इति शङ्का।३०॥

॥सामान्यात्तु ॥३१॥

मित्यादि
समाधत्ते सामान्यात्त्विति एकमेवाद्वितीयम्श्रुतेः अथः अनन्यत्वे

निर्धारिते सति सेत्वादिव्यपदेशः सामान्यात् सादृश्यात् गौणः

सर्वविधारकत्वात् सेतुरिवसेतुः एवमग्रेपि ॥३१॥

१ अथ य इमा मसौ च अथ मानं सेतुं तीर्त्वा

॥ बुद्ध्यर्थः पादवत् ॥३२॥

उन्मानव्यपदेशोयः सोप्युपासनार्थः न ह्यनन्तोऽविकारे परस्मिन्मानं सम्भवतीत्याह बुद्ध्यर्थ इति पादवत् यथा कार्षापणे पादादिविभागो व्यवहारार्थः स्यात् ॥३२॥

॥ स्थानविशेषात् प्रकाशादिवत् ॥३३॥

सम्बन्धव्यपदेशभेदव्यपदेशयोः समाधानमाह स्थानेति बुद्ध्याद्युपाधिस्थानयोगात् उद्भूतस्य विशेषविज्ञानस्य उपाध्युपशमे उपशम एवेति उपाधिकृतः परमात्मना सम्बन्ध इत्युपचर्यते यथा प्रकाशस्योपाध्युपशमे सम्बन्धव्यपदेशो नैवं तत् भेदव्यपदेशश्चोपाधिक इत्यर्थः ॥३३॥

॥ उपपत्तेश्च ॥३४॥

उपपद्यते चायमेव प्रकारः नान्यादृशः स्वमपीतो भवतीत्यादिश्रुतेरित्याह उपपत्तेरिति ॥३४॥

॥ तथान्यप्रतिषेधात् ॥३५॥

एवं भेदं निराकृत्य स्वपक्षं हेत्वन्तरेणोपसंहरति तथेति स एवाधस्तात् सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद, ब्रह्मैवेदं सर्वं नेह नानास्ति किञ्चन, यस्मात्परं नापरमस्ति किञ्चित्, यादिवाकाशतानि वस्त्वन्तरस्यारयन्तो यतो नेतः नान्तरमिति ॥३५॥

॥ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥३६॥

एतेनेति सेत्वादिव्यपदेशनिराकरणेनान्यप्रतिषेधसमाश्रयणेन च सर्वगतत्वमप्यात्मनः सिद्धं भवति व्यपदेशस्य मुख्यत्वे ह्यात्मनः परिच्छिन्नत्वं स्यात् आयामशब्दात् सर्वगतत्वं सिद्धं ह्यायामशब्दस्य व्याप्तिवचनत्वात् यावान्वायमाकाशस्तावानेषोऽन्तर्हृदय आकाशः, ज्यायान्दिवो ज्यायानाकाशात् नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः इत्यादिभ्यः ॥३६॥

॥ फलमत उपपत्तेः ॥३७॥

तस्य ब्रह्मणो व्यावहारिके ईशित्रीशितव्यविभागे सति अन्यदपि सिद्ध्यतीत्याह फलमत इति यत् इष्टानिष्टमिश्रलक्षणम् यत् कर्मफलं तत्किं कर्मणः सकाशात् उत ईश्वरादिति सन्देहे स्वर्गकामो यजेतेत्यादिना यागादेः फलजनकत्वबोधनात् कर्मणः फलमिति प्राप्ते ईश्वरात्फलं भवति उपपत्तेः विचित्रान् सृष्टिस्थितिसंहारान् विदधतः देशकालविशेषाभिज्ञत्वात् कर्मिणां कर्मानुरूपं फलं सम्पादयति कर्मण आशुविनाशित्वात् अभावाद्भावानुपपत्तेः न चापूर्वमपि कल्प्यं तस्मात्फलं तस्य काष्ठलोष्ठवदचेतनस्य फलदाने प्रवृत्त्यनुपपत्तेः अर्थापत्तिस्तु नापूर्वे प्रमाणं तस्य ईश्वरात् सिद्धिपरिक्षयात् लोकराजसेवादिवत् पूजितेश्वरात्फलं एष ह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषत एष एवासाधु कर्म कारयति तं यमधो निनीषत इति श्रुतेश्च ॥३७॥

॥श्रुतत्वाच्च॥३८॥

स वा एष महानज आत्मान्नादो वसुदान इत्यादिषु स्पष्टं फलदातृत्वं श्रुते रीश्वरस्यैव फलमित्याह श्रुतत्वेति॥३८॥

॥धर्मं जैमिनिरत एव॥३९॥

जैमिनिस्तु धर्माधर्मयोः अपूर्वद्वारा फलदातृत्वं युक्तिबलाद्दर्शितवा कावलम्ब्याहेत्याह धर्ममिति अत एव श्रुतेः उपपत्तेश्च ईश्वरस्य फल दातृत्वे वैषम्यनैर्घृण्यापातात् विचित्रकारणाधीनत्वाच्च विचित्र कार्यस्यत्यर्थः॥३९॥

॥पूर्वं तु बादरायणो हेतुव्यपदेशात्॥४०॥

बादरायणस्तु पूर्वोक्तमेवेश्वरस्य फलदातृत्वं (वैषम्यनैर्घृण्या पातात् विचित्रकारणाधीनत्वाच्च) एवं मन्यते कुतः धर्माधर्म कारयितृत्वेन फलदातृत्वे च हेतुव्यपदेशात् एष उ एव साधु कर्म कारयतीत्यादिना हेतुत्व प्रतिपादनात् यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् स तया श्रद्धया युक्तः तस्याराधनमीहते लभते च ततः कामान् मयैव विहितान् हितान् इति स्मृतेश्च तदेव चेश्वरस्य फलदातृत्वं यत्स्व स्वकर्मानुरूपाः प्रजा सृजतीति न वैषम्यादिदोषप्रसक्तिरित्याह पूर्वन्त्विति तदेवमधिकरणचतुष्टयेन त्वम्पदार्थः शोधितः त त्पदार्थोऽपि, प्रथमेन ब्रह्मणो निरूपत्वं द्वितीयेन निषेधाविषय त्वं, तृतीयेनाद्वितीयत्वं चतुर्थेन व्यवहारदशायां कर्मफलदातृ त्वं उपलक्षणत्वायोक्तमिति तत्त्वंपदार्थौ शोधितौ॥४०॥ इति ब्रह्मसूत्रतात्पर्यविवरणे तृतीयाध्यायस्य द्वितीयः पादः

अ. १ ॥सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्॥१॥

एतावता ब्रह्मतत्त्वं प्रतिपादितं इदानीं प्रतिवेदान्तं विज्ञानानि भिद्यन्ते न वा इति विचारः नन्वब्रह्मणैकत्वेऽवधारिते कुत्र भेदा भेद चिन्तावसर इति न सगुणब्रह्मविषया प्राणादिविषया च चिन्ता तत्र कर्मवद्दैवोपासनानां भेदाभेदौ सम्भवतः तद्वद्देवो पासनानि दृष्टादृष्टफलान्यपि सम्यक् ज्ञानद्वारा क्रममुक्ति फलान्यपि तत्र पूर्वपक्षः शब्दान्तराभ्यास संख्यादीनि भेदक

प्रमाण्यत्रापि सन्ति ते शरीरम वाजसनेयम कौषीतकं इति वैश्वानर भेदः पञ्चाग्नि विद्यायां कचित्षडग्नीनामनन्ति इत्यादि रूपभेदः एवन्धर्मभेदोपि शिरोव्रतादि एवम्पुनरुक्तादिभेदो विज्ञानस्य उपासनस्य भेद इति प्राप्ते सर्वशाखागतानि विज्ञानान्यभिन्नानि कुतः चोदनाद्यविशेषात् आदिनाशाखान्तराधिकरणसिद्धान्तोक्तान्प्रमेदहेतवो गृह्यन्ते ये विनाम रूपादयो भेदहेतवो भासमाना न नामरूपस्यादिति प्रथमकाण्डएव निराकृताः इहापि निराकरिष्यन्ते तस्मान्नोपासनाभेद इत्याह सर्वेति ॥१॥

॥भेदान्नेति चेन्नैकस्यामपि ॥२॥

~~(सर्ववेदान्तप्रत्ययं)~~ ननु गुणभेदान्नैक्यं यथा पञ्चाग्निविद्यायां वाजसनेयिनः षष्ठमग्निमामनन्ति तस्याग्निरेवाग्निर्भवतीति छन्दोगास्तु नामनन्तीति न चात्र गुणोपसंहारः पञ्चसंख्याविरोधात् तथा प्राणसम्वादे श्रेष्ठादन्यांश्चतुरो वाक्चक्षुःश्रोत्रमनांसि प्राणान् छन्दोगा आमनन्ति वाजसनेयिनः पञ्चमप्राशरेतो वै प्रजापतिरिति आमनन्तीति विद्याभेद इति प्राप्ते नेत्याह भेदान्नेति न भेदः एकस्यामपि विद्यायां षोडशिग्रहणाग्रहणवत् गुणभेद उपपद्यते तज्जातीयानां तस्मादेकविद्यमेव ॥२॥

॥स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥३॥

योप्युक्तः शिरोव्रतादिधर्मभेदः सोप्यध्ययनार्थ एव न विद्यार्थं यतस्तथात्वेन समाचारे वेदव्रतपरे ग्रन्थे आथर्वणिकानामेव यत्रोक्तं नैतदचीर्णव्रतोऽधीत इति यथा सौर्यादयः शतौदनान्ताः सप्त सवा वेदान्तरोक्ताः त्रेताग्न्यसम्बन्धाः आथर्वणिकानामेवेति यथान्ते तद्वत् तस्मात् विद्यैक्यं इत्याह स्वाध्यायेति ॥३॥

॥दर्शयति च ॥ ४॥

वेदोपि विद्यैक्यं दर्शयति सर्वे वेदा यत्पदमामनन्ति एतमेव बह्वृचा महत्युक्थे मीमांसन्ते एतमग्नावध्वर्यव एतं महाव्रते छन्दोगा इति एतास्मिन्नुदरमन्तरं कुरुतेऽथ तस्य भयम्भवतीत्यादि इत्याह दर्शयतीति ॥४॥५

॥उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥५॥

विद्यैक्ये सति प्रयोजनमाह उपसंहारेति एवं सति विधिशेषवत् अग्निहोत्रादिधर्माणामिव उपासनागुणानां समान विज्ञाने सति तत्तच्छाखिकर्तृप्रयोगे उपसंहारो भविष्यति अर्थाभेदान्नान्यथेत्यर्थः ॥५॥५

॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात् ॥६॥
वाजसनेयके वागादीन्प्राणानसुरपाप्मविद्धत्वेन निन्दित्वा मुख्य
प्राणः परिगृहीतः अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति
छान्दोग्येऽपि इतरान्निन्दित्वा मुख्यः प्राणः परिगृह्यते अथ ह य
एवायं मुख्यः प्राणः तमुद्गीथमुपासाञ्चक्रिरे इति उभयत्रापि
प्राणोपासनं प्रतीयते तत्र किमस्ति विद्याभेदोऽभेदो वा, उद्गीथस्य
कर्तृत्वेन प्राणमामनन्ति त्वं न उद्गायेति वाजसनेयके उपक्रमात्,
छान्दोग्ये उद्गीथत्वेनोपक्रमः तमुद्गीथमुपासाञ्चक्रिरे इत्युप
क्रमभेदात् अन्यथात्वं शब्दात्, विद्याभेद इति प्राप्ते न ह्येतावता
विशेषेण विद्याभेदो भवितुमर्हति अविशेषस्यापि बहुतरस्य
दर्शनात् छान्दोग्येऽपि कर्तृत्वं लक्ष्यते, वा, एकमेव विज्ञानं
सर्वशाखाप्रत्ययमेकं कर्मेतिवदित्याह अन्यथेति ॥६॥

॥ न वा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥७॥

छान्दोग्ये ओमित्येतदक्षरमुद्गीथमुपासीतेत्युद्गीथा
वयवस्योपास्यत्वमुक्त्वा पुनरपि सात्त्विकेन्द्रियवृत्ति
रूपाणां देवानां तामसेन्द्रियवृत्तिरूपाणामसुराणाञ्च
संग्राममुक्त्वा प्राणमुद्गीथमुपासाञ्चक्रिरे इत्युद्गीथावय
वे प्राणदृष्टिरुक्ता बृहदारण्यके तु उद्गीथशब्दमात्रश्रव
णात् तत्रोद्गीथोपासनमिति तत्रोद्गीथविद्येति समाख्या
याः एकत्वाच्छाखाद्वयेऽप्येकमेवोपासनमिति प्राप्ते आह
न वेति नैक्यं किन्तु विद्याभेदः प्रकरणभेदात् प्रक्रमभे
दात् यतः छान्दोग्ये अवयवस्योपास्यत्वं प्रक्रान्तं बृह
दारण्यके उद्गीथशब्दमात्रेणोपक्रमात् सकल एवोद्गी
थभाग उपक्रान्त इति ध्येयभेदाद्विद्याभेदः यथाकाशः
परायणं स एष परोवरीयान् उद्गीथः स एषोऽनन्त इति
परोवरीयस्त्वगुणविशिष्टोद्गीथोपासनात् भिन्नं तथादर्शो
पासनं भिन्नमित्यर्थः नचेतरगुणोपसंहारः एकस्यां शाखायामेव भवं जानी
यकेष्वपि ॥७॥

॥ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥८॥

ननु संज्ञाया समाख्याया एकत्वादैक्यमिति तन्न तु उक्तं परोवरीयस्त्वादि
वत् इति तत्र यथा संज्ञैक्येऽपि विद्याभेदस्य सत्वाद् एवमत्रापि संज्ञैक्येऽपि
युक्त्यन्तरान्तरान्यत्वम् तद्युक्त्यन्तरमप्यत्रास्ति इत्याह संज्ञेति ॥८॥

अ५ ॥व्याप्तेश्च समञ्जसम् ॥९॥

ओमित्येतदक्षरमुद्गीथमुपासीत इत्यादौ अक्षरोद्गीथशब्दयोः द्वैरूप
समर्पकयोः सामानाधिकरण्यं श्रुतं, तत्र किं नाम ब्रह्मेतिवदध्यासात्
तु किम्वा बाधात् यद्वा ऐक्यात् स्थाणुरिति वत् उत यो नीलस्तदुत्पले
त्येकत्वात् उत नीलोत्पलमिति विशेषणविशेष्यभावादिति सं
शये नियामकाभावादनियम इति प्राप्ते सर्वपक्षेषु लक्षणासत्त्वेऽपि
विशेषपक्षे उद्गीथशब्दस्य अवयवे लक्षणा सन्निकृष्टेति सैव ग्राह्या
व्यवहितलक्षणायां गौरवात् अतस्तु व्याप्तेर्हितो विशेषणमिति
समञ्जसं पटग्रामादिशब्दा इवावयवेषु ॥९॥

॥सर्वाभेदादन्यत्रेमे ॥१०॥ अ५

बृहदारण्यकादौ प्राणोपासनायां वशिष्ठत्वादिगुणा उक्ता ऐतरे
यकौषीतक्यादौ प्राणोपासने नोक्ताः उपसंहर्त्तव्या न वेति एवं वेदे
ति स्वशाखोक्तानामेव गुणानामुपसंहर्त्तव्या इति प्राप्ते आह
सर्वाभेदेति अन्यत्र ऐतरेयिणामपि उपसंहर्त्तव्याः कुतः सर्वत्र
प्राणस्यैकत्वात् तद्द्वारा गुणानां बुद्धिस्थत्वात् देवदत्तो मथुरा
यामध्यापयन् दृष्टः पुनर्माहिष्मत्यां दृष्ट इत्यत्र अनध्यापय
न्नपि अध्यापकत्वेनैव प्रत्यभिज्ञायते तद्वत् तस्मादेकप्रधानस
म्बद्धा धर्माः एकत्राप्युच्यमानाः सर्वत्रोपसंहर्त्तव्याः ॥१०॥

॥आनन्दादयः प्रधानस्य ॥११॥ ५अ

आनन्दो ब्रह्म सत्यं ज्ञानमनन्तं ब्रह्मेत्यादयः तैत्तिरीयकादौ पठिता
स्तो प्रज्ञानं ब्रह्मेत्यादि ऐतरेयके उपसंहर्त्तव्या न वेति वामनी भामनी
त्यादिवन्नोपसंहर्त्तव्या इति प्राप्ते उपसंहर्त्तव्या इत्याह आनन्दाद
य इति प्रधानं ब्रह्म अभिन्नं अतः उपसंहर्त्तव्या वामनीत्या
दयस्तु ध्येयत्वेन विधीयमानत्वात् व्यवस्थिताः आनन्दादयस्तु
प्रतिपत्तिफलाः इति भेदः ॥११॥

॥प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे॥१२॥

न्त्वानन्दं प्रकृत्योक्ताः प्रियशिरस्त्वादयो ये परस्य रूपविशेषा भोक्तृत्त्वापेक्षया ये चोपचितापचितरूपा उपलभ्यन्ते ते च सति भेदे सम्भवतः ब्रह्मत्वभिन्नं न चैते ब्रह्मधर्मा केवलधर्मा हि नेत्युक्तं तस्मान्नोपसंहारः॥१२॥

॥इतरे त्वर्थसामान्यात्॥१३॥

इतरे आनन्दादयः अर्थस्य सामान्यात् ऐक्यात् सर्वत्र ज्ञेयाः प्रतिपत्तिमात्रप्रयोजना हि ते इत्याह इतरे त्विति॥१३॥

॥आध्यानाय प्रयोजनाभावात्॥१४॥

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः इत्यारभ्य पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिरित्यादौ किं सर्वे पदार्था उत्तरोत्तरं परत्वेन विवक्षिता उत एभ्यः सर्वेभ्यः पुरुषस्यैव परत्वं तत्र इदमस्मात् परं इत्यादिवत् नानावाक्यैः एकैकस्मात् परमेकैकम् इति प्राप्ते पुरुष एवैभ्यः सर्वेभ्यः परत्वेन प्रतिपादयितव्यो न पृथक् एषां परत्वप्रतिपादने प्रयोजनाभावात् नहीतरेषु परत्वेन प्रतिपन्नेषु किञ्चित् प्रयोजनं दृश्यते श्रूयते वा पुरुषे परत्वेन ज्ञाते सर्वानर्थव्रातातीते दृश्यते मोक्षः प्रयोजनं निचाय्य तं मृत्युमुखात् प्रमुच्यते इति श्रुतेः काष्ठाशब्देन च पुरुषे आदरं दर्शयन् पुरुषप्रतिपत्त्यर्थेव पूर्वापरप्रवाहोक्तिरिति दर्शयति आध्यानायेति॥१४॥

॥आत्मशब्दाच्च॥१५॥

यतः एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिरिति पुरुषस्य आत्मशब्देनोक्तत्वात् पुरुषप्रतिपत्त्यर्थाइ
अतोपि इन्द्रियादि प्रवाहोक्तिः इत्याह आत्मेति॥१५॥

॥आत्मगृहीतिरितरवदुत्तरात्॥१६॥

आत्मा वा इदमेक एवाग्र आसीत् नान्यत्किञ्चन मिषत् इत्यादौ आत्मशब्देन किं पर एव उतान्य ईश्वरादिः तत्र महाभूतकार्येभ्यः प्रभृति लोकानां सृष्टिश्रवणात् ईश्वर एव लोकसृष्टिः परमेश्वराधिष्ठितेन केनचित् क्रियते इति श्रूयते आत्मैवेदमग्र आसीत् पुरुषविधः इति प्रादिकालीन भूतानां ब्रह्मा अग्रे समवर्तत इति ख्यातो हि तस्य सृष्टिरिति प्रजापतिकर्तृकत्वं श्रुतं तस्मादीश्वर इति प्राप्ते आह आत्मेति पर एवात्मा इतरवत् यथेतरसृष्टिवाक्ये आत्मन आकाशः इत्यादौ पर एव तथात्रापि लोकसृष्टिः भूत सृष्टेरुपलक्षणात् तस्मात् परस्यैव ग्रहणम्॥१६॥

॥ अन्वयादिति चेत्स्यादवधारणात् ॥१७॥

वाक्यान्वयात् परग्रहणं इत्युक्तं दूषयति अन्वयेऽपि परग्रहणमेव कुतः अवधारणात् परग्रहणे हि प्रागुत्पत्तेरात्मैकत्वावधारणम् आञ्जस्येनावकल्पते । नोक्तस्य विवचनं महाभूतस्यानन्तरम् योऽयमर्थ सा आत्मा एतमेव पुरुषं ब्रह्म ततममपश्यदिदं मदर्शमितीति एवं ब्रह्मैष इन्द्र इत्यादिप्रज्ञानं ब्रह्मेत्युपसंहारात् व्याख्यानान्तरमप्यत्र द्रष्टव्यम् ॥१७॥

॥ कार्याख्यानादपूर्वम् ॥१८॥

छान्दोग्ये वाजसनेयके च आश्वभ्य आकीटपतङ्गेभ्यस्तत्तेऽन्नमित्यादिना प्राणस्यान्नमाम्नाय तस्यैव वासः स्थाने आप आमनन्ति श्रोत्रिया अशिष्यन्तः आचामन्त्यशित्वा चाचामन्त्येतमेव तदनमनग्नं कुर्वन्तीत्येवं तस्माद्वा एतदशिष्यन्तः पुरस्ताच्चोपरिष्टाच्चाद्भिः परिदधतीति तत्राचमनम् उत प्राणाचमनेन प्राणस्यानग्नताध्यानं विधीयते उतोभयम् तत्रोभयोर्वा गमादुभयमपि आचामेदिति विधिर्विभक्ते राचमनमेव वेति प्राप्ते आह कार्येति नाचमनं विधेयम् प्राप्तत्वात् कार्यत्वेन स्मृतिसिद्धस्यैवात्र प्राणविद्यायां आख्यानात् अत एव नोभयविधानं वाक्यभेदात् तस्मात् प्राप्तमेवाशनस्योभयत आचमनमनूद्य प्राणस्यानग्नताकरणसंकल्पोऽनेन वाक्येनापूर्वं प्राणविद्यासन्निधित्वेनोपदिश्यते न त्वाचमनविधिः आचमन्तीति वर्तमानापदेशात् ॥१८॥

॥ समान एवं चाभेदात् ॥१९॥

वाजसनेयशाण्डिल्यविद्यायां गुणाः श्रूयन्ते स आत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमित्येवमादयः पुनस्तच्छाखायामेव मनोमयोऽयम्पुरुषः भाः सत्यः तस्मिन्नन्तर्हृदये स एष सर्वस्येशानः सर्वमिदम्प्रशास्ति यदिदं किञ्चेति तत्र किमुभयत्रैका विद्या गुणोपसंहारश्च उत द्वे विद्ये गुणानुपसंहारश्चेति संदेहे पौनरुक्त्यापत्त्या विद्याभेदः गुणव्यवस्था च एकशाखायां एकजातीयगुणानां अध्येतृवेदितृभेदाभावात् पौनरुक्त्ये दुर्वारे विद्याभेदः एवं च न गुणोपसंहार इति प्राप्ते आह समान इति यथाभिन्नासु शाखास्वेकैव तथा ह्येकस्यां शाखायां एकैव विद्या उपास्याभेदात् न चापौनरुक्त्यम् एकस्मिन्विद्यां विधत्ते अपरस्मात्काण्डम् गुणान्विधत्त इति तस्माद्विद्यैक्यम् ॥१९॥

164

॥सम्बन्धादेवमन्यत्रापि ॥२०॥

बृहदारण्यके सत्यं ब्रह्मेत्युपक्रम्य सत्यविद्याया माधिदैविकस्य पुरुषस्या-दित्यस्याहरित्येतन्नाम ध्यानायोपदिष्टम् आध्यात्मिकस्य त्वक्षिपुरुषस्याह मिति नामोपदिष्टम् तत्र विद्यैकत्वेद्वयोर्नाम्नोः पुरुषे उपसंहार इत्याशङ्क्य सम्बन्धेति ॥२०॥

॥नवाविशेषात् ॥२१॥

य एष एतस्मिन्मण्डले पुरुष इत्युपक्रम्य तस्योपनिषदहरिति तच्छब्देन मण्डलस्थमेव परामृश्य तस्यैव नाम विशेष उपदिष्टः एवं योऽयं दक्षिणेऽक्षन् पुरुष इत्युपक्रम्य तस्योपनिषदहमिति तच्छब्देनाक्षिपुरुषमेव परामृश्य अहमिति नाम विशेषः ततो विद्यैकत्वेन वेद्यस्य ब्रह्मण एकत्वेऽपि स्थान विशेषेण नाम विधानात् अध्यात्माधिदैविकयोर्व्यवस्थिते नामनी न तु तयोरुपसंहारोऽस्ति यथा लोके गुरोरुपास्यस्यैकत्वेऽपि तिष्ठतो गुरोर्ये उपचारः प्रत्युत्थानादिः स नासीनस्य प्रयुज्यते आसीनस्योपचारः पादाभ्यङ्गादिः स न तिष्ठतो भवति तद्वत् तस्मान्नाम्नोर्व्यवस्थेत्याह नवेति ॥ २२॥

॥दर्शयतिच ॥२३॥

किञ्चैवंविधधर्माणां व्यवस्थितिलिङ्गदर्शनं शास्त्रे प्याह दर्शयतीति तस्यैतस्य तदेव रूपं यदमुष्य रूपम् यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेति कथं लिङ्गत्वं अक्ष्यादित्यस्थानभिन्नानां धर्माणामन्योन्यस्मिन्ननुपसंहार्यान पश्यन्निहातिदेशनादित्यपुरुषगतानरूपादीनक्षिपुरुषे उपसंहरति तस्यैतस्येत्यादिना तस्माद्व्यवस्थिते उपनिबद्धौ ॥२३॥

॥सम्भृतिद्युव्याप्त्यपि चातः ॥२३॥

राणायनीयखिलेषु ब्रह्मज्येष्ठा वीर्या सम्भृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततानेति यानि लोके हरिहरब्रह्मादिदेहेषु प्रसिद्धानि वीर्याणि तानि ब्रह्मपुरःसरणायेन स्वीकृतानि भवन्ति न हि सशक्तिक ब्रह्मानपेक्ष्य वीर्याणि सम्भवन्ति तच्च ज्येष्ठं ब्रह्म पूर्वं दिवमाव्याप्य व्यवस्थितं अत्राधिदैविकस्य ब्रह्मणः सम्भृतिद्युव्याप्त्यादयो गुणा उपास्यत्वेनावगम्यन्ते शाण्डिल्य दहरादिविद्यास्वाध्यात्मिकं हृदयान्तर्वर्ति ब्रह्म उपास्यत्वेन श्रुतं तत्र ब्रह्म एकत्वात् सम्भृत्यादयो गुणाः शाण्डिल्य विद्यासु उपसंहर्त्तव्या इति प्राप्ते सम्भृतौ गुणाः ~~॥२३॥~~

~~॥पुरुषविद्यायामिवचेतरेषामनाम्नानात्~~ ॥२४

न तावत्सम्भृत्यादिगुणानामन्यतमोऽपि शाण्डिल्यादिविद्यासूपलभ्य-

॥ साम्पराये तर्त्तव्याभावात्तथा ह्यन्ये ॥२७॥

पूर्वाधिकरणे सुकृत दुष्कृत परित्याग उक्तः । स किं मरणात्प्रागेव ना ब्रह्मलोक मार्ग मध्ये विरजानद्युत्तरणानन्तरमेवेति तत्र यथा श्रवणात्स आगच्छति विरजां नदीं तां मनसैवात्येति तत्सुकृत दुष्कृते विधूनुत इति प्राप्ते आह साम्पराय इति ब्रह्ममार्गे ब्रह्मप्राप्ति व्यतिरिक्तस्य सुकृत दुष्कृत प्राप्यस्य फलस्याभावत् तयोर्नदी पर्यन्त नयनं व्यर्थम् , किंच मरणात्प्राग परित्यक्तयोस्तयोर्मार्ग मध्ये परित्यागस्य साधनं न संभवति विदेह दशायां साधनस्यानुष्ठानासम्भवत्वात् , अन्यान्तरस्य अश्व इव रोमाणि इति कौशीतकि सिद्धस्य नदीमुत्तीर्य परित्यागस्य बाधितत्वात् । तस्मान्मरणात्प्रागेवोपास्य साक्षात्कृति तयोः परित्यागः ॥२७॥

छन्दत उभयाविरोधात् ॥२८॥

छन्दत इति इति मध्ये तयोः क्षयोऽभ्युपगम्येत तदा पतिते देहे यमनियमोपासना श्वासादि रूपस्य सुकृतादि क्षयहेतोः कर्मणः इच्छानुरोऽनुष्ठानानुपपत्तिरेव । तयोः क्षयस्यायाधित तस्मात्पूर्वमेव साधकावस्थायां छन्दतोऽनुष्ठानं तस्य संभवत्येव तत्पूर्वकं च सुकृतादि हानम् । एवञ्च निमित्त नैमित्तकयोरुपपत्तिः । श्रुति संगतिश्च ॥२८॥

गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥२९॥

चतुर्थेऽध्याये वक्ष्यमाणस्यार्चिरादि मार्गस्य सगुणोपासकस्येव निर्गुण ब्रह्मतत्त्व ज्ञानिनोऽपि लाभः समान एव भवितुमर्हति सुकृतादि परिहाणवदिति प्राप्ते आह २ गतेरिति

गतेरर्थवत्त्वं क्वचित्सार्थक्यं क्वचिन्नेत्युभयथा विभागेन भवति अन्यथा विशेषेण गत्यङ्गीकारे विरोधः स्यात् निरञ्जनः परमं साम्यमुपैतीति श्रुतौ देशान्तर प्रापणीय गतिविरुद्धेव निरञ्जनः कथं देशान्तरं गच्छेत । आनर्थक्यमेव ज्ञानिनो गतिमार्गस्य ॥२९॥

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥३०॥

गतिः क्वचिदर्थवती क्वचिन्नेति उभयभावमुपपद्यते च यतस्तल्लक्षणार्थोपलब्धेः, गतिकारणीभूतस्यार्थस्य पर्यङ्कविद्यायां पर्यङ्कारोहणं पर्यङ्कस्थेन ब्रह्मणा सह संवदनं विशिष्टगन्धादिप्राप्तिश्चेत्यादेः श्रवणात्, नहि तत्त्वज्ञस्य प्रारब्धक्षयातिरिक्तं किञ्चिदपेक्षितं तस्मान्नार्थिका तत्र गतिः, यथा लोके देशान्तरप्राप्तौ पन्था अपेक्ष्यते न रोगविनिवृत्तौ एवमिहापीत्याह उपपन्न इति ॥३०॥

अनियमः सर्वासामविरोधः शब्दानुमानाभ्याम् ॥३१॥

मुमुक्षूणां विद्यासु गतिरर्थवत्युक्तं तत्रापि सर्वासु देवयानगतिः, उत यत्र मधुविद्यायां शाण्डिल्यविद्यासु गतिः श्रुता तत्रैव, या विद्यासु न श्रुता न तासु गमनमिति संशये यत्र श्रुतं तत्रैव गतिः प्रकरणात्। अन्यथा सर्वस्य सर्वार्थत्वप्रसङ्गात् इति प्राप्ते आह:— अनियम इति, सर्वासामेवाभ्युदयप्राप्तिफलानां सगुणविद्यानामविशेषेण देवयानाख्या गतिर्भवति कुतः, शब्दानुमानाभ्याम्, श्रुतिस्मृतिभ्याम्, तद्य इत्थं विदुरिति पञ्चाग्निविद्यावतां देवयानं प्रतिपादयन्ती श्रुतिः, ये चेमेऽरण्ये श्रद्धा तप इत्युपासत इति विद्यान्तरशीलिनामपि पूर्वैः सह समानमार्गतां गमयति श्रद्धातपोभ्यां विद्यान्तरोपलक्षणादथ य एतौ पन्थानौ न विदुः, ते कीटा दन्दशूका इति मार्गद्वयभ्रष्टानां कष्टामधोगतिं गमयन्ति सर्वोपासकानां देवयानपितृयाणान्यतरेण नियमः स्मृतिरपि शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते एकया यात्यनावृत्तिमन्ययावर्तते पुनरिति तस्मादनियमः ॥३१॥

विदुषः प्रकृतदेहपातनानन्तरं देहान्तरमुत्पद्यते न वा इति सन्देहे पुराणेषु तत्ववेत्तॄणामपि अन्तरतमानाम्नो वेदप्रवर्तकः आचार्यो विष्णोराज्ञया द्वापरान्ते कृष्णद्वैपायनरूपेण शरीरान्तरं जग्राहेति स्मर्यते तथा सनत्कुमारः स्कन्दरूपेणोमामहेश्वराभ्यामजायत एवं वशिष्ठादयः तत्त्वविद एव शापवरादिना स्वेच्छया शरीरान्तराण्यगृह्णन्निति स्मरणात् मुक्तिस्तत्त्वविदां पाक्षिकी इति प्राप्ते आह यावदिति — ये एते उदाहृतास्तत्त्वविदो नाधिकारिकाः

…दधि मव तिरा रि म ॥

168

पूर्वकल्पे महतां तत्प्रसादेश्वर मृपास्यास्मिन्कल्पे नानादेहे भोग्यमधिकारि
पदं मन्त्रिरे क्षीणप्रारब्धकर्माणो मोक्ष्यन्ते तथानारब्धकर्माणां तत्ज्ञानेन दाहस्य
निवारयितुमशक्यत्वात्तद्विद्वांसस्तेऽपि मुक्तिर्निश्चितैव ॥३२॥

20 अ॰ ॥अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥३३॥

तत्र श्रुतौ अस्थूलमनण्वह्रस्वमित्यादिप्रतिषेधाः ब्रह्मणो बोधनाय पठिता
एवमशब्दमस्पर्शमरूपमित्येतद् यत्तदद्रेश्यमग्राह्यमेवमन्येऽपि ते किं सर्वेऽपि स-
र्वत्र उपास्यतया प्राप्यन्ते उत यथाशाखं व्यवस्थिता इति श्रुतिभेदात्तु न व्यवस्था
इत्याह अक्षरेति अक्षरविषयाणां विशेषप्रतिषेधबुद्धीनां सर्वत्रावरोधः उपसं
हारः कृतः सामान्यतद्भावाभ्यां समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्म
प्रतिपादनप्रकारः तदेव सर्वत्र प्रतिपाद्यं ब्रह्माभिन्नं प्रत्यभिज्ञायते तत्र किमि
त्यन्यत्र कृता बुद्धयो अन्यत्र न स्युः तत्र विधिरूपविशेषणानि पूर्वमुक्तानि
प्रतिषेधरूपाणीहेति तस्मान्निषेधाः उपसंहर्तव्याः यथा अहीने पुरोडाशिनी
षु उपसत्सु चोदितासु पुरोडाशप्रदानमन्त्राणां अग्नेर्वै होत्रं वेरध्वरम् इत्या
दीनां सामवेदोत्पन्नानामपि अध्वर्युभिः सम्बन्धो यथा भवति अध्वर्यु
कर्तृकत्वात् पुरोडाशप्रदानस्य प्रधानतन्त्रत्वादङ्गानां एवं ब्रह्मस्य
क्षरतन्त्रत्वात्तद्विशेषणानां सर्वत्र सम्बन्धः तदुक्तं प्रथमकाण्डे गुणमुख्य
व्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोग इत्यत्र ॥३३॥

॥इयदामननात् ॥३४॥ 21 अ॰

ऋतं पिबन्तौ सुकृतस्य लोके इत्यत्र द्वयोर्भोक्तृत्वं प्रतीयते द्वा सुपर्णेति मन्त्रे
तयोरन्य इत्यादिना एकस्यैव भोक्तृत्वं इतरस्याभोक्तृत्वं अतो वेद्यभेदात् विद्याभे
द इति प्राप्ते आह इयदामननेति इयत्तापरिच्छिन्नं द्वित्वोपेतं वेद्यस्वरूपमभिन्नम्
आम्नायाद्यतीतं छत्रिन्यायेन विवक्षितं वेद्यमेकमिति द्वित्वस्योभयत्रापि
प्रत्यभिज्ञानात् अत एकविद्या ॥३४॥

22 अ॰

॥अन्तरा भूतग्रामवत् स्वात्मनः ॥३५॥

यत्साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तर इत्येकशाखायां द्विःकहोलेन पठितं
अपरोक्षादित्यत्र विभक्तिव्यत्ययेन अपरोक्षमित्यर्थः तयोर्नैरन्तर्येणाव्यतिरि
क्ततया पठितयोः पौनरुक्त्यपरिहाराय विद्याभेद इति प्राप्ते आह अन्तरेति
सर्वान्तराभूतत्वस्यात्मन आम्नानाविशेषात् तच्चैकस्मिन्वस्तुनि सम्भवति द्वयो
स्तथात्वे एकस्य न हि भावः आवश्यकः तस्मात्सर्वान्तरस्य वेद्यस्यैकत्वान्न विद्याभेदः ॥

॥अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ॥३६॥

भेदानभ्युपगमे आम्नानभेदानर्थक्यमिति न परिहृयते अभ्यास इति नायं दोषः उपदे
शान्तरवत् स आत्मा तत्त्वमसि श्वेतकेतो इत्यादौ नवकृत्वोऽभ्यासेऽपि न विद्याभेद एवमिहापि

॥व्यतिहारो विशिंषन्ति हीतरवत् ॥३७॥

तद्योऽहं सोऽसौ योऽसौ सोऽहमिति ऐतरेयिणः अहं त्वमसि त्वमसि चेति तत्र किं व्यतिहारेणा
परस्परं उभयरूपा मतिः कर्तव्या उतैकरूपैवेति एकरूपैवेति तत्रापि संसारिणो
ईश्वरात्मत्वमतिः ईश्वरे संसार्यात्मत्वबुद्धौ तु ईश्वरो निकृष्टः स्यादिति प्राप्ते आह
व्यतिहारेति न हीदं तत्त्वावबोधप्रकरणम् किन्तु विद्याप्रकरणम् तच्चाध्यानाय

परस्परं व्यतिहारेणोभयरूपमति; कार्या इतरथा तु यथेतरे सर्वात्मत्व ब्रह्मत्वयो गुणाः आध्यानायाम्नायन्ते तथा निर्दिशन्ति उपासकाः समाम्नातारः उभये चारणोऽन्वहमस्मि अहं त्वमसीति ॥ ३७ ॥

॥ सैव हि सत्यादयः ॥ ३८ ॥

स यो हैतन्महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति वाजसनेयके उक्ता तयाजयत्सत्यं ह्येवासावादित्यो य एष एतस्मिन्मण्डले इत्यादि तत्र एते सत्यविद्या भेदेन फलस्य योगात् जयतीमांल्लोकान् इत्यादि यस्य हन्ति पाप्मानं य एवं वेदेति प्राप्ते आह सैवेति एकैवेयं सत्यविद्या तथा तत्सत्यमिति प्रकृतार्कर्षणात् फलस्य पाप्मक्षयस्य तस्यैव निवेदहरहरिति चाप्युक्तं गौणत्वापाततस्तथा निर्दिष्टस्य नाफलत्वं तस्मादेकैवेयं विद्या ॥ ३८ ॥

॥ कामादीतरत्र तत्र चायतनादिभ्यः ॥ ३९ ॥

छान्दोग्ये दहरोऽस्मिन्नन्तर आकाश इति हृदयान्तर्गतत्वेन प्रस्तुतस्य दहराकाशस्य सत्यकामत्वादयो गुणा उक्ताः वाजसनेयके तु य एषोऽन्तर्हृदय आकाश इति हार्दाकाशस्य सर्ववशित्वादयो गुणाः तत्र न परस्परोपसंहारः दहरस्योपास्यत्वेन हार्दाकाशस्य ज्ञेयत्वेन विद्याभेदादिति प्राप्ते आह कामादीति सत्यकामत्वादीनामर्थः सत्यकामादीनामेतिवत् तत्र वशित्वादीनां दहराकाशे उपसंहारः उपास्ये भविष्यति सत्यकामत्वादीनां हार्दाकाशे उपसंहारस्तु विभूतिप्रदर्शनाय परोक्तस्तु न्यायेः विद्याभेदोऽपि उभयत्राकाशपदवाच्यस्यात्मन एकत्वात् दहरस्यात्मत्वं पूर्वमुक्तम् हार्दस्यापि महानज आत्मेत्युपक्रमादात्मत्वं तस्मादुभयत्रोपसंहारः ॥ ३९ ॥

॥ आदरादलोपः ॥ ४० ॥

वैश्वानरविद्यायां तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं स होमं जुहुयात् प्राणाय स्वाहेति इत्यादि प्राणाहुतयः यद्यन्नेनाकस्मिंश्चित् भोजनलोपेऽपि उपासकस्य प्राणाहुतिर्न लुप्यते पूर्वोऽतिथिभ्योऽश्नीयादिति अतिथिभोजनात् पूर्वमप्युपासकस्य यजमानस्य भोजनसमापयन्त्या श्रुतेः प्राणाहुतौ चावश्यकत्व दर्शनात्प्राथम्यं निन्दन्ति यथाहैवं स्वयमहुत्वाग्निहोत्रं परस्य जुहुयात् तादृगस्यात् तस्मात्प्राणाहुतेरलोप इति आशंकते आदरेति ॥४०॥

उपस्थितेऽतस्तद्वचनात् ॥४१॥

तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयमिति भोजनार्थस्यान्नस्य होमद्रव्यत्व श्रवणाद्भोजन लोपे भोजनोपद्रव्याभावादाहुति लुप्यते आदरस्तु सति भोजने प्राथम्य विधानाय भविष्यति तस्माद्भोजन लोपे प्राणाहुति लोप इति समाधत्ते उपस्थितेति ॥४१॥

तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धः फलम् ॥४२॥

उद्गीथादिषु कर्माङ्गेषु प्रतिमादिवत्प्रतीकभूतेषु विधीयमाना देवतोपासना ज्ञानवद्भिस्तैश्च कर्म स्वनुष्ठीयमानेषु कर्माङ्गेषु नित्यमेनानुष्ठेया कर्म प्रकरणमाम्नायाध्ययनाम्नानादपि वाक्यात्क्रतुसम्बन्धोपपत्तेः, यथा यस्य पर्णमयी जुहूर्भवति इत्यनारभ्याधीतस्यापि पर्णमयीत्वस्य जुहू द्वारा वाक्यात्क्रतुसंबन्धस्तथा च एवं विद्वान् उद्गायति य एवं विद्वान् साम उद्गायति

इत्याद्यभिचरित क्रतु संबन्धि सामोद्गीथादिष्वाश्रितदुपासनानां
क्रतु संबन्धः प्रतीयते तस्मात्कर्मसु नियता उपास्तय इति
प्राप्त आह तन्निर्धारणादिति, यथा-चमसेनापः प्रणयेत् गोदो
हनेन पशुकामस्येति विधीयमानमपि गोदोहनं न क्रत्वर्थं त्वा
दैच्छिकम्, न तु प्रणयनादिवन्नियतं तथा कर्माङ्गान्या
श्रित्य विधीयमाना उपास्तयो न क्रत्वर्थाः किन्तु पुरुषार्थाः
कर्मफलात्पृथक्फलश्रवणात् । वर्षति हास्मै कामनीत
पञ्चविध सामनि वृष्टि देवतायुपासनस्य कामवृष्टिः क्रतु
फलात्, पृथक् प्रतिबध्नत इति प्रतिबन्धः, फलत्वेन श्रूय
ते किं च तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेदेत्यस्मिन्
ज्ञानवद्वाप्यस्ति कर्म्यशेषे उपासकानुपासकयोः सूपाधार
भेदेन तेनाङ्ग न कर्मानुष्ठानं, निःसंशयमाम्नायते तस्मात्कर्म-
स्वनियता उपास्तयः ॥४२॥

[२०अ] प्रदानवदेव तदुक्तम् ॥४३॥

वायुर्वाव संवर्ग इति संवर्गविद्यायामधिदैवं वायुरूपास्य
त्वेन श्रुतः अध्यात्मं च प्राणः तत्र प्राणस्य वायुकार्यत्वेन
तत्वभेदाभावादुभयोरेकीकरणेनोपासनं पृथगिति प्राप्ते
आह प्रदानवदिति तत्वभेदाभावेऽपि कार्यत्वेन कारणत्वेन वा
अवस्थाभेदसत्वादित्यधिदैवमध्यात्मं भिन्नविभिन्न
वध्यानुचिन्तनं श्रुतौ विनियुक्तत्वात् यथा इन्द्राय राज्ञे पुरो
डाशमेकादशकपालमिन्द्रायाधिराजायेन्द्राय स्वराज्ञ इति
त्रिपुरोडाशानां यागानामिन्द्रस्यैकत्वे गुणभेदात् पृथक् पुरोडा
शानां प्रदानं कृतम् तथैवास्यापि वायुतत्वस्य स्थानभेदात् पृथगनु
चिन्तनम् ॥४३॥

[२०अ.] लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥४४॥

अग्निरहस्य ब्राह्मणे श्रुतं षट्त्रिंशत्सहस्राण्यपश्यदात्मनो
ऽग्नीनर्कान् मनोमयान्मनश्चित इति अस्यार्थः

शतसंवत्सरमायोति पुरुषायुषि षट्त्रिंशत सहस्रं दिना
नि भवन्ति तत्रैकैकस्मिन्दिने या मनोवृत्तिस्तस्या एकैका
ग्नित्वेन ध्यानं भवति अयमर्थः षट्त्रिंशत सहस्राणि मनोवृ-
त्तयस्ते च प्रत्यगात्मसंबन्धित्वेन ध्येयाः, एते एवाचनीयाः
मनसा चीयन्त इति मनश्चित एवं वाक्चितः प्राणचित
श्चक्षुश्चित इति ते चाग्नय आरण्यक प्रकरणस्थत्वात् कर्मशेषाः
न स्वतन्त्रा इति प्राप्त आह लिङ्गभूयस्त्वादिति ॥४४॥

(पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् ॥४५॥

स्वतन्त्रा विद्यात्मका भवन्ति स्वातन्त्र्ये लिङ्गानां भूयस्त्वात्।
यथा तान्हैतानेवंविदे सर्वदा सर्वाणि भूतानि चिन्वन्ति अपि
स्वपत इति उपासकस्य स्वपतोऽपि अग्नयो नोच्छिन्नाः
मनो वागादि वृत्ति उपरमेऽपि प्रतिबुद्धस्य पुरुषवृत्तीनां व-
र्तमानत्वात्, अशेष पुरुषमनोवृत्तीनां मग्नित्वेन वर्णनात्,
तस्मादेवंविदे यावज्जीवमानानां मविच्छेद नैरन्तर्यं प्रतीयते
इति स्वातन्त्र्ये लिङ्गम्। कर्मणो यावज्जीव नैरन्तर्याभावात्त
च्छेषत्वाभावे कथं तस्य नैरन्तर्यम्। लिङ्गं प्रकरणाद्बलीय इत्युक्तं
पूर्वकाण्डे तस्मात्स्वतन्त्रा विद्यात्मका मनश्चिदादयः ॥४४॥

॥पूर्वविकल्पः प्रकरणात्स्यात्क्रियामानसवत् ॥४५॥

यदुक्तं स्वतन्त्रा मनश्चिदादय इति तन्नाशङ्कते पूर्वविकल्प इति न स्वतन्त्रा एवैते
क्रियामयस्याग्नेः प्रकरणात् न च लिङ्गात्प्रकरणं दुर्बलं सम्मादेकाग्निप्रशंसा
रूपान्यार्थदर्शनरूपलिङ्गस्य प्रस्तुतदुर्बलत्वात् असत्यामन्यस्यां प्राप्तौ गुणा
वादेनापि उपपद्यमानं लिङ्गं न प्रकरणम् बाधितुमुत्सहते तस्मात्प्रकर
णात् क्रियाङ्गान्येवैते मानसवत् यथा दशरात्रस्य दशमेऽहन्यविवाक्ये
पृथिव्या पात्रेण समुद्रस्य सोमस्य प्रजापतये देवताये गृह्यमाणस्य
ग्रहणासादन हवनाहरणोपादान भक्षणानि मानसान्येवाम्नायन्ते
मनसा प्रस्तौति मनसोद्गायति इत्यादिना स च मानसोऽपि ध्येयोऽपि
ग्रहकल्पः क्रियाप्रकरणात् क्रियाशेष एव भवति एवमयमग्निः ॥४५॥

॥अतिदेशाच्च ॥४६॥

पुरुषान्तरेणाशङ्कते अतिदेशादिति अतिदेशश्चोपोद्बलकः षट्त्रिंशत् सहस्राण्यग्न्यर्काः तेषामेकैक एव तावान् यावानसौ पूर्व इति सत्तिसामान्येऽतिदेशः अतः पूर्वेणैकार्थेन क्रियाप्रवेशिनाग्निना सामान्यादिकानाग्नीन् अतिदिशन् क्रियाङ्गत्वं द्योतयति।

॥विद्यैव तु निर्धारणात्॥४७॥

आशंकां वारयति विद्यैवेति तु शब्दो व्यावर्त्तमानं विद्यात्मका एवेते स्वतन्त्रा तथा निर्धारणात् ते हैते विद्याचित एवेति विद्यया हैवैत एवं विदश्चिता भवन्तीति॥४७

॥दर्शनाच्च॥४८॥

दर्शनाच्चेति पूर्वदर्शितं लिङ्गान् ॥४८॥

॥श्रुत्यादिबलीयस्त्वाच्च न बाधः॥४९॥

असत्यामन्यप्रापौ लिङ्गं न साधकमित्यत्रोत्तरमाह श्रुत्यादीति नात्र प्रकरणादस्माभिर्लिङ्गं न्यायते किन्तु श्रुत्या तथा हि ते हैते विद्याचित एवेति सर्वदा सर्वाणि भूतानि चिन्वन्त्यपि स्वपत इति च सावधारणा श्रुतिः क्रियाङ्गत्वे पीडिता स्यात् तस्मात्स्वातन्त्र्यपक्ष एव ज्यायान् ॥४९॥

॥अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम्॥५०॥

स्वातन्त्र्ये युक्त्यन्तरमाह अनुबन्धेतियतः क्रियावयवान् मनआदिव्यापारेष्वनुबध्नाति ते मनसैवाधीयन्ते मनसाचीयन्ते मनसैव ग्रहा गृह्यन्त इति आदिशब्दादतिदेशाद्यपि यथासम्भवं ज्ञेयं अग्नित्वसामान्यात् नामातिदेशवत् प्रज्ञान्तरपृथक्त्ववत् यथा शाण्डिल्यप्रज्ञान्तराणि शाण्डिल्यविद्याप्रभृतीनि स्वस्वानुबन्धेनानुबध्यमानानि कर्मभ्यः प्रज्ञान्तरेभ्यश्च पृथक् स्वतन्त्राणि यथा दृष्टश्चावेष्टेः राजसूयप्रकरणपठितायाः प्रकरणादुत्कर्षः तदुक्तम्पूर्वकाण्डे क्रत्वर्थायामितिचेन्न वर्णत्रयसंयोगादिति ॥५०॥

॥न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः॥५१॥

यदुक्तं मानसवदिति तत्रोच्यते न सामान्येति नात्र मानसस्य ग्रहसामान्याद्यपि क्रियाप्रवेशत्वं पूर्वोक्तश्रुत्यादिहेतुभ्यः केवलपुरुषार्थत्वोपलब्धेः मृत्युवत् यथा स एष एव मृत्युर्य एष एतस्मिन्मण्डले पुरुष इति अग्निर्वै मृत्युरिति चाग्न्यादित्यपुरुषयोः समानेऽपि मृत्युशब्दप्रयोगेनात्यन्तसामान्यापत्तिः यथासौ वाव लोको गौतमाग्निः तस्यादित्य एव समित् इत्यत्र न समिदादिसामान्याल्लोकस्याग्निभावापत्तिस्तद्वत् इत्यर्थः ॥५१॥

॥परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः॥५२॥

परेण च एवोऽग्निश्चित इत्यनन्तरेण ब्राह्मणेन शब्दस्य ताद्विध्यं केवलविद्याविधित्वं प्रयोजनं लक्ष्यते विद्यया तदारोहन्ति यत्र कामाः परागताः न तत्र दक्षिणा यन्ति नाविद्वांसस्तपस्विनः इति श्लोके केवलं कर्म निन्दन् विद्यां च प्रशंसन् एतद्दर्शयति यदेतन्मण्डलं तपतीति ब्राह्मणमपि विद्याप्रधानं लक्ष्यते न कर्मप्रधानत्वं तत्सामान्यात्मता भवतीति विद्याफले नैवोपसंहारात् न कर्मप्रधानत्वं तत्सामान्या

दितरस्य तथात्वात्तस्मात् मनश्चिदादीनां केवलनियात्मकत्वं इत्याहुपरेणा चेति ॥५२॥
॥ एक आत्मनः शरीरे भावात् ॥५३॥
मनश्चिदादीनाम्पुरुषार्थत्वमुक्तं तत्र कः पुरुष इति प्रसङ्गात् आह एक इति॥ एतदधि
करणं पूर्वोत्तरमीमांसयोरुपयोगि देहातिरिक्तस्य स्वर्गमोक्षभागिनः प्रतिपादक
त्वात् तत्र लोकायतिका देह एवात्मा इति वदन्ति अन्वयव्यतिरेकाभ्यां देह एव
चैतन्योपलम्भात् क्रमुकनागवल्लीचूर्णानां संयोगान्मदशक्तिरिव देहाकार
परिणतेभ्यो भूतेभ्यः जायमानं चैतन्यं कथं नाम तदन्यनिष्ठं स्यात् तस्माच्चे
तनो देह एवात्मा इति आशङ्क्य एक इति यद्यपि शास्त्रप्रामाण्येन शास्त्रफलो
पभोगयोग्यस्य देहातिरिक्तस्यात्मनोऽस्तित्वं भाष्ये उक्तं तथाप्यत्र स्वयं सूत्रकृता
देहाद्यतिरिक्तस्यात्मन आक्षेपपुरःसरं व्यतिरिक्तत्वं प्रतिपादितं ॥ ५३॥

॥ व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ॥ ५४॥

सोपाधिभूतोपलब्धिः भूतेभ्यो भिन्ना षड्विधविषयत्वात् षड्विधविषयव्यतिरि
क्तं यथा रूपाच्चक्षुः स्वस्य तादृशचैतन्यस्यात्मत्वम्वदन्तम्प्रति कथं भौति
करूपत्वमापयेत व्यतिरेकव्यभिचारस्य प्रसक्त्यापि देहे परलोकगामिन
श्चिदात्मनः शास्त्रेणापन्नत्वात् अतस्तद्भावाभावित्वात् भौतिकाद्भिन्नो
हमिदमद्राक्षं इदं पश्यामीत्युपलब्धिस्वरूपो देहान्व्यतिरिक्तो नित्यश्चात्मा
किन्तु प्रदीपाद्युपकरणे सति उपलब्धिर्भवति न तु प्रदीप एवोपलब्धिः
तथा देहे सत्युपलब्धिः न तु देह एव सा इति तस्माद्देहातिरिक्त आत्मेत्याहुर्व्यतिरेक इति ॥५४॥

॥ अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५५॥

ओमित्येतदक्षरमुद्गीथमुपासीत पञ्चविधं सामोपासीत उक्थमिति वै प्रजा वदन्ति तदि
दमेवोक्थमियमेव पृथिवी इत्येवमाद्या उद्गीथादिकर्माङ्गावबद्धाः प्रत्ययाः प्रति
वेदं शाखाभेदेषु विहितास्ते तच्छाखागतेष्वेवोद्गीथादिषु भवेयुः सर्वशाखा
गतेषु वा इति प्राप्ते ब्रूते अङ्गावबद्धा इति तुर्व्यावृत्त्यर्थः नत्वेव स्थिताः किन्तु
सर्वशाखास्वनुवर्तेरन् उद्गीथादिश्रुतेः सर्वत्राविशेषात् सन्निधानात्
श्रुतिर्बलीयसीति तस्मात्सर्वे सर्वत्र ॥५५॥

॥ मन्त्रादिवद्वाऽविरोधः ॥ ५६॥

अथवा नैवात्र विरोधः मन्त्रादिवत् मन्त्राणाङ्कर्मणां गुणानां शाखान्तरोप
संहारो दृश्यते कुतनो वै प्रयाजाः समानत्र होतव्याः तथा क्वचित् अग्नीषोमी
यपशौ न प्रजादि पदे तत्रापि शाखान्तरीय मन्त्रवर्णाच्छाग एव वेदान्तरोत्प
न्नानां अग्नेर्वै होत्रं वेरित्यादिनाम्वेदान्तरे परिग्रहः ऋग्वेदस्य यो जात
इत्यादीनां आध्वर्यवे सत्रनीयम् शस्यमित्यत्र परिग्रहस्तस्मादाश्रया
णां कर्माङ्गाणामिव आश्रितानामप्युपासनानामपि इत्यविरोधः ॥५६॥

॥ भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥ ५७॥

वैश्वानरविद्यायां प्राचीनशालाख्यायां व्यस्तस्य समस्तस्य चोपासनम्

भूयते व्यस्तोपासनं कन्न मात्मान मुपास्त इति दिवमेव भगवो राजन्निति होवाचै
ष वै सुतेजा आत्मा वैश्वानरो यं त्वमात्मानमुपास्ते इत्यादि समस्तस्य वैश्वानरस्य मूर्धैव
सुतेजा इत्यादि पञ्चैव पादा विद्यन्ते न तत्र किं उभयमप्युपास्यं उत समस्तमेव
ति अविशेषादुभयमपि इति प्राप्ते आह भूम्न इति भूम्नः समस्तस्यैव ज्यायस्त्वमु
मुख्यतयोपास्यत्वं न प्रत्येकं यतः श्रुतिः तथा भूम्नः ज्यायस्त्वं एकवाक्यत्वात् दर्शयति

॥ नानाशब्दादिभेदात् ॥५८॥

छान्दोग्ये दहरविद्या शाण्डिल्यविद्या मधुविद्यादयः पठिताः तथाशाखान्तरेष्वपि
तत्र पूर्वाधिकरणन्यायेन समस्तोपासनस्य श्रेष्ठत्वात् वेद्यस्य ब्रह्मण एकत्वात्
च सर्वासामेव स्वपरशाखागत, मेकवेद्यन्यायप्राप्तं गुणजात मुपसंहार्यमिति सर्वा
सामेकविद्यात्वमिति प्राप्ते आह नानेति अनन्तासु विद्यास्वेकीकरणानुष्ठा
नं तावदशक्यम् इति विद्याभेदोऽभ्युपगन्तव्यः न च वेद्यैकत्वान्न भेदः गुणभेदेन भेदो
पपत्ते उपासीत कर्तुं कुर्वीतेत्येवमादिशब्दभेदात् आदिशब्दाद् गुणादिभेदः तस्मा
द्विद्यानानानात्वम् ॥५८॥

॥ विकल्पोऽविशिष्टफलत्वात् ॥५९॥

स्थिते विद्याभेदे विचार्यते द्विविधान्युपासनानि अहंग्रहाणि प्रतीकानि चेति आत्मनः
सगुणोपासनेषु अहंग्रहस्य चतुर्थे वक्ष्यमाणत्वात् न्यहंग्रहाणि [illegible] अनात्मवस्तुषु
देवतादृष्ट्या संस्कृत्योपास्यमानानि प्रतीकानि तत्राहंग्रहेषु शाण्डिल्याद्युपासने
षु एक एकं द्वे बहूनि वा यथाकामं अनुष्ठेयानि न समुच्चय नियमो नापि विकल्प इति
प्राप्ते आह विकल्प इति विकल्प एवासाम्भवितुमर्हति ईश्वर साक्षात्कार उपा
सना फलं तच्चैकेन सिद्ध्यति ततोऽन्यवैयर्थ्यम् कि [illegible] उपासनेषु न प्रमाणज
न्यः साक्षात्कारः किन्तु निरन्तर भावनया ध्येयतादात्म्याभिमानः एवञ्च एक-
मुपासनमनुष्ठाय तत्परित्यज्यान्यत्र वर्तमानस्य पुरुष-
स्य चित्तविक्षेपे कथं नाम दृढीभवेत् । तस्मादानर्थक्याविक्षेप-
यो निर्धारक द्विकल्पो नियम्यते ॥५९

६० ॥ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥

यास्तु पुनः काम्यास्तु विद्यास्तु आत्मीयं फलं साधयन्तीषु
साक्षात्करणापेक्षा नास्ति यथा एतमेवं वायुं दिशां वत्सं
वेद न पुत्ररोदं रोदिति स यो नाम ब्रह्मेत्युपास्ते यावन्ना-
म्नो गतं तत्रास्य कामचारो भवति इत्यादिषु पूर्वाधिकर-
णन्याय इत्याशङ्क्य समाधत्ते काम्यास्त्विति । यथा-
हं ग्रहेषु देवो भूत्वा देवानप्येति इति जीवन्नेव भावना-
प्रकर्षादेव साक्षात्कारं प्राप्य देवत्वमुपैति ।

ततया प्रतीकेषु साक्षात्कारफलत्वं तत्र तत्र भोग्य
वस्तुप्राप्तय: फलम्, तथा च भिन्नभिन्नफलत्वान्ना
नर्थक्यं विक्षेपशंकानु दूरापेता तस्माद्विकल्पेन
एकं वा बहूनि वा समुच्चित्य वा यथा काममुपासि
तव्यम् ॥६०॥

[३६०] अङ्गेषु यथाश्रयभाव: ॥६१॥

द्विविधानि प्रतीकानि लौकिकानि कर्माङ्गानि चे
ति लौकिकान्युक्तानि कर्माङ्गेषु समुच्चयो विकल्पो
वेति चिन्ता तत्र कर्मणि अङ्गानां समुच्चयादङ्गाव
लम्बनमपि समुच्चीयन्त इति प्राप्त आह अङ्गेष्विति
ग्रहं वा गृहीत्वा चमसं वोन्नीयेत्यादिवचनान्निपत
वोर्यथाभाव: श्रुत:, तस्माद्विकल्प समुच्चयो यथा
कामम् ॥६१॥

शिष्टेश्च ॥६२॥

यथाश्रयास्तोत्रादय: त्रिषु वेदेषु शिष्यन्ते एवमा
श्रिता: प्रत्यया नोपदेशकृतोऽपि कश्चिद्विशेषस्तदा
श्रय प्रत्ययानाम् ॥६२॥

समाहारात् ॥६३॥

होतृसदनाद्धैवापि दुरुद्गीथमनुसमाहरति इति प्रणवो
द्गीथैकत्वविज्ञानादुद्गाता कर्मक्षतं होतृकर्मणा प्र-
ति समादधाति इति ब्रुवन् सर्ववेदोदित प्रत्ययानां
संहारं सूचयति ॥६३॥

गुणसाधारण्यश्रुतेश्च ॥६४॥

लिङ्गदर्शनमाह गुणसाधारण्येति विद्यागुणस्य ओंका-
रस्य साधारण्यं सर्वसाधारण्यमपि एवमुपपद्यते
ओमिति त्रैयंत्रयी विद्या वर्त्तते ओमित्याश्रावयति
इत्यादि एवं नाश्रय साधारण्यादाश्रयी साधारण
म् ॥६४॥

न वा तत्सहभावाश्रुतेः ॥ ६५ ॥

नवेति पक्षान्तरव्यावर्त्तनं न यथाश्रय भाव उपासनानां भवितुमर्हन्ति तत्सहभावाश्रुतेः, वेदत्रय विहिताङ्गानां सहभावः श्रूयते ग्रहं वा गृहीत्वा चमसं वो नीय स्तोत्र मुपाकरोति स्तोत्र मनु शंसतीति न तूपासनानां सहभावः श्रुतः तस्माद्यथाकाममेवोपासनान्यनु ष्ठीयेरन् ॥ ६५ ॥

दर्शनाच्च ॥ ६६ ॥

युक्त्यन्तरमाह दर्शनाच्चेति श्रुतिरपि असहभावंप्रत्य यानामाह एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्च ऋत्विजोऽभि रक्षतीति सर्वे प्रत्यया यदि संहारेषु सर्वे सर्व विद इति न विदुषा ब्रह्मणा परिपाल्यत्वं मितरेषा मुक्तं सम्भवति तस्माद्यथाकाममुपासनानां सम च्चयो विकल्पो वेति ॥ ६६ ॥

इति श्री ब्रह्म सूत्र तात्पर्य विवरणे तृतीयाध्यायस्य तृतीयः पादः समाप्तः ॥

इति गुणोपसंहार पादः ॥

॥ पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

॥ आवृत्तिरसकृदुपदेशात् ॥ १ ॥

अथेदानीमात्मनो देहातिरिक्त विज्ञानं विना परलोक गामित्वानिरूपात ज्योतिष्टोमादि प्रवृत्तिरेव नस्यादिति कर्मप्रवृत्तिकरत्वे नैवोपनिषद्या त्मतत्व ज्ञानकमोङ्गं इति प्राप्ते आह पुरुषार्थोऽत इति अतो वेदान्त विहि ताद्द्वितीयात्मतत्त्वज्ञानात्स्वतन्त्रात्पुरुषार्थः सिद्ध्यति केवलदेहातिरिक्त आत्मज्ञानस्यास्तु नामकृतार्थत्वं औपनिषदन्तु प्रत्युत क्रियाकारक फलप्रतिषेधकमेव ननु तत्त्वविदां जनकादीनां कर्मप्रवृत्ति लक्षणा आ चारो दृश्यते बाढं लोक संग्रहार्थमेवायन्तेषामाचारः तेषामपि यदि मुक्त कर्मानुष्ठानं कथन्तर्हि प्रव्रज्यादि वैयर्थ्ये श्रुतिरुपपद्यते तत्किम्प्रज या करिष्यामो येषां नोयमात्मा लोक इति तस्मादौपनिषद मात्मतत्व

तानं स्वतन्त्रं पुरुषार्थं न कर्त्वयेम् ॥१॥

॥शेषत्वात्पुरुषार्थवादो यथान्येष्विति जैमिनिः॥२॥

अथात्र प्रत्यवतिष्ठन्ते षडभिः सूत्रैः शेषत्वादिति कर्तृत्वेनात्मनः कर्मशेष-
त्वाद् ब्रह्मविज्ञानमपि विशिष्टात्मविषयद्वारेण कर्मसम्बन्धये
वेति तस्मिन्नवगत प्रयोजने ऽन्या फलश्रुतिरर्थवाद इति जैमिनिराचार्यो
मन्यते यस्य पर्णमयी जुहुर्भवति न स पापं श्लोकं शृणोतीति इतिवत् ॥२॥

॥आचारदर्शनात्॥३॥

जनको ह वैदेहो बहुदक्षिणेन यज्ञेनेजे यक्ष्यमाणो वै भगवन्तो ऽहमस्मीत्येव-
मादीनि कर्मसम्बन्धदर्शनानि भवन्ति केवलज्ञानाच्चेत्पुरुषार्थसिद्धिः
स्यात्किमर्थं बहुायाससमन्वितानि कर्माणि ते कुर्युः अर्के चेन्मधु वि-
न्देत किमर्थं पर्वतं व्रजेदिति न्यायात् ॥३॥

॥तच्छ्रुतेः॥४॥

युक्त्यन्तरमाह तच्छ्रुतेरिति यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव
वीर्यवत्तरं भवतीति कर्मशेषत्वश्रवणात् केवलविद्यायाः न पुरुषार्थहेतुत्वम् ॥४॥

॥समन्वारम्भणात्॥५॥

युक्त्यन्तरमाह समवेतीनं विद्याकर्मणी समन्वारभेते इति कर्मशेषत्व-
श्रवणात् विद्यायाः कर्मसाहित्यवगमात् न स्वातन्त्र्यम् ॥५॥

॥तद्वतो विधानात्॥६॥

किञ्च आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमा-
वृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयान इत्यादिश्रुतिः समस्तवेदार्थ-
विज्ञानवतः कर्माधिकारं दर्शयति अतो ऽपि न स्वातन्त्र्येण फलहेतुत्वं इत्याह तद्वत इति ॥६॥

॥नियमाच्च॥७॥

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतो ऽस्ति न कर्म
लिप्यते नरे एतद्वै जरामर्यं सत्रं यदग्निहोत्रं जरया ह्येवास्मान्मुच्यते मृत्यु-
ना वेति एवमादिनियमादपि कर्मशेषत्वं विद्याया इत्याह नियमाच्चेति ॥७॥

॥अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात्॥८॥

समाधत्ते अधिकेति तुशब्दात्कर्मशेषत्वनिरासः कुतः अधिकोपदेशा-
त् यदि संसार्येवात्मा वेदान्तेषूपदिष्टः स्यात्तदोक्तफलश्रुतेरर्थवादत्वं
स्यात् अधिकस्तु शारीरादात्मनो ऽसंसारी ईश्वरः कर्तृत्वादिधर्म-
रहितो ऽपहतपाप्मत्वादिविशेषणः परमात्मा वेद्यत्वेनोपदिश्यते
वेदान्तेषु न च तद्विज्ञानं कर्मप्रवर्तकं किन्तु कर्मोच्छेदि जनयतीति
न स्वातन्त्र्यात्पुरुषार्थो ऽतः शब्दादिति यदुक्तं तत्तथैव ॥८॥

178

॥तुल्यन्तु दर्शनम्॥ ९॥

यदुक्तमाचारदर्शनादिति तत्राह तुल्यन्तु दर्शनमिति एतद्ध स्म वै तत्पूर्वे विद्वांसो ऽग्निहोत्रं न जुहवांचक्रिरे एतन्त्वे तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणाया वित्तैषणाया लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्ति इत्यादि रूपं याज्ञवल्क्यादीनां ब्रह्मविदामकर्मनिष्ठत्वं दृश्यते ॥ ९॥

॥असार्वत्रिकी ॥१०॥

तच्छ्रुतेरित्यत्राह असार्वत्रिकी ति यदेव विद्ययेति श्रुतिर्न सर्वविद्याविषया किन्तु प्रकृतोद्गीथविद्याविषया इत्यर्थः ॥१०॥

॥विभागश्शतवत् ॥११॥

यदुक्तं विद्याकर्मणोः समन्वारम्भेनेति तत्राह विभाग इति विद्यान्यम्पुरुषमन्वारभते कर्मान्यम्पुरुषमिति यथा शतमाभ्यां दीयतामित्युक्ते विभज्य पञ्चाशत् एकस्मै पञ्चाशदन्यस्मै इति ॥११॥

॥अध्ययनमात्रवतः॥१२॥

तद्वतो विधानादित्यत्राह अध्ययनेति नेदमधीत्येत्यत्राध्ययनमात्रवत एव कर्मविधिरित्यध्यवसामः॥१२॥

॥नाविशेषात् ॥१३॥

यदुक्तं नियमाच्चेत्यत्राह नाविशेषादिति कुर्वन्नेवेह कर्माणि यम इत्यत्र शोभन विदुष इति विशेषासिद्धेविशेषेण नियमविधानात् ॥१३॥

॥स्तुतयेऽनुमतिर्वा॥१४॥

कुर्वन्नित्यत्रापरो विशेष इत्याह स्तुतय इति एतदुक्तं भवति यावज्जीवं कर्म कुर्वत्यपि पुरुषे विदुषि न कर्म लेपाय भवति विद्यासामर्थ्यादिति तदेव विद्यास्तुतये॥१४॥

॥कामकारेण चैके ॥१५॥

कामकारेणेति अपि चैके विद्वांसः प्रत्यक्षीकृत विद्याफलाः सन्तस्तदवष्टम्भात्फलान्तरसाधनप्रजाधनेषु प्रयोजनाभावं परामृशन्ति कामकारेणेति श्रुतिः पूर्वे विद्वांसः प्रजां न कामयन्ते किम्प्रजया करिष्यामो येषां नो यमात्मायं लोक इति अतो न विद्याकर्माङ्गम् ॥१५॥

॥उपमर्दं च ॥१६॥

किञ्च कर्माधिकारहेतोः क्रियाकारकफलादेः प्रपञ्चस्य विद्यासामर्थ्यात् स्वरूपोपमर्दं च आमनन्ति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येज्जिघ्रेदित्यादिना वेदान्तोदितात्मज्ञानपूर्विकां कर्माधिकारसिद्धिं प्रत्याशासतस्य कर्माधिकारोच्छित्तिरेव प्रसज्येत तस्मादपि स्वातन्त्र्यम् विद्यायाः ॥१६॥

॥ऊर्ध्वरेतस्सु च शब्दे हि ॥१७॥

किञ्चोर्ध्वरेतस्सु चाश्रमेषु विद्या श्रूयते ये चेमेऽरण्ये श्रद्धा तप इत्युपासते एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति ब्रह्मचर्यादेव प्रव्रजेदित्यादि न च तत्र कर्माङ्गत्वं विद्यायाः कर्माभावात् तस्मादपि स्वातन्त्र्यम् विद्यायाः ॥१७॥

॥परामर्शं जैमिनिरचोदना चापवदति हि ॥१८॥

पूर्वं स्वतन्त्रमात्मज्ञानमित्युक्तं तस्य चोर्ध्वरेतस्सु आश्रमेषु सत्त्वमत्वा तदाश्रमत्रयातिरिक्ताश्रमसद्भावश्चिन्त्यते तत्र नास्त्यूर्ध्वरेता इति जैमिनिः यतः सर्वत्र त्रयाणामेव यतः सर्वत्र त्रयाणामेव आश्रमाणां परामर्शमाह कुतः विध्यभावात् त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एव द्वितीयो ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यलोका भवन्ति इति परामर्शपूर्वकं आश्रमाणामनात्यन्तिकफलत्वं संकीर्त्यात्यन्तिकफलतया ब्रह्मसंस्थता स्तूयते ब्रह्मसंस्थोऽमृतत्वमेति तस्मात्स्तुत्यर्थमेवायम्परामर्शो न चोदनार्थः किञ्चापवदति हि श्रुतिराश्रमान्तरं वीरहा वा एष देवानां योऽग्निमुद्वासयते आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः नापुत्रस्य लोकः इत्याह परामर्शमिति ॥१८॥

॥अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥१९॥

अनुष्ठेयमाश्रमान्तरं बादरायणो मन्यते इत्याह अनुष्ठेयमिति गार्हस्थ्यवदेवाश्रमान्तरमपि अनिच्छतापि प्रतिपत्तव्यम् कुतः साम्यश्रुतेः गार्हस्थ्यनाश्रमान्तरपरामर्शश्रुतिः समाना हि त्रयो धर्मस्कन्धा इत्यादि यथाश्रुत्यन्तरविहितमेव गार्हस्थ्यं परामृष्टं एवमाश्रमान्तरमपि प्रतिपत्तव्यम् तस्मात्तुल्यमनुष्ठेयत्वं गार्हस्थ्येनाश्रमान्तरस्य एवमेतमेव प्रव्राजिनो लोकमिच्छन्ति तस्मात्परामर्शेऽपि अनुष्ठेयमाश्रमान्तरम् ॥१९॥

॥विधिर्वा धारणवत् ॥२०॥

यद्वा विधिरेवायं ब्रह्मसंस्थोऽमृतत्वमेतीति आश्रमान्तरस्य न परामर्शो धारणवत् अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीत्यत्र सत्यामप्यधोधारणेनैकवाक्यतायां प्रतीतो विधीयत एवोपरिधारणा

मपूर्वत्वात् तस्मादमृतत्वाय सन्यास्यूर्ध्वरेतसो विधीयन्ते पुनरपि त्रय
स्ते पुण्यलोकभाज एकोऽमृतत्वभागिति पृथक्त्वेन व्यपदेशवनीयुक्त अत्रया
णां स्वस्वाश्रमविहितकर्माननुष्ठाने प्रत्यवायश्रवणात् परिव्राजकस्य तु
सर्वकर्मसन्यासात् प्रत्यवायो न सम्भवतीति शमदमादिस्तु तदीयो धर्मः
ब्रह्मसंस्थताया श्रवणायनन्यव्यापारतारूपायाः उपोद्बलको न विरोधी
तस्मात्पूर्वे त्रयः आश्रमिणः पुण्यलोकभाजः अवशिष्ट परिव्राट्
अमृतत्वभाक् इत्यायान्येव ऊर्ध्वरेतसः आश्रमाः सिद्धाः सिद्ध
श्चोर्ध्वरेतःसु विधानाद्विद्यायाः स्वातन्त्र्यमित्याह विधिर्वेति ॥२०॥

॥स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥२१॥

प्रकृतमाह स्तुतिमात्रमिति उद्गीथावयवस्योंकारस्य रसतमत्वादयो
गुणाः श्रूयन्ते स एष रसानां रसतम इति तत्र रसतमत्वादिकं ओंकार
स्य स्तुतिर्न तु ध्यातव्यम् यथेयमेव जुहूरादित्यः कूर्मः स्वर्गो लोक
इत्यादौ कर्माङ्गभूतायाः जुह्वादेः पृथिव्यादिरूपेण स्तुतिः तथा
रसतमत्वादिगुणैरोंकारस्तुतिरित्याशंक्याह स्तुतिमात्रमि
ति विषमो दृष्टान्तः जुह्वादि विधिप्रकरणे पठितत्वात् स्तुतिर
स्तु रसतमत्वादिकन्तु उपनिषत्पठितत्वेन कर्मप्रकरणप
ठितोद्गीथवाक्येनैकवाक्यत्वाभावात् न स्तावकं किन्त्वोमि
त्येतदक्षरमुद्गीथमुपासीतेत्यनेनैकवाक्यत्वात् रसतमत्वा
दिकं ध्यातव्यम् ॥२१॥

॥भावशब्दाच्च॥२२॥

युक्त्यन्तरमाह भावेति उद्गीथमुपासीत, सामोपासीत अहमुक्थमस्मीति विद्या
दिति शब्दः विस्पष्टं विधित्वेन निर्दिष्टः गीताः कुर्यात् क्रियेत कर्तव्यम्
भवेत् ~~[illegible]~~ स्यादिति पञ्चमं एतत्स्यात्सर्ववेदेषु नियतं विधिलक्षणं
इति स्मरणात् भावशब्दत्वात् न च स्तुतिमात्रप्रयोजनतापां व्याइन्ये
रन् प्रतिप्रकरणञ्च फलानि श्रूयन्ते आपयिता ह वै कामानां भ
वति एष ह्येव कामागानस्येष्टे कल्पन्ते हास्मै लोकाः ऊर्ध्वाश्चा
वृत्ताश्चेति तस्मादुपासनविधानार्थो उद्गीथादिश्रुतयः ॥२२॥

॥पारिप्लवार्था इति चेन्न विशेषितत्वात्॥२३॥

अथह याज्ञवल्क्यस्य द्वे भार्ये बभूवतुः मैत्रेयी कात्यायनी च प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी इत्यादि वेदान्तोपाख्यानेषु किमिमानि पारिप्लवप्रयोगार्थानि उत सन्निहितविद्याप्रतिपत्त्यर्थानि तत्राश्वमेधे रात्रिषु राजानं सकुटुम्बमुपवेश्य तस्याग्रे वैदिकान्युपाख्यानान्यध्वर्युणा वक्तव्यानि तदिदं कर्म पारिप्लवमाचक्षीतेति विहितं तदर्थत्वे सति औपनिषदाख्यानानि अनुष्ठानोपयुक्तेरन न्याय्यमनुष्ठानं न स्तुतिः तस्मात्पारिप्लवार्था इति प्राप्ते ब्रूमः पारिप्लवे इति विद्यास्तावकत्वमेव नोपाख्यानानां एकवाक्यत्वात् पारिप्लवमाचक्षीतेति प्रकृत्य प्रथमेऽहनि मनुर्वैवस्वतो राजा द्वितीयेऽहनि यमो वैवस्वतो राजेत्याद्याख्यानानां पारिप्लवार्थानां विशेषितत्वात् औपनिषदीयानामाख्यायिकानां न तच्छेषत्वं सम्भवतीति विद्यास्तावकत्वमेव॥२३॥

॥तथा चैकवाक्यतोपबन्धात्॥२४॥

असति पारिप्लवार्थत्वे आख्यानानां सन्निहितविद्याप्रतिपादकत्वमेव युक्तं एकवाक्यतोपबन्धात् इत्याह तथा चेति तत्र तत्रैकवाक्यता दृश्यते प्ररोचनोपयोगात् प्रतिपत्तिसौकर्योपयोगात् मैत्रेयीब्राह्मणे तावदात्मा वा अरे द्रष्टव्य इत्यनेनैकवाक्यता प्रतर्दनेऽपि प्राणोऽस्मि प्रज्ञात्मेत्याद्यया जानश्रुतिरित्यत्रापि वायुर्वाव संवर्ग इत्यनया तस्मान्न पारिप्लवार्थत्वमाख्यानानाम् ॥२४॥

॥अत एव चाग्नीन्धनाद्यनपेक्षा॥२५॥

यतो विद्यायाः पुरुषार्थत्वं पुरुषार्थोऽतः शब्दादित्युक्तं अत एवाग्नीन्धनादीनि आश्रमकर्माणि विद्यायाः स्वार्थसिद्धौ नापेक्षितव्यानि यद्यपि प्रथमाधिकरणे विद्यायाः स्वतन्त्रपुरुषार्थत्वप्रतिपादनेन कर्माङ्गत्वं निवारितं अङ्गित्वं न निवारितं तद्धारणार्थं पूर्वाधिकरणफलस्यैवोपसंहारः तस्मादुत्पन्ना विद्या स्वफलदाने कर्माणि नापेक्षते इत्याह अत एवेति ॥२५॥

18

॥२६॥ सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥

ब्रह्मविद्या स्वफले कर्माणि नापेक्षते तथा स्वोत्पत्तावपि नापेक्षते अन्यथा
कश्चिदपेक्षा कश्चिन्नेत्यर्धजरतीयापत्तिरिति प्राप्ते आह सर्वेति नार्धजर
तीयन्यायः योग्यतावशादेव एकस्यैव कार्यविशेषेषु अपेक्षानपेक्षयो
रुपपत्तेः यथा लाङ्गलवहने नापेक्षितोऽश्वो रथवहनेऽपेक्ष्यते तद्वत्स्वो
त्पत्तौ तु विद्या कर्मापेक्षते तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति
इति शान्तो दान्त इति श्रुतेः उपरतः श्रद्धा वित्तः समाहितो भूत्वात्मन्येवा
त्मानं पश्येदिति तस्माद् यज्ञादीनि शमादीनि च विद्या स्वोत्पत्तावपेक्षते ॥२६॥

॥शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ॥२

यदि कश्चिन्मन्येत यज्ञादीनां विद्यासाधनभावो न न्याय्यः विध्यभावात्
विविदिषन्तीत्यादिषु विद्यास्तुत्यर्थो न विधिः तं प्रत्याह शमद
माद्युपेतेति यज्ञेनेत्यादि श्रुतिरनुवादेनाभिवदनपरा इत्थं
महाभागा विद्या यज्ञादिभिरेनामवाप्नुमिच्छन्ति एवं शमाद्युपेतः स्या
त् विद्यार्थी शान्तो दान्तो स्यात् इत्यादिषु आत्मानं पश्यतीति श
मादीनां साधनत्वेन विधानात् विहितानां चावश्यानुष्ठेयत्वं प
श्येदिति माध्यन्दिना विस्पष्टमेव विधिम्पठन्ति ॥२७॥

॥सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥२८॥

प्राणविद्यायां श्रुतं न ह वा एवंविदि किञ्चनानन्नं भवतीति न ह वा
अस्यानन्नं जग्धं भवति सर्वमस्याद्नीयमेवेत्यर्थः किमिदं सर्वान्ना
नुज्ञानं विद्याङ्गमुत स्तुत्यर्थं कीर्तनं विधिरेवोपदेशस्य प्रवृत्ति
विशेषकरत्वात् अनेन सर्वभक्षणवचनेन भक्ष्याभक्ष्यविभाग
शास्त्रं बाध्यते इति प्राप्ते आह सर्वेति नेदं सर्वान्नानुज्ञानं विधीय
ते विधायकशब्दाभावात् अन्नं भवतीति वर्तमानोपदेशात् न च
श्वादिमर्यादं अन्नं मानुषेण देहेनोपभोक्तुं शक्यते तस्मादापदि
यावता प्राणरक्षणं भवति तावन्मात्रं निषिद्धमपि अन्नमभ्य
नुज्ञायते अत एव चाक्रायणो मुनिः प्राणात्यये इभ्येन सामि
खादितान् कुल्माषान् भक्षयित्वा शूद्रभाण्डोदकं न पपौ तत्रो
भयकारणं च मटचीहतेष्वित्यत्रालोचन तस्मादापदि स
र्वान्नाभ्यनुज्ञानं न ह वेत्यर्थवादः ॥२८॥

॥ अबाधाच्च ॥ २९॥

एवञ्च सद्याहारशुद्धौ सत्वशुद्धिरित्येवमादि भक्ष्याभक्ष्यशास्त्र मबाधितं भविष्यतीत्याह अबाधादिति ॥ २९॥

॥ अपि च स्मर्यते ॥ ३०॥

किञ्चापदि सर्वान्नभक्षणं स्मर्यते विद्वानविद्वाँश्च जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः लिप्यते न स पापेन पद्मपत्रमिवाम्भसेति तथानित्यं मद्यं ब्राह्मणो वर्जयेत् इति वर्जनमपि अनन्नस्य इत्याह अपि चेति ॥ ३०॥

॥ शब्दश्चातोऽकामकारे ॥ ३१॥

शब्दश्चानन्नस्य प्रतिषेधकः कामकारनिवृत्तिप्रयोजनः कठेषु तस्माद्ब्राह्मणः सुरां न पिबेत् सोऽपि नह्वा एवं विद्यस्यार्थवादत्वादुपपन्नतरो भवति तस्मादेवेर्थवादाः न विधय इत्याह शब्दश्चेति ॥ ३१॥

॥ विहितत्वाच्चाश्रमकर्मापि ॥ ३२

सर्वापेक्षा चेत्यत्राश्रमकर्मणां विद्यासाधनत्वमवधारितं इदानीं मुमुक्षोरपि आश्रममात्रनिष्ठस्य विद्यामकामयमानस्य अग्निहोत्रादीन्यनुष्ठेयानि न वेति तत्र विद्यामनिच्छतः फलान्तरकामस्य नित्यान्यननुष्ठेयानि इति प्राप्ते आह विहितेति आश्रममात्रनिष्ठस्यापि कर्तव्यान्येव नित्यानि कर्माणि यावज्जीवमित्यादिविहितत्वात् ॥ ३२॥

॥ सहकारित्वेन च ॥ ३३॥

यद्युक्तं नैवं सति विद्यासाधनत्वं स्यात् एषां तत्रोत्तरं सहकारीति एतानि विद्यासहकारीणि च एतदुक्तं सर्वापेक्षेति सूत्रे तस्मादुत्पत्तिसाधनत्वे एवैषां सहकारित्वोक्तिः यथा खदिरस्य नित्यसंयोगेन क्रत्वर्थेनाऽनित्येन संयोगेन पुरुषार्थत्वं तद्वत् ॥ ३३॥

॥ सर्वथापि त एवोभयलिङ्गात् ॥ ३४॥

सर्वथा आश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे च त एवाग्निहोत्राद्यो धर्माः अनुष्ठेयाः त एवेति कर्मभेदाशङ्कां निवर्तयत्यवधारणं नैव भेदः कर्मणां तमेतं वेदानुवचनेनेति अनाश्रितं कर्मफलमिति श्रुतिस्मृत्युभयलिङ्गात् ॥ ३४॥

॥ अनभिभवञ्च दर्शयति ॥ ३५॥

अनभिभवं चेति सहकारित्वस्यैवेतदुपोद्बलकं लिङ्गदर्शनम् अनभिभवं दर्शयति ब्रह्मचर्यादिसाधनसम्पन्नस्य रागादिक्लेशैः एष आत्मा नाभिभवतीति अंनसूचयेत्

प्रनुविन्दते इत्यादिना तस्मात् यज्ञादीनि आश्रमकर्माणि विद्यासहकारीणि च ॥३५॥

॥ अन्तरा चापि तु तद्दृष्टेः ॥ ३६॥

विधुरादीनां द्रव्यादिरहितानाञ्च आन्तरालिकानां विद्याधिकारोऽस्ति न वेति नास्तीति प्राप्ते आश्रमकर्मणां हि हेतुत्वं न त्वनाश्रमकर्मणामित्यत आह अन्तरेति अन्तरालि अनाश्रमिणं नवर्तमानोऽपि विद्याधिकारी तत् दृष्टेः रैक्वावाचक्नवी प्रभृतीनां एवम्विधानामपि ब्रह्मवित्व श्रुत्युपलब्धेः ॥ ३६॥

॥ अपि च स्मर्यते ॥ ३७॥

अपि चेति सम्वर्त प्रभृतीनां नग्नचर्यादि प्रयोगात् अनपेक्षिताश्रमकर्मणामपि महायोगित्वं स्मर्यते इतिहासेषु ॥ ३७॥

॥ विशेषानुग्रहश्च ॥ ३८॥

ननु लिङ्गमिदमेतावतोक्तं प्राप्तिस्तु अभिधीयते विशेषेणि जपोपवासदेवताराधनादिभिरनुग्रहः तथाच स्मृतिः जप्येनैव तु संसिद्ध्येत ब्राह्मणो नात्र संशयः कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते इत्यसम्भवादाश्रमकर्मणोऽपि जप्येऽधिकारं दर्शयति अनेकजन्म संसिद्धस्ततो याति परां गतिं तस्माद्विधुरादीनामप्यधिकारः ॥ ३८॥

॥ अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९॥

अत इति अतः अन्तरालवर्तित्वात् इतराश्रमवर्तित्वं ज्यायः विद्यासाधनं श्रुतिः लिङ्गात् तेनैति ब्रह्मवित् पुण्यकृत्तैजसश्च अनाश्रमी न तिष्ठेत् दिनमेकमपि द्विजः सम्वत्सरमनाश्रमी कृच्छ्रं चरेत् इति स्मृतिलिङ्ग ॥

॥ तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमातद्रूपाऽभावेभ्यः ॥ ४०॥

सन्त्यूर्ध्वरेतस आश्रमा इत्युक्तं तान् प्राप्तस्य कथञ्चित् ततः प्रच्युतिरस्ति न वेति संशये ब्रह्मचर्यं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् इत्याश्रमरोहणवत् परिव्राज्यात् वानप्रस्थ्ये इत्यवरोहोऽपि कश्चिद् रागवशात् कश्चित् पूर्वाश्रमकर्मश्रद्धावशात् युक्त इति प्राप्ते आह तद्भूतस्येति रागस्तावन्मिथ्याज्ञानमूलत्वात् निषिद्धः न च पूर्वाश्रमधर्मश्रद्धा युज्यते उत्तराश्रमिणः तं प्रत्यवहितत्वेन धर्मत्वाभावात् न चारोहवदवरोहोऽपि शिष्टाचारेण दृश्यते तस्मान्नास्त्यवरोहः ॥ ४०॥

॥ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१॥

नैष्ठिकब्रह्मचर्यादूर्ध्वरेतस्त्वमप्राप्य पुनः स्त्रीसङ्गेन दुष्टस्य प्रायश्चित्तं न भवति आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः प्रायश्चित्तं न पश्यामि

येन शुध्येत्स आत्मा हेति प्रायश्चित्तादर्शनवचनात् प्रथमो ब्रह्मचारी स्त्रीमु
पेयात् गर्दभ पशु माल भेतेत्यस्ति प्रायश्चित्तमिति चेन्न तस्य उपकुर्वाण विषयत्वा
त्वात् उपकुर्वाणोप्येवं वेदाध्ययनाङ्गत्वेन ब्रह्मचर्यमनुतिष्ठति तद्विषयम्प्राय
श्चित्तं तस्मादूर्ध्वरेतसोनष्टस्य प्रायश्चित्तं नोनिश्रासे आहनत्वेति यथोपकुर्वा
णस्य मधुमांसभक्षणे उपपातकत्वात् प्रायश्चित्तं पुनःसंस्कारो नियते तथोर्ध्व
रेतसो गुरुदारादिभ्योऽन्यत्र प्रच्युतिरुपपातकमेव ननुमहापापं ततः प्रायश्चित्त.
पुनःसंस्काराभ्यां शुद्धिर्भवति इति तादृक् पतनस्मरणाभावात् उपपद्यते प्राय
श्चित्तं गर्दभ पशुरेव ब्रह्मचारित्वसाम्यात् एव म्वन स्य परिव्राजकयोरपि
प्रायश्चित्तं वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षं वर्ध
येत् भिक्षुर्वानस्थवत् सोमवल्लीवर्जं स्वशास्त्र संस्कारश्च ॥ ४१॥

॥उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ॥ ४२॥
अपि एके आचार्याः उपपातकमेवेदं मन्यन्ते तदाह उपपूर्वमपीति यन्नैष्ठिकस्य
गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यं विशीर्यते न तन्महापातकं शास्त्रेतस्यागणनात्
तस्मादुपकुर्वाणवत् नैष्ठिकस्यापि प्रायश्चित्त भावं सत्त्वं इच्छन्ति ब्रह्मचारि
त्वाविशेषात् अवकीर्णत्वा विशेषात् च अशनवत् यथा मधुमांसाशने
व्रतलोप पुनःसंस्कारश्च एवमत्रापि तस्माद्भावोयुक्ततरः ॥ ४२॥

॥बहिस्तूभयथापि स्मृतेराचाराच्च ॥ ४३॥
ऊर्ध्वरेतसां प्रच्यवतां महापातकमुपपातकं वोभयथापि शिष्टैः तेबहिः कार्याः
इत्याह बहिस्त्विति प्रायश्चित्तं न पश्यामीत्युक्तत्वात् आरूढपतितं विप्रं मण्डलाच्च
विनिःसृतं उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत् इत्यादि निन्दा प्रायस्मृतेः
शिष्टाचाराच्च न हि तैः सह यज्ञाध्ययन विवाहादीनि आचरन्ति शिष्टाः ॥ ४३॥

॥स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४॥
अङ्गावबद्धोपासनेषु किं यजमानः कर्ता उत अध्वर्य्वादयः इति संशयः आ
त्रेय आचार्यः स्वामिनः यजमानस्य कर्मणो फलश्रुतेः वर्षति हास्मै
वर्षयति ह य एतदेवं विद्वान् वृष्टौ पञ्चविधं सामोपास्ते इति न चान्य
त्वे यजमानायेति नैञ्जिनामपि फलं दृष्टं तस्य वाचनिकत्वात्
तस्मात्स्वामिन एव फलं तदुपासनेषु कर्तृत्वमित्याह स्वामिन इति ॥ ४४॥

॥आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥ ४५॥
नैतत्सम्भवति स्वामिकर्माणीति किन्तु ऋत्विक्कर्माणि तानि स्युरिति औडुलोमि
राचार्यो मन्यते कुतः तस्मै सांगायकर्मणे ऋत्विक् परिक्रीयते तत्प्रयोगान्तःपा
तीनि चाद्वितीयादुपासनानि अधिकृताधिकारित्वात् तस्माद्गोदोहनादिवत्
कुर्युः तं ह बको दाल्भ्यो विदाञ्चकार स ह नैमिशीयानामुद्गाता बभूवेत्युद्गा
तृकर्तृकतां विज्ञानस्य दर्शयति इत्याह आर्त्विज्यमिति ॥ ४५॥

186

॥श्रुतेश्च ॥४६॥

श्रुतेश्चेति यां वै कांचन यज्ञे ऋत्विजः आशिषमाशासते यजमानायैव तामा
शासत इति तस्मादु हैवं विद्वानुद्गाता ब्रूयात् कं ते काममागायानीति च श्रुतेरंगो
पासनानां ऋत्विक्कर्तृत्वम् ॥४६॥

॥सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥४७॥
तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यं च पाण्डित्यं च नि
र्विद्याथ मुनिरमौनं च मौनं च निर्विद्याथ ब्राह्मण इति यतो ब्राह्मणभावः परम
पुरुषार्थः तस्माद् ब्रह्मवुभुत्सुः उपनिषत्तात्पर्यनिर्णयरूपं पाण्डित्यं सम्यक् स
म्पाद्य बालवन्नीरागत्वेन युक्तः अनुचिन्तयन्नात्मानं स्थातुमिच्छेत् ततः
पाण्डित्यबाल्ये निःशेषेण सम्पाद्याथ मुनिरिति न च विध्यश्रवणात् मुनित्वं
न विधेयम् न च कल्पनीयो विधिः पाण्डित्यशब्देन प्राप्तस्य मौनस्यापूर्व
त्वाभावात् मुनिशब्दोऽपि मन ज्ञाने इत्यस्माद्धातोरुत्पन्नः तस्मात् प्राप्त
स्य मौनस्य न विधिरिति प्राप्ते आह सहकार्यन्तरेति पूर्वोक्तपाण्डित्यस्य मु
निशब्दार्थत्वे प्रयोजनाभावान्निरन्तरज्ञाननिष्ठापूर्वार्थो मुनिशब्देनाभि
लक्षितः ततः तिष्ठासेदिति पदानुवृत्त्या विधिर्लभ्यते अस्मिंश्च ज्ञानान्तर
न्तर्येण प्रयोजनम् पुनः प्राबल्येन वासनावासितस्य तन्निवृत्त्यर्थत्वात्
तस्मान्निदिध्यासात्मकं मौनं विधेयम् सहकार्यन्तरं बाल्यपाण्डि
त्यापेक्षया तृतीयं विधीयते तद्वतः विद्यावतः सन्यासिनः यथा
स्वर्गकामो यजेतेति विध्यादौ सहकारित्वेनान्वाधानादि अङ्गं विधीयते

॥कृत्स्नभावात्तु गृहिणोपसंहारः ॥४८॥

कृत्स्नभावादिति कृत्स्नभावोऽस्य विशेष्यते बहुव्यायाम कर्मणि यज्ञादीनि ब्र
ह्मोपासनानि गृहस्थस्यापि कर्तव्यतयोपदिष्टानि आश्रमान्तरकर्माणि चा
हिंसेन्द्रियसंयमनादीनि तस्माद्गृहस्थस्योपसंहारेणेतरेषाम् ॥४८॥

॥मौनवदितरेषामप्युपदेशात् ॥४९॥

मौनवदिति यथा मौनं गार्हस्थ्यं च तत् छान्दोग्ये गुरुकुलवासो श्रुतिसि
द्धो तस्माच्चतुर्णामपि आश्रमाणामुपदेशाविशेषात् तुल्यवद्विकल्पसमु
च्चयाभ्यां प्रतिपत्तिः इतरेषामिति द्वयोराश्रमयोर्बहुवचनं वृत्तिभेदा
पेक्षयाऽन्तु आश्रमभेदापेक्षयेति ॥४९॥

॥अनाविष्कुर्वन्नन्वयात् ॥५०॥

अनाविष्कुर्वन्निति बाल्येन तिष्ठासेदित्यत्र बालस्य भावो बाल्यमि
त्ययोविशेषाद्बालस्य कर्म बाल्यं कामचारः कामवादादिनेति प्राप्ते आह

पाण्डित्यमौनाख्ययोः श्रवणमननिदिध्यासनयोः मध्ये बाल्यमविधित्वेन न श्रुत्यावि
नसिद्धं तस्य च भावशुद्धिरूपमुक्ता रागद्वेषमानावमानादिदोषग्रस्तेन नहिः श्रवणं
परित्यज्य परिव्राज्यङ्गं न्नु मशक्यत्वात् बालस्य भावः कर्म वा इति तद्धितेसति
वयसि यथेच्छाचारे भावशुद्धौ च समानो बाल्य शब्दः प्राप्तो तु मननस्याऽप्य
त्तमनुपयुक्तो प्रत्युत विरोधिनो मूढस्य प्रवृत्तमनसः मननविरोधित्वात्
तस्माद्भावशुद्धिरेव बाल्यं नेतरत् ॥ ५०॥

॥ ऐहिकमप्यप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५१॥

ऐहिकमप्येति श्रवणमननादीन्यासनेषु अनुष्ठीयमानेषु अस्मिन्नेव जन्म
नि ज्ञानं जायते इति नियम्यते इह वा जन्मान्तरे वेति कालविकल्पः तत्र इ
हैवेति कुतः श्रवणादि पूर्विका हि विद्या न कश्चित् अमुत्र मे विद्या जाय
तामिति अभिसन्धाय श्रवणादिषु प्रवर्तते एकजन्मनि तु फलं विद्यात्
माभिसन्धाय प्रवर्त्तमानो दृश्यते यज्ञादीन्यपि श्रवणादि द्वारेणैव विद्यां
जनयन्ति तस्मादैहिकमेव विद्याजन्मेति प्राप्ते आह ऐहिकं विद्याजन्म
भवत्यसति प्रतिबन्धे अयमर्थः प्रक्रान्तविद्यासाधनस्य कश्चित् प्रतिबन्धः
तदा इहैव कर्मविपाकेनोत्पद्यते विद्या यदा तु प्रतिबन्धः कश्चित्तदाऽमुत्रेति
सामग्र्यधीनत्वात् कार्यस्य श्रवणादिद्वारेणैव विद्योत्पद्यमाना प्रति
बन्धकक्षयापेक्षयैवोत्पद्यते गर्भस्थ एव च वामदेवः प्रतिपेदे ब्रह्मभाव
मितिवदन्ती श्रुतिर्जन्मान्तरसञ्चितात् साधनाज्जन्मान्तरे विद्योत्प
त्तिं दर्शयतीति तस्मादैहिकामुष्मिकं वा विद्याजन्म प्रतिबन्धक्षयापेक्षमिति सिद्धम् ॥ ५१॥

॥ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५२॥

यथा विद्यासाधनावलम्बिनः साधनवीर्यविशेषात् विद्यायामैहिकामुष्मि
कफलत्वकृतो विशेषप्रतिनियमः एवं मुक्तावप्युत्कर्षापकर्षकृतः क
श्चिद्विशेषप्रतिनियमः स्यादित्याशङ्क्याह एवं मुक्तिफलेति न खलु
मुक्तिफले कश्चिदेवं भूतो विशेष आशङ्कितव्यः कुतस्तदव
स्थावधृतेः मुक्त्यवस्था हि सर्ववेदान्तेषु एकरूपैवावधार्यते ब्रह्मै
व हि मुक्त्यवस्था न ब्रह्मणोऽनेकाकारयोगोऽस्ति एकलिङ्गत्वा
वधारणात् अस्थूलमनणु इति नेति नेति नान्यत्पश्यति
ब्रह्मैवेदममृतं पुरस्तादित्यादिश्रुतिभ्यः किञ्च विद्यासाधनम्
स्ववीर्यविशेषात् स्वफल एव विद्यायां कञ्चिदतिशयमासा
दयेत् न तु विद्याफले मुक्तौ अतिशयं वदाभ्यासो ध्यायध्यायसमा
प्तिं द्योतयितुम् ॥ ५२॥ इति ब्रह्मसूत्रतात्पर्यविवरणोत्तरमीमांसाया
यस्य तृतीयः पादः चन्द्रशेखराय नमः ओ३म्

॥ आवृत्तिरसकृदुपदेशात् ॥१॥

तृतीये ध्याये विद्यासाधनाश्रयो विचारः प्रायेणात्यगात् अनु चेध्या
य फलाश्रय विचार आरभ्यते प्रासङ्गिकश्च विचारयिष्यते आत्मा वा अ
रे द्रष्टव्यः श्रोतव्य इत्यादौ सकृत्प्रत्ययः कार्यः उत आवृत्त्येति तत्र
सकृत्स्यात् प्रयाजादिवत् तावतापि शास्त्रस्य कृतार्थत्वात् अश्रूय
माणात् आवृत्तिरशास्त्रार्थः स्यात् तस्मात्सकृदिति प्राप्ते आह आ
वृत्तिरिति श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादिना अस
कृदुपदेशात् प्रत्ययावृत्तिं सूचयति यावत्सम्यग्दर्शनं पूर्वत्र
प्रयाजादिस्तु अदृष्टफलविषयत्वादत्र तु ब्रह्मसाक्षात्कारलक्ष
णस्य दृष्टफलस्य सम्भवात् दृष्टे सम्भवति अदृष्टकल्पनाया अ
न्याय्यत्वात् व्रीह्यवघातवत् यावत्फलं श्रवणादि आवर्तनीयम् ॥१॥

॥ लिङ्गाच्च ॥ २॥

लिङ्गादप्यावृत्तिर्गम्यते इत्याह लिङ्गाच्चेति उद्गीथमन्त्रस्तुत्या आ
दित्यो उद्गीथ इत्येतदेकपुत्रतादोषेणापोद्य रश्मीन् पर्यावर्तय
तादिति रश्मिबहुत्वविज्ञानं बहुपुत्रतायै विदधत् सिद्धवत्प्र
त्ययावृत्तिं दर्शयति तत्सामान्यात् सर्वप्रत्ययेष्वावृत्तिः ॥२॥

॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥३॥

यः शास्त्रप्रतिपाद्यः आत्मा स जीवेन मदन्य इति ग्राह्यः उत स्वाभिन्न
त्वेनेति तत्र दुःख्यदुःखिनोर्जीवब्रह्मणोरेकत्वविरोधात् भिन्नत्वे
नेति प्राप्ते आह आत्मेति तु ततो ब्रह्मस्वरूपस्यैव स्वतो जीवस्या
तः करणोपाधिकृतो दुःखित्वादि संसारिधर्म इति पूर्वमुपपादि
तमतो वास्तवविरोधाभावात् इतित्वेनैव ब्रह्म ग्रहीतव्यम् अत
एवाहं ब्रह्मास्मि अयमात्मा ब्रह्मेति वाक्यैस्तत्त्वविदा आत्मत्वेनै
व ब्रह्म गृहीतं स्वशिष्यान् ग्राहयन्ति च तस्मादात्मत्वेनैव ब्रह्म गृही
तव्यम् ॥३॥

॥ न प्रतीके न हि सः ॥४॥

मनो ब्रह्मेत्युपासीत आदित्यो ब्रह्मेत्यादेश इत्यादिषु ब्रह्मदृष्टि
संस्कृतमन आदित्यादि प्रतीकमुपास्यं तत्प्रतीकं उपासकेन
स्वात्माभिन्नत्वेन प्रतिपत्तव्यं प्रतीकस्य ब्रह्मकार्यत्वेन ब्रह्मणो
भेदाभावात् जीवस्य ब्रह्माभिन्नत्वात् ब्रह्मद्वारोपास्य प्रतीकस्या

पासकस्य जीवस्य जगद्ब्रह्मभावेनैकत्वसम्भवात् इति प्राप्ते ब्रूते
न प्रतीकेन तीति यदि ब्रह्मकार्यस्य प्रतीकस्य ब्रह्मैक्यमवलोकेत
तदा प्रतीकरूपमेव विलीयेत घटस्य मृद्रूपेणैकत्वविलयदर्शना
त् यदि च जीवस्य ब्रह्मैक्यमवलोकेत तदा जीवस्यापाये ऽस्यु
पासकत्वं हीयेत न तर्हि उपासनस्योपासकस्वरूपतो मनका
र्यकार्यतो जीवब्रह्मणोरैक्यं न यतो जीव यत्नु जीवत्वहि व्यवद
त्यन्तभिन्नयोः प्रतीकोपासनयोरात्मकत्वं योग्यम् । तस्मान्न प्रती
के ऽहन्दृष्टिरस्ति ॥४॥

॥ब्रह्मदृष्टिरुत्कर्षात् ॥५॥

तत्रैव प्रतीके मनो ब्रह्मेत्यादौ मन आदित्यादिदृष्टिर्ब्रह्मणि कर्तव्या
उत आदित्यादिषु ब्रह्मदृष्टिः तत्र मनोदृष्टिर्ब्रह्मणि कृत्वा
त्वोपासनीयम् ब्रह्मणः फलदातृत्वेन उपासनार्हत्वात् इति
प्राप्ते आह ब्रह्मदृष्टिरिति ब्रह्मण उत्कृष्टत्वात् न दृष्टिर्निकृ
ष्टे मन आदित्यादौ कार्या लोके निकृष्टे भृत्ये राजदृष्टिं कृत्वा
राजवत्पूजयन्ति किन्तु मनो ब्रह्मेत्युपासीतेत्यत्र ब्रह्मशब्दस्य
शब्दपरत्वेन दृष्टिलक्षको भविष्यति मनःशब्दश्चानितिपरत्वात्
मुख्यार्थवाची यथा स्थाणुश्चोर इति प्रत्ययेऽत्र स्थाणुशब्दो
मुख्यार्थवाची चोरशब्दो दृष्टिलक्षकः तद्वत् न च ब्रह्मरूपस्य मनसः
उपास्यत्वे ब्रह्मणः फलदातृत्वानुपपत्तिर्नत्व ब्रह्म प्रति रूपा
स्यत्वेन कर्माध्यक्षत्वेन यथा फलं प्रयच्छति तद्वत्त्वापि सम्भ
वात् तस्मात् प्रतीके ब्रह्मणि ब्रह्मदृष्टिः कार्येति ॥५॥

॥ आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥६॥

य एवासौ तपति तमुद्गीथमुपासीतेत्यादिष्वेवताप्रतीकं कृत्वा कर्माङ्गभूतो
द्गीथदृष्टिः कार्या अथवोद्गीथादिष्वादित्यदृष्टिः तत्रोद्गीथादित्ययो
र्ब्रह्मकार्यत्वेन पूर्वोक्तन्यायानवतारेण नियामकाभावादनियम इति
प्राप्ते आदित्येति आदित्यदृष्ट्या कर्माङ्गं संस्कर्तव्यम् तथा सति
दृष्टिसंस्कृतकर्मणः फलातिशयसम्भवात् विपर्यये तु कर्माङ्गैः
देवतायां संस्कृतायां किन्त्वव फलसम्भवेन नहि स्वक्रियाङ्गं देवता
यतः फलसाधनम्भवति अन्यच्चादेवतायाः साधारणत्वेनोपमाना
यजमानयोः साधारणफलत्वप्रसङ्गात् तस्मादङ्गेष्वादित्यादिदृष्टिः कार्या ॥६॥

।। आसीनः सम्भवात् ।।७।।

अन्तकर्माङ्गावबद्धोपासनानां कर्मतन्त्रत्वान्न तत्र चिन्तानापि सम्यग्दर्शने वस्तुतन्त्रत्वाद् ज्ञानस्य प्रतीतिरिक्तोपासनेषु विचारः किं तिष्ठन्नासीनः शयानो वा अनियमेन प्रवर्तेत न नियमो नेति विचारे उपासनस्य मानसत्वाद नियमः शरीरस्थितेरिति प्राप्ते आसीन इति आसीन एवोपासीत कुतः सम्भवात् समानप्रत्ययप्रवाहकरणं हि उपासनम् न च तद्गच्छतो धावतो वा सम्भवति गत्यादीनां चित्तविक्षेपकरत्वात् तिष्ठतोऽपि देहधारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमं भवति शयानस्यापि निद्रयाभिभूयेत आसीनस्य तु न भूयान्दोषः इति तस्यैवोपासनम् ।।७।।

।।ध्यानाच्च।।८।।

अपि चोपासनापर्याय ध्यायत्यर्थः एव यत्समानप्रत्ययप्रवाहकरणम् ध्यायतिश्च प्रशिथिलाङ्गचेष्टेषु प्रतिष्ठितदृष्टिष्वेकविषयाक्षिप्तचित्तेषूपचर्यमाणो दृश्यते ध्यायति बकः ध्यायति प्रोषितबन्धुः इति आसीनस्य चानायासो भवति तस्मादप्यासीनकर्मोपासनम् ।।८।।

।।अचलत्वं चापेक्ष्य।।९।।

किं च ध्यायतीव पृथिवीत्यत्र पृथिव्यादिष्वचलत्वमपेक्ष्य ध्यायतिवादो भवति अतोऽप्युपासनस्यासीनकर्मत्वे लिङ्गमित्याह अचलत्वं चेति ।।९।।

।।स्मरन्ति च।।१०।।

शिष्टाः उपासनाङ्गत्वेनासनं स्मरन्ति शुचौ देशे प्रतिष्ठाप्येत्यादिना अत एव पद्मकासनादीनां उपदेशो योगशास्त्र इत्याह स्मरन्ति चेति ।।१०।।

।।यत्रैकाग्रता तत्राविशेषात् ।।११।।

दिग्देशकालेषु संशयः आसीक कश्चिन्नियमो नास्ति वेति प्राप्ते यागादिकेषु द्वारमधु प्राच्यादि दिगादि नियमदर्शनात् दिशादिरपि स्यादिति प्राप्ते आह यत्रेति दिग्देशकाले व्ववर्थलक्षणा एव यत्र मनसः सौकर्येणैकाग्रता भवति तत्रैवोपासीत प्राच्याद्यश्रवणात् समे शुचौ शर्कराशय इत्यादि सुहृदमभूत्वा मनोनुकूलत्वस्यैव नोधनम् तस्मादेकाग्रता तत्रैवेत्यर्थः ।।११।।

॥ आप्रायणात्तत्रापि हि दृष्टम् ॥१२॥

आवृत्तिः सम्यग्दर्शनकालेषु सत्सु वा सा न निवर्त्यते ताम्य वघातादिवत् कार्यपर्यवसानानीत्यपेक्षाद्यानि अभ्युदयफलानि उपासनानि तेषु चिन्ता किञ्चित्कालं मानसोपरमेऽपि यावज्जीवमिति तत्र किञ्चित्कालं प्रत्ययमभ्यस्योत्सृजेत् तावता प्रवृत्त्योपासनस्य सिद्धत्वादिति प्राप्ते आह आप्रायणादिति आप्रायणादेवावर्तयेत् प्रत्ययं अन्त्यप्रत्ययवशात् अदृष्टफलप्राप्तेः कर्माण्यपि जन्मान्तरोपभोग्यम् फलमारभमाणानि तदनुरूपविज्ञानं प्रयाणकाले आक्षिपन्ति सविज्ञानो भवति सविज्ञानमेवान्वक्रामतीति यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथा सङ्कल्पितं लोकं नयतीति श्रुतिभ्यः तृणजलूकानिदर्शनाच्च तस्मात्प्रतिपत्तिव्य फलभावना प्रत्ययास्ते च्या आप्रायणादावर्तनीयाः स तन एवं यं यं वापि स्मरन्भावं त्यजत्यन्ते कलेवरं इत्यादि स्मृतिरपि ॥१२॥

॥ तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥१३॥

गतस्तृतीयाध्यायशेषविचारः अथेदानीं ब्रह्मविद्याफलं चिन्त्यते ब्रह्माधिगमे सति तद्विपरीतं फलं दुरितं क्षीयते न वेति संशये फलार्थत्वात्कर्मणः फलमदत्त्वा न क्षीयते न चापाय क्षितान्यथैकलं तेषां नैमित्तिकत्वेनोपपद्यते गृहदाहेष्ट्यादिवत्तस्माद्ब्रह्मज्ञानिनोऽप्यस्त्येवापत्तेषु इति प्राप्ते आह तदधिगम इति ब्रह्माधिगमे उत्तरपूर्वयोरघयोः उत्तरस्याश्लेषः पूर्वस्य विनाशः कुतस्तद्व्यपदेशात् यथा पुष्करपलाशे आपो न श्लिष्यन्त एवमेवंविदि पापं कर्म न श्लिष्यते तथा पूर्वोपचितस्य नाशमप्याह श्रुतिः तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते भिद्यते हृदयग्रन्थिरित्यादिनाऽभुक्तं क्षीयते कर्मेति सगुणब्रह्मज्ञानविषयं तस्मान्नास्ति ज्ञानिनः पापलेपः ॥१३॥

॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥१४॥

मास्तु ज्ञानिनः पापलेपः धर्मस्य तु शास्त्रीयत्वात्पुण्यलेपस्त्वस्त्येवेति प्राप्ते आह इतरस्येति अकर्त्रात्मवस्तु सामर्थ्यात् पापवत्पुण्येनापि न लिप्यते सगुणज्ञानिनस्तु उपासनभिन्नं काम्यपुण्यं पापवत् धर्महेतुत्वात् पापसमवेतिवात् मर्शोऽभुतिः उभे उ हैवैष एते तरति सुकृतं दुष्कृतं चा सर्वे पाप्मानोऽतो निवर्तन्त इति तस्मात्पापवत्पुण्येनापि न लिप्यते ॥१४

॥ अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥१५॥

ज्ञानात्पूर्वं सञ्चिते पुण्यपापद्वये प्रारब्धे च तयोर्द्वयोरपि कर्तृत्वमा
त्मनः समानमिति ज्ञानोदये प्रारब्धाप्रारब्धयोरपि तत्काले नाश इति प्राप्ते
आह अनारब्धेति श्रुत्यनुभवयुक्तिभ्यः प्रारब्धयोरविनाशो गम्यते
तस्य तावदेव चिरं यावन्न विमोक्षे अथ सम्पत्स्ये न त्वविदो मुक्तिर्नित्यं
न चिरं किन्तु प्रारब्धक्षयाभावं यावदिह शरीरो विमोक्ष्यते तावदेव
विलम्बः प्राणदेहवियोगे सति ब्रह्म सम्पद्यत इति श्रुत्या तत्त्वविदः आ
देहपातं संसारोऽङ्गीकृतः एवम्विद्वदनुभवोऽपि स्फुटं युक्तिश्च यथा लोके
तूणादीनिर्गते बाणे धनुस्तस्य स्वीकारपरित्यागयोः स्वातन्त्र्येऽपि मुक्ते
बाणे स्वातन्त्र्यं नास्ति बाणो वेगक्षये स्वयमेव पतति एवञ्चक्रभ्रमणा
दिकमुदाहार्यम् तथा च ज्ञानस्यापि अनारब्धकर्मक्षयस्वातन्त्र्येऽपि
नारब्धकर्मणि स्वातन्त्र्यं तस्य प्रवृत्तफलत्वात् यदाग्रहेण तदङ्गीक
रोति तदा विद्यासंग्रहोच्छेदापत्तिः तस्मान्नारब्धयोर्नाशः किन्त्वना
रब्धकार्ययोरेव सुकृतदुष्कृतयोर्विद्याक्षय इति निर्गलितार्थः ॥१५॥

॥ अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥१६॥

पुण्यस्याश्लेषविनाशयोः अघन्यायोऽतिदिष्टः इदानीं ज्ञानात्पूर्वमिह जन्म
नि जन्मान्तरे वा अनुष्ठितं यदग्निहोत्रादि नित्यकर्म तस्यापि काम्यकर्मव
दकर्त्रात्मबोधमहिम्ना नाशो भवतीति प्राप्ते आह अग्निहोत्रादीति
द्विविधं नित्यं कर्म एकं प्राधान्येन चित्तशुद्धिप्रदमपरं अनुषङ्गेन
स्वर्गादिफलप्रदं च द्वितीयस्य तु नाशोऽस्तु नाम प्रथमस्य तु विद्याया
मुपयुक्तत्वान्नाशो नरोधितुमशक्यः किन्तु ज्ञानस्य यत्कार्यं तदेवैत
स्यापि कार्यं तमेतं वेदानुवचनेनेति श्रुतेः न च ज्ञानकर्मणोः विनाश्य
नाश्यत्वात् कथमेककार्यकरत्वं ज्वरमरणकार्यकरकयोरपि दधिविषयो
र्मन्त्रसंयुक्तयोस्तुष्टिपुष्टिकार्यदर्शनात् तद्वत्कर्मणापि ज्ञानप्रवृत्त
स्य मोक्षकार्यत्वोपपत्तेः नन्वनारभ्यो मोक्षः कथमस्य कर्मणः कार्य
इति तु न आरादुपकारकत्वात् ज्ञानस्येव प्रापकं सत्कर्मणाञ्ज्ञानो
पकारतामित्युपपद्यते ॥१६॥

॥ अतोऽन्यापि ह्येकेषामुभयोः ॥१७॥

किंविषयं पुनरिदं श्लेषविनाशवचनं किंविषयश्चाविनियोगवचनं
तस्य पुत्रा दायमुपयन्ति सुहृदः साधुकृत्यां द्विषन्तः पापकृत्याम्

इत्याकांक्षायां उत्तरयति अतोन्यापीति अग्निहोत्रादि नित्यकर्मणा अन्या
पेक्षास्ति साधुकृत्यापापा: फलेच्छया क्रियते तस्या एव विनियोग: एकेषां
शाखिनां सुहृद: साधुकृत्यामुपयन्तीति तस्या एवेदं अपवदनं लेश
विनाशनिरूपणम् तथा चैव आत्मीयकस्य काम्यकर्मणो विद्याभ्यस्य
नुपकारकत्वे उभयोरपि जैमिनि बादरायणयो: सम्प्रतिपत्ति: ॥१७॥

॥यदेव विद्ययेति हि ॥१८॥

नित्यमग्निहोत्रादि दुरितक्षयद्वारेण मन:शुद्धिकारणं सत् विद्यया
सहैककार्यम्भवति तच्चाग्निहोत्रादि अङ्गव्यपाश्रय विद्यासंयुक्तं केवलं
वा य एवं विद्वान् अग्निहोत्रं जुहोति इत्यादिना आङ्ग विद्या संयुक्तमे
व तत्कर्म ब्रह्मज्ञानोपयोगी न तया रहितं बुद्ध्या युक्तो यया पार्थ
कर्मबन्धं प्रहास्यसि दूरेण ह्यवरं कर्म बुद्धियोगाद्धनञ्जयेत्यादि स्मृ
तिरिति प्राप्ते आह यदेव विद्ययेति सत्यमेतद्विद्यासंयुक्तं वीर्यवत्त
रमिति तथापि तद्रहितं नात्यन्तमनपेक्षं तमेतमात्मानं यज्ञेन वि
विदिषन्ति इत्यविशेषेणाग्निहोत्रादेर्विद्याहेतुत्वेन श्रुतत्वात्
वीर्यवत्तरं होति तरपा निरुपासनस्य कर्मणो वीर्यमात्रमप्यनुजा
नाति तस्मात्सोपासन निरुपासनयोरुभयोरपि तारतम्येन
विद्यासाधनत्वं ॥१८॥

॥भोगेन त्वितरे क्षपयित्वाऽथ सम्पद्यते ॥१९॥

अधिकारिपुरुषाणां मुक्तिरस्ति नवेति संशये नास्तीत्याशङ्क्यते
कुत: प्रारब्धकर्मणां यभोगाय च जन्मसु स्वीकृतेषु पूर्वार्जितवि
द्यानां सत्यामपि यत्कर्म क्रियते तस्य फलप्रदत्वे सत्युत्तर
जन्मपरम्पराया: आवश्यकत्वादिति प्राप्ते आह भोगेन त्विति
प्रारब्धं कर्म स्वफलेन सुखदु:खभात्रयेत तदर्थमेव प्रवृत्तत्वात्
नहि विलोपाय नियमेन किञ्चिदनुष्ठितं येन विद्या वितुद्ये
तनवा मरणेन विद्यालोप: सुषुप्तिव्यवधानेन तल्लोपादर्श
नात् अतो विद्यावतां बहुभिरपि क्रियमाणै: कर्मभि अ
-अप्र संश्लेषात् अधिकारिणां मुक्ति: यद्यपीदं गुणोपसं
हारे निरूपितं तथापि तस्यैवात्र स्मरणम् ॥ इति ब्रह्मसूत्र
तात्पर्यविवरणी चतुर्थाध्यायस्य प्रथम: पाद: ॥१॥

॥वाङ्मनसि दर्शनाच्छब्दाच्च॥१॥

अथापरासु विद्यासु फलप्राप्तये देवयानपथमवतारयिष्यन् प्रथममुत्क्रा
न्तिक्रममाचष्टे छान्दोग्ये अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि सम्प
द्यते मनः प्राणे प्राणस्तेजसि तेजः परस्यां देवतायामिति वागादेर्दशे
न्द्रियाणां लीयन्ते तत्र किं स्वरूपतो लयो वृत्त्या वेति सन्देहे वाङ्मनसी
ति श्रुतौ वृत्तिशब्दाश्रवणात् स्वरूपलय इति प्राप्ते आह वाङ्मन
सीति मनसो वागादिकं प्रत्यनुपादानम् उपादाने एव कार्यस्य
स्वरूपलय इति (प्राप्ते आह वाङ्मन) मनसि दृष्टेर्दर्शनान्न वागा
दीनां स्वरूपलय इति वृत्तिस्त्वनुपादाने विलयमर्हति जलप्र
सिक्ताङ्गारेषु दाहप्रकाशात्मिकाया वृत्तेरनुपादानेऽपि लयद
र्शनात् श्रुतौ वाक्शब्देन वृत्तिर्लक्ष्यते वृत्तिवृत्तिमतोरभेदो
पचारात् तस्माद्वागादिवृत्तीनां मनसि लयः कुतो दर्शनात्
दृश्यते हि कारणवृत्तेः पूर्वोपसंहारो लोके कथं तर्हि वाङ्म
नसि सम्पद्यत इति शब्दः तत्राह शब्दाच्च चशब्दोऽप्यस्मिन्
पक्षेऽवकल्पते वृत्तितद्वतोरभेदात् तस्मादुपशान्ततेजाः पुनर्भ
वमिन्द्रियैर्मनसि सम्पद्यमानैरित्यत्राविशेषेण सर्वेन्द्रिया
णां मनसि सम्पत्तिः श्रूयते तत्रापि चक्षुरादीनामपि सवृत्ति
कं मनसि वृत्तिद्वारेणैव सर्वेन्द्रियाणि मनोऽनुवर्तन्ते सर्वेषां
मनसि उपसंहाराविशेषेऽपि वाचो ग्रहणं वाङ्मनसि इत्यु
दाहरणानुरोधेनेत्यत आह अत एवेति ॥२॥

॥तन्मनः प्राण उत्तरात् ॥३॥

वाङ्मनसीत्यत्र वृत्तिसम्पत्तिविवक्षया उक्तं मनः प्राण इत्यत्र वृत्ति
सम्पत्तिरेव उत वृत्तिमत्सम्पत्तिरिति विचारे तेजसोऽन्नग्रह
णप्रकृतिकत्वोपपत्तेश्च वृत्तिमत एव सम्पत्तिरिति प्राप्ते आह
तन्मन इति तदपि गृहीतबाह्येन्द्रियवृत्तिकं मनः वृत्तिलय
द्वारेणैव प्राणे लीयते उत्तरात् वाक्यात् मनः प्राण इति रूपात् न च
स्वरूपतो मनोलयः प्राणे अतत्प्रकृतित्वात् न च दृष्टं मन
सः प्राणप्रकृतित्वं न हि दृष्टान्नप्राणादिकेन तत्प्रकृतित्वेन मनः
प्राणे सम्पत्तुमर्हतीत्यन्नमनः सम्पद्यते तासु चान्नमयस्तेन

वाङ्मनसोऽयासाऽऽक्रान्तिर्विद्वदविदुषोः समाना प्रासृत्युपक्रमात्
अविशेषस्मरणात् विद्वान् ज्ञानप्रकाशितं मूर्धन्यमाश्रनाडीद्वारम-
प्राप्यते प विद्वांस्तु देहभूतबीजसूक्ष्मारब्धास्य कर्मवशुकोदेह
मनुभवतीन् संसरति इत्युभयत्र भेदः विदुषस्तत इदमवाऽमातिदुष्टस्तु
ऐहिकसुखदुःखप्राप्तिरपि समानाऽऽक्रान्त्योमीजेत्वुदकफलभेदात
वेषम्यमस्तु नन्वमृतत्वं विदुषा प्राप्तव्यं तत्कुतो भूताश्रयत्वं स्युप
क्रमाविद्यत्राह अनुपोष्य इदं सर्वं अदग्ध्वाऽमृतत्वं प्राप्स्यतीति
तस्मात् समानैव विद्वदविदुषोरुत्क्रान्तिः ॥७॥

॥तदापीतेः संसारव्यपदेशात् ॥८॥

तेजः परस्यां देवतायामित्यत्र तेजः साध्यक्षं सप्राणं सकरणग्रामं भूतान्त
रसहितं परस्यां देवतायां सम्पद्यत इत्युक्तं तत्रात्यन्तिके सम्पत्ति भवि
तुमर्हति परमात्मनो भूतोपादानत्वात् इतिप्राप्ते आह तदपीते
रिति, तत् श्रोत्रादिकरणाश्रयभूतं तेजआदि भूतसूक्ष्ममा
पीतेः संसारमोक्षात् सम्यग्ज्ञाननिमित्ताद् वतिष्ठते किन्तु
वृत्तिलय एवास्मिन् सारिणः तत्त्वविदस्तु न दुक्तप्रकारेण भूतानां
स्वरूपेणालयोऽस्तु तस्य निर्णोऽव्याप्तत्वात् ॥८॥

॥सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥९॥

तच्चेतरभूतसहकृतं तेजो जीवस्याश्रयो भूतं स्वकारणत्वरूपतः प्रमाणत
श्च सूक्ष्ममवति कुतः नाडीनिर्गमनेन सौक्ष्म्यमुपलभ्यते सुया तेनुत्वास
सूतयपत्तिः स्वच्छत्वाच्चाप्रतिघातः अत एव देहान्निर्गच्छन् पार्श्वस्थैर्नो
पलभ्यते ~~सतः(प्रसिद्धस्थूलशरीरातिरिक्त)~~ इत्याह सूक्ष्ममिति ॥९॥

॥नोपमर्देनातः ॥१०॥

अतः सूक्ष्मत्वान्नास्य स्थूलशरीरस्योपमर्देन दाहादिनिमित्तेन न सूक्ष्म
शरीरमुपमर्द्यत इत्याह नेति ॥१०॥

॥अस्यैव चोपपत्तेरेष ऊष्मा ॥११॥

मृतावस्थायां स्थितेऽपि देहे रूपादिषु सत्स्वपि ऊष्मा नोपलभ्यते जीवदशा
यामेवोपलभ्यते अतः प्रसिद्धस्थूलशरीरातिरिक्ताश्रय एवैष ऊष्मेत्यु
पपद्यते ऊष्मा एव जीविष्यति शीतो मरिष्यति इति श्रुतेरित्याह अस्यैवेति ॥

॥प्रतिषेधादिति चेन्न शारीरात् ॥१२॥

न तस्य प्राणा उत्क्रामन्त्यत्रैव समवनीयन्त इति तत्त्वविदामुत्क्रान्ति
निवारितानिबध्य निबध्यमानोत्क्रान्तेः प्रपादानं जीवा न देहः देहानुत्क्रा
न्तो मरणाभावः प्रसज्येतत्याशङ्क्य प्रतिषेधादिति तस्याः प्राणनिर्दिष्टं
नेत्यं यथानान्यत्र गच्छन्ति नापीदृश्यन्ते किन्तु स्वरूपे लीयन्ते

॥ अतश्चायनेऽपि दक्षिणे ॥२०॥

दक्षिणायनेऽमृतस्योपासकस्य न ब्रह्मलोकप्राप्तिः उत्तरायणस्यैव ब्रह्म
लोकमार्गत्व स्मरणात् अपि च भीष्मस्योत्तरायणप्रतीक्षणं व्यर्थं स्या
दिति शङ्कायामाह अत इति उत्तरायणशब्देन कालो न विवक्षितः किन्त्वाति
वाहिकः इत्यग्रे वक्ष्यते भीष्मप्रतीक्षणं तु पितृप्रसादलब्ध स्वच्छन्दमर
णत्वख्यापनाय यदि कालविशेषे मरणाधीनं फलं नाद्रियेत तदाया
ज्ञिकफलविद्याप्रसक्त्येन तस्माद् दक्षिणायने मृतोऽपि विद्याफलं प्राप्नोति ॥२०॥

॥ योगिनः प्रति च स्मर्यते स्मार्ते चैते ॥२१॥

ननु यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः प्रयाता यान्ति तं कालं वक्ष्यामि
भरतर्षभ इति कालं प्राधान्येनोपक्रम्याहरादिकालविशेषः स्मृतावनावृ
त्तये नियमितः कथं रात्रौ दक्षिणायने वा प्रयातोऽनावृत्तिं यायादित्याशङ्क
यामाह योगिन इति योगिनः प्रति प्रथमहरादिकालविनियोगोऽनावृत्त
ये स्मर्यते स्मार्ते च ते योगसांख्ये न श्रौते प्रयोगविषयभेदात् प्रमाणविशेषा
च नास्य स्मार्तस्य कालविनियोगस्य श्रौतविज्ञानेऽवतारः ननु अग्निर्ज्यो
तिरहः शुक्लः षण्मासा उत्तरायणम् धूमो रात्रिस्तथा कृष्णः षण्मासा
दक्षिणायनमिति श्रुतावपि देवयानपितृयाणौ प्रत्यभिज्ञायेते स्मृतावपी
ति चेन्न स्मार्ते चैते यं कालं वक्ष्यामीति स्मृतौ कालप्रतिज्ञानात् विरोधमा
शङ्क्य परिहृतः सः पादसमाप्तौ च प्रागुक्तार्थं यत्र प्रतिवाहिका इहान्ते
न तदा कश्चिद्विरोधः ॥२१॥ इति चतुर्थाध्यायस्य द्वितीयः पादः ॥०॥

॥ अर्चिरादिना तत्प्रथितेः ॥१॥

ब्रह्मलोकमार्गः छान्दोग्यबृहदारण्यकयोः पञ्चाग्निविद्यायामर्चिरादिकः प्र
पठ्यते तेऽर्चिषमभिसम्भवन्ति अर्चिषोऽहरित्यादि विद्यान्तरे वा यदा वै पुरुषो
ऽस्माल्लोकात्प्रैति स वायुमागच्छतीति कौषीतकिविद्यायामग्निलोकादिकं स एतं देवयान
मार्गमापद्याग्निलोकमागच्छतीति तान्यन्यत्र कस्मात्स्वीकृत्य
विद्यामार्ग इति पक्षे प्राह अर्चिरादिनेति सर्वस्यापि दूरतोऽर्चिरादिरेक
एव मार्गः कुतः अग्निविद्याविषयत्वे अग्निविद्यान्तरोपास
कानामप्यर्चिरादेरेव पठितत्वात् य इत्थं विदुर्ये चामी अरण्ये श्रद्धा
तप इत्युपासते तेऽर्चिषमभिसम्भवन्तीति तस्य च प्रथितेः सर्वत्र ख्यातत्वात् अन्येषां
मार्गगुणानां संहाराभ्यासानन्तरं स्यादिति नामगुणत्वेऽन्ते भावनीयः
तस्मादेक एवार्चिरादिमार्गः ॥१॥

॥ वायुशब्दादविशेषविशेषाभ्याम् ॥२॥

ते अर्चिषमभिसम्भवन्ति अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्या
न्षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं
चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान्ब्रह्म गमयतीति श्रुतमार्गे श्रा
खान्तरश्रुतौ वाय्वादिकं यथाक्रमं निवेशनीयमित्याशङ्क्यते तत्र वायोरन्तर

तेषु ब्रह्मलोकेषु परापरावतो वसन्ति इति श्रुत्यन्तरे विशेषित-त्वाच्च कार्यमेव ब्रह्मात्रावगन्तव्यम्। ब्रह्मलोकानिति श्रुत्यन्तरे श्रुतं बहुवचनं कार्यपरत्वेऽवस्थाभेदेनोपपद्यते। तस्मात् कार्यविषयमेवेदमित्याह विशेषितेति ॥८॥

॥कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥१०॥

ननु कार्यब्रह्मप्राप्तौ न स पुनरावर्तते इति न संभवति कस्माद्न्यस्य नित्यत्वासंभवात् दर्शयति च देवयानेन प्रस्थितानामनावृत्तिं। न स पुनरावर्तते इत्यादिना। इत्याशङ्कयाह कार्येति। कार्यब्रह्म प्राप्त्यनन्तरं ब्रह्मलोकप्रलये सति तत्रैवोत्पन्न सम्यग् ब्रह्मज्ञानाः तदध्यक्षेण हिरण्यगर्भेण सहातः परं परं पदं प्रतिपद्यन्ते इति क्रममुक्तिरनावृत्त्यादिश्रुत्यभिधानेभ्योऽभ्युपगन्तव्या: ॥१०॥

॥स्मृतेश्च ॥११॥

उक्तार्थे सम्मतिमाह स्मृतेरिति। ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदमिति। तस्मात् कार्यब्रह्मविषया गतिरिति सिद्धान्तः ॥११॥

॥ परं जैमिनिर्मुख्यत्वात् ॥१२॥

यच्च पूर्वपक्षमाशङ्कयायं सिद्धान्तः कृतः स सूत्रैरेव प्रदर्श्यते परमिति। जैमिनिराचार्यः स एतान् ब्रह्म गमयतीत्यत्र परमेव ब्रह्म प्रापयतीति मन्यते ब्रह्मशब्दस्य तत्र मुख्यत्वात् ॥मुख्ये एव संप्रत्यय इति न्यायात् ॥१२॥

॥ दर्शनाच्च ॥१३॥

एवं तयोर्ध्वमायन्नमृतत्वमेति इति गतिपूर्वकममृतत्वं दर्शयति। अमृतत्वञ्च परब्रह्मण्युपपद्यते न कार्ये विनाशित्वात्। यच्चान्यत्र श्रुतिः तदल्पं तन्मर्त्यमिति वचनात् परविषयैषा गतिरित्याह दर्शनादिति ॥१३॥

॥ न च कार्ये प्रतिपत्त्यभिसन्धिः ॥१४॥ ।
किञ्च प्रजापतेः सभां वेश्म प्रपद्ये इति नायं कार्यविष-
यः प्रत्यभिसन्धिः । नामरूपयोर्निर्वहिता ते यदन्तरा
तद्ब्रह्मेति कार्यभिन्नस्यैव ब्रह्मणः प्रकृतत्वात् । यशो
ऽहं भवामि ब्राह्मणानामिति च न तस्य प्रतिमाऽस्ति यस्य
नाम महद्यश इति परस्यैव च यशोनामत्वप्रसि-
द्धेः तस्मात्परविषया गतिश्रुतय इति जैमिनिमत
माह न च कार्येति ॥ तावेतौ पक्षावाचार्येणोक्तौ तत्र
गत्युपपत्त्यादिभिः कार्यब्रह्मपरत्वपक्ष एवाभितो मु-
ख्यः सन् शुद्धब्रह्मपरत्वपक्षमाभासयितुं समर्थ इ-
ति स एव सिद्धान्तो मुख्यत्वादिति द्वितीयपक्षः पू-
र्वपक्ष एव । नह्यसत्यपि संभवे मुख्यस्यैवार्थस्य ग्रह-
णमित्याज्ञाऽस्ति कस्यचित् । परविद्याप्रकरणेऽपि
तत्स्तुत्यर्थं विद्यान्तराश्रयगत्यनुकीर्तनमुपपद्यते,
विष्वङ्ङन्या उत्क्रमणे भवन्तीति वत् । प्रजापतेः स-
भां वेश्मेति तु पूर्ववाक्यविच्छेदेन कार्येऽपि प्रतिपत्त्या
भिसन्धिर्न विरुध्यते तस्मादपरविषयैव गतिश्रुतिः
केचिदाविपर्यासेनानयोः पक्षयोः पूर्वपक्षसिद्धान्त
भावमाहुस्तन्न गन्तव्यत्वानुपपत्तेर्ब्रह्मणः । न च गत-
मेव गम्यते । न चौपाधिकं गन्तव्यत्वं प्रसिद्धसर्व-
विषयस्य शुद्धस्यैव तथाश्रुतेः । अधिकं तत्र
मपि विस्तरभयान्नोच्यते । तस्मात्कार्यं बादरिरित्येव +
पक्षः स्थितः । परं जैमिनिरिति च पूर्वपक्षत्वेन
पक्षान्तरप्रतिभानं शिष्यबुद्धिवैशद्याय सूत्रित
मित्यभिप्रायः सूत्रकृतः ॥१४॥ ।

॥ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा दोषात्तत्क्रतुश्च ॥१५॥
कार्यब्रह्मविषया गतिर्न परविषया इत्युक्तमिदानीं स एतान्
ब्रह्म गमयतीत्युक्तोऽमानवः पुरुषो निर्गुणब्रह्मोपासकानेव
नयति उत प्रतीकोपासकानपि । तत्र एतानित्यविशेषश्र-
वणात्सर्वानिति प्राप्तेऽभिधाय अप्रतीकेति — प्रतीकालम्ब-
नभिन्नान्नयतीति बादरायणो मन्यते । नह्यप्रतीका-
लम्बनान्नयतीत्युभयथाभ्युपगमे कश्चिद्दो-
षोऽस्ति । अनियमन्यायस्य प्रतीकव्यतिरिक्तेषु

प्रपत्तेः। तत्क्रतुं च ब्रह्मक्रतुं च ब्राह्ममैश्वर्यमाप्नुयेन। तं यथा यथोपासते तदेव भवतीति श्रुतौ ब्रह्मभावनात्मकः क्रतुर्ब्रह्मप्राप्तिहेतुरित्यवगमेन नहि प्रतीकोपासकानां ब्रह्मक्रतुरस्ति येन ते सत्यलोकं गच्छेयुः। तस्मादसति विशेषवचने तत्क्रतुन्यायेन ब्रह्मोपासकानामेवतत्प्राप्तिर्नेतरेषाम् ॥१५॥।

॥ विशेषं च दर्शयति ॥१६॥

किञ्च यथा प्रतीकेषु वाचीनानि फलानि श्रूयन्ते तत्रास्य यथाकामचारो भवतीति नाम ब्रह्मेत्युपासितुः शब्दशास्त्रलक्षणे नाम विशेषस्वातन्त्र्यं भवतीत्यर्थः। कथं तर्हि पञ्चाग्निविद्योपासकस्य सत्यलोकप्राप्तिःवचनबलात्क्रमः तस्मान्न्यायतो न प्रतीकोपासकान्ब्रह्मलोकं प्रापयत्यमानवः पुरुष इत्याह विशेषेति। न प्रतीकालम्बनानामितरेषु तुल्यत्वम् ॥१६॥

इति ब्रह्मसूत्रतात्पर्यविवरणे चतुर्थाध्यायस्य तृतीयः पादः

॥ सम्पद्याविर्भावः स्वेन शब्दात् ॥१॥

एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते इत्यत्र किं देवलोकाद्युपभोगस्थानेष्विव आगन्तुकेन केनचिद्रूपेणाभिनिष्पद्यते, उतात्ममात्रेणेति तत्रागन्तुकेनैव निष्पत्तिर्मोक्षस्यापि फलत्वादिति प्राप्ते आह संपद्येति, केवलेनैवात्मनाविर्भवति न धर्मान्तरेण कुतः स्वेनेति, स्वशब्दात् पूर्वमपि विद्यत एव स्वरूपम्, न च स्वकीयमित्यर्थः, विशेषणानर्थक्यात्। यद्यदयं मत्वा सम्पादते तत्तत्स्वकीयमेवेति कस्य व्यावृत्त्यै विशेष्येत। आत्मवाचित्वे न स्वकीयत्वव्यावृत्तिः प्रयोजनम्। न चाभिनिष्पत्तिरुत्पत्तिः पूर्वसिद्धस्योत्पत्त्यभावात्। किन्तु तत्त्वज्ञानेन ब्रह्मतात्विर्भावो निष्पत्तिः न चाभिसम्पत्त्यभिनिष्पत्त्योरैकार्थ्यम् - सम्पत्तिर्नाम तत्त्वप्रदार्थशोधनम्

अभिनिष्पत्तिस्तु आकाशादिवबोध्या । न च पूर्वसिद्धत्वे मोक्षस्य फलत्वानुपपत्तिः । निवृत्ताशेषबन्धनत्वाकारेण पूर्वसिद्धत्वाभावात् । तस्मात्पूर्वसिद्धस्वरूपमेव मुक्तिरूपम् ॥१॥

॥ मुक्तः प्रतिज्ञानात् ॥२॥

कः पुनर्विशेषः पूर्वावस्थातो ऽत आह मुक्त इति । योऽत्राभिनिष्पद्यत इत्युक्तः स सर्वबन्धविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते, पूर्वत्रावस्थात्रये भवत्यतीतरोदितीव विनाशमेवापीतो भवतीत्यवस्थात्रयकलुषितेनात्मनायं विशेषः, कथमिदानीं मुक्त इत्यवगम्यते प्रतिज्ञानात्, एतन्त्वेव ते भूयो व्याख्यास्यामीत्यवस्थात्रयदोषविहीनम् । आत्मानं व्याख्येयत्वेन प्रतिज्ञाय, अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशत इत्युक्त्वा, स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः इत्युपसंहरति, रोगनिवृत्ताविव रोग इति ॥२॥

॥ आत्मा प्रकरणात् ॥३॥

कथं पुनर्मुक्त इत्युच्यते ज्योतिःशब्दस्य भौतिके ज्योतिषि निरूढत्वात् विकारस्य तत्वप्रसिद्धेः । न चानिवृत्तो विषयात् कश्चिद् विमुक्तो भवितुमर्हतीति चेन्नेत्याह आत्मेति — ज्योतिरात्मैव प्रकरणात् "य आत्माऽपहतपाप्मा विजर" इत्यनेन प्रकृते परात्मनि सति न भौतिकं ज्योतिर्ग्राह्यम् 'प्रकृतहानाप्रकृतप्रक्रियाप्रसङ्गात्' तद्देवा ज्योतिषां ज्योतिरिति ॥३॥

॥ अविभागेन दृष्टत्वात् ॥४॥

ननु पूर्वोक्तं मुक्तरूपं पुरुषस्माद् ब्रह्मणो भिन्नकर्तृकर्त्व्यपदेशात् "एष, संप्रसादः परं ज्योतिरुपसंपद्य

त्यत्र संप्रसादशब्दार्थो जीव इति कल्पितेन ज्योतिःशब्दार्थो
ब्रह्मैकमत्वेन' तस्मान्मुक्तस्य जीवस्य रूपं ब्रह्मणो
भिन्नमिति प्राप्ते आह – अविभागेनेति । परेणात्मनाऽ
विभक्त एव मुक्तोऽवतिष्ठते, कुतः दृष्टत्वात "तत्त्वमसि
"अहं ब्रह्मास्मि" "यत्र नान्यत्पश्यति" "न तु तद् द्वितीय
मस्ति ततोऽन्यद्विभक्तं यत्पश्येत्" इत्यादीन्यविभा
पार गेनात्मानं दर्शयन्ति, यथादर्शनमेव च फलं तत्क्र
तुन्यायात् " यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति
एवं मुने विजानत आत्मा भवति गौतमेति वाक्यान्यवि
भागमेव दर्शयन्ति स्वे महिम्नीति च दर्शनात् ॥ ४॥

॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५॥

स्वेन रूपेणाभिनिष्पद्यते नापररूपेणेति स्थितमधु
ना तद्विशेषश्चिन्त्यते । मुक्तस्वरूपं द्वेधा श्रुतम् "
य आत्मा अपहतपाप्मा सत्यकामः सत्यसंकल्प-
इति सविशेषम् "यथा सैन्धवघनोऽनन्तरोऽबाह्यः
कृत्स्नो रसघन एव एवं वा अरेऽयमात्मा प्रज्ञानघन एव
इति निर्विशेषं श्रुतम् । एते रूपे विरुद्धत्वान्मुक्तिद
शायां न संभवतोऽतः कालभेदेन व्यवस्थाप्यते
इति प्राप्ते आह – ब्राह्मेणेति – प्रतिपत्तृभेदाद् युगप
देव सविशेषत्वनिर्विशेषत्वे उपपद्येते मुक्तदृष्ट्या
निर्विशेषत्वं बद्धप्रतीत्या तु द्वितीयमिति प्रतिपत्तृभेदसम्भ
वस्यास्तित्वात् किं कालभेदकल्पनया तस्माद् युगपदेव
सविशेषनिर्विशेषत्वे इति ॥ ५॥

॥ चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६॥

मतान्तरमाह – तन्मात्रेणेति, यद्यप्यपहतपाप्मत्वा
दयो भेदेन निर्दिष्टास्तथापि शब्दविकल्पजा एते –
ते 'चैतन्यमेवाऽस्यात्मनः स्वरूपमिति चैतन्यमा
त्रेणाभिनिष्पत्तिर्युक्ता प्रज्ञानघनादिभ्यः सत्यका
मत्वादीनामौपाधिकत्वात्तेषाम् ' न चैतन्यवत्स्वरू

पसम्पन्नः अनेकाकारत्वप्रतिषेधात्, अतएव
जक्षणादिशब्दा। दुःखाभावमात्रपरं तस्मान्निरस्ता
शेषप्रपञ्चेन प्रसन्नेनाव्यपदेश्येन बोधात्मनाभि
निष्पद्यते इत्यौडुलोमिर्मन्यते ॥६॥

॥एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥७॥
एवमिति। एवमपि पारमार्थिकचैतन्यमात्रस्वरूपाभ्यु
पगमेऽपि व्यवहारापेक्षया पूर्वस्याप्युपन्यासा
दिभ्योऽवगतस्य ब्राह्मैश्वर्यरूपस्याप्रत्याख्या
नं बादरायण। आचार्यो मन्यते ॥७॥

॥संकल्पादेव तु तच्छ्रुतेः ॥८॥
पूर्वाधिकरणक्रमेण विदेहमुक्तौ निर्धारितायां
ब्रह्मलोकापेक्षणीयमुक्तेरविशिष्टत्वात्तद्वि
चारः प्रवर्तते। तत्रार्चिरादिमार्गेण ब्रह्मलोकं
गतस्योपासकस्य भोग्यवस्तुसृष्टिराम्नायते।
स यदि पितृलोककामो भवति संकल्पादेवा
स्य पितरः समुत्तिष्ठन्ति, इत्यादि तत्र किं संक
ल्पमात्रात्समुत्थानमुत निमित्तान्तरसहितात्
इति संदेहे बाह्योऽपि हेतुरपेक्षितः नतु संकल्प
मात्रं तथात्वे आशामोदकतुल्यत्वेन प्रकृतभोग्या
भावप्रसङ्गादिति प्राप्ते आह संकल्पेति - संक
ल्पादेवेति एवकारेण पितृमातृस्वसृगन्धमाल्यादि
भोग्यसृष्टौ बाह्यहेतुव्यावर्तनात्। न चाशामोदक
साम्यम् उपार्जितमोदकसमत्वस्य। पि संक
ल्पयितुं शक्यत्वात् उपासनाप्रसादेन संकल्प
शक्तेर्निरङ्कुशत्वात् तस्मात्संकल्पमात्रं भोग्यसृ
ष्टिहेतुः ॥८॥

॥अतएवचानन्याधिपतिः ॥९॥

मृतकप्रत्यसंकल्पस्यान्यस्य संकल्पादेन (स.) प्रत्यादि पत्ति:। नास्यान्योऽधिपतिर्भवति। नहि प्राकृतोऽपि संकल्पय अन्य स्वामिकत्वं सत्यां गतौ प्यात्मन: संकल्पयति। मुक्तस्य सत्यसंकल्पत्वात् सर्व मनः शरीरादिकं भवतीत्याह श्रुति: 'व्रय पद्दूत्मान मनुविद्य व्रजन्ति एतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवतीत्याह यत एवेति ।। ९।।

॥अभावं बादरिराह ह्येवम् ॥१०॥

मनस्तावत् संकल्पसाधनं सिद्धम् 'न स शरीरेन्द्रियाणि पुन: प्राप्ते स्वर्परस्य विदुष: सन्ति न वेति चिन्त्यते 'तत्र बादरि: शरीरस्येन्द्रियाणां चाभावं विदुषो महीयमानस्य मन्यते यत एवं ह्याह श्रुतिः 'मनसैवैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके इति मन: शरीरादिना स्याद्यदि मनसैवेति विशेषणं न स्यात्। तस्मान्मोक्षेऽभाव: शरीरेन्द्रियाणाम् ।।१०।।

॥भावं जैमिनि विकल्पामननात्॥११॥

जैमिनिस्तु मनोवच्छरीरेन्द्रियाणां मपि भावंमुक्तं प्रतिमन्यते। यत: "स एकधा भवति त्रिधा भवतीत्यनेकधाभावमामनन्ति:। नह्यनेकविधत्वं शरीरभेदेन विना समञ्जसं भवति। यद्यपि निर्गुणमविद्यायां मनेधा भावविकल्प: कथ्यते। तथापि विद्यमानमेवेदं सगुणावस्थायां मैश्वर्यभूतविद्यास्तते संकीर्त्यते इति यत: सगुण विद्याफल भावेनावतिष्ठते इत्याह भावं जैमिनि ।।११।।

॥द्वादशाहवदुभयं बादरायणोऽत: ॥१२॥

बादरायणस्तूभयविधत्वं साध्यं मन्यते यदा शरीरि-
तां संकल्पयति तदा सशरीरो भवति यदा त्वशरी-
रतां तदाऽशरीर इति सत्यसंकल्पत्वात् सत्यसंक-
ल्पवैचित्र्याच्च द्वादशाहवत् यथा द्विविधो द्वादशा-
हः सत्रात्मकोऽहीनश्च उभयलिङ्गश्रुतिदर्श-
नात् एवमत्रापीत्याह द्वादशाहवदिति ॥१२॥

॥तन्वभावे सन्ध्यवदुपपत्तेः॥१३॥
यदा तु तनोः सेन्द्रियशरीरस्याभावः तदा सन्ध्ये
स्थाने शरीराद्यभावेऽप्युपलभ्यमाना एव पित्राद-
यः कामा भवन्ति एवं मोक्षेऽपि स्युः एवं ह्युपप-
द्यते इत्याह तन्वभाव इति ॥१३॥

॥भावे जाग्रद्वत्॥१४॥
भावे तनोर्यथा जागरिते विद्यमाना एव पि-
त्रादयः कामा भवन्त्येवं मुक्तस्याप्युपपद्य-
ते इत्याह भाव इति ~~॥१४॥~~

॥~~प्रदीपवदावेशस्तथा हि दर्शयति ॥१५॥~~
भावं जैमिनिरित्यत्र सशरीरत्वं मुक्तस्योक्तम्।
तत्र हि यो भवतीत्यादिना [illegible]दनेकदेहस्वी-
कारे [illegible] आत्मा भवतः तत्रैको देहः सात्मकः
इतरे निरात्मकाः आत्ममनसोर्नहि भवस्या-
भूतत्वात् कल्पना भवा इति प्राप्ते आह ॥१५॥ ~~॥१५॥~~
॥१५॥ प्रदीपवदावेशस्तथा हि दर्शयति। यथैकदे-
व प्रदीपोऽनेकप्रदीपभावमापद्यते विकारश-
क्तियोगात् एवमेक एव विद्वान् ऐश्वर्ययोगा-
दनेकभावमापन्नः सर्वाणि शरीराण्याविशति
कुतः तथा हि दर्शयति शास्त्रं स एकधा भवति-

२०

त्रिवामवोत, शास्त्रं नारु यन्त्रवद्‌शरीरसम्प्रयग-
मेनड्डाव कल्पते नापि जीवान्तरावेश-नव निरात्म
नां शरीराणां प्रवृत्ति: सम्भवति पत्यात्ममनसो-
र्भेदानुपपत्तेरनेकशरीरयोगासम्भव इति एकमनोऽनु-
वर्तीनि समनस्कान्येवापराणि सत्यसंकल्पत्वात्स्र-
क्ष्यति सृष्टेषु तेषूपाधिभेदादात्मनोऽपि भेदेनाऽधि
ष्ठातृत्वं योक्ष्यते एवैव योगनामनेक शरीरयोग
प्रक्रिया योगशास्त्रे। ननु मुक्त एवं मत्कस्याने कश
रीरावेशलक्षणमैश्वर्यं परस्तत्केन कं विजानीयात्
ननु तद्विद्वतीयमस्ति यद्विजानीयात् इत्यादि श्रुतिर्वि
शेषविज्ञानं वारयतीत्यत आह ~~स्वाप्यये~~ति ॥१५॥

॥स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥१६॥

(~~॥जगद्‌व्यापारवर्जं प्रकरणाद सन्निहितत्वाच्च॥१७॥~~)

स्वाप्यय: सुषुप्ति: सम्पत्ति: कैवल्यं तयो सुषुप्तिकैवल्ययोरन्य
तरावस्थामपेक्ष्यैतद्‌विशेषसंज्ञाभाववचनं केन कं वि-
जानीयात् यतस्तत्रैवैतदधिकारवशाद। विष्कृतं हि एते-
तेभ्यो भूतेभ्य: समुत्थाय तान्येवानुविनश्यति न प्रेत्य
संज्ञाऽस्ति, सगुणविद्याविद्याविपाकावस्थान्त्वेत
त्स्वर्गादिवदवस्थान्तरं यत्रैतदैश्वर्यमुच्यते तस्माददो
ष: ।७। सगुणब्रह्मणो, ह्रोपासका: सह मनसैश्वरसा
युज्यं गच्छन्ति ते भोगयोग्यं देहेन्द्रियमात्रसद्भाव
मत विपर्ययदिदं सकलास्रष्टृत्वं तत्रा प्राप्नोति स्वारा
ज्यमिति श्रुत्या निरवग्रहैश्वर्यमिति प्राप्ते आह जगदिति
॥१७॥

॥जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च॥१७॥

(~~॥प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्ते:॥१८॥~~)

वियदादिजगत्सृष्टिप्रतिपादकप्रकरणेषु सर्वत्र परमा
त्मैव जगत्स्रष्टृत्वेनावगम्यते न कोऽपि योगी मुक्तो वा।
अन्यथाऽनेकेश्वरत्वे सति कश्चित्संस्रक्ष्यति कश्चि
त्संजिहीर्षति इति जगदव्यवस्थान स्यात् कथं हि

स्वाराज्य श्रुतिः ईश्वराधीन स्वाराज्याभिप्राया इति उपासितोषित ईश्वरो भोगभावसिद्धये तेषां स्वाराज्यं ददौ मौक्तस्य तत्त्वविद्योत्पादनेन ददौ, तस्माज्जगत्सृष्टौ स्वातन्त्र्याभावेऽपि भोगमोक्षयोः तेषां स्वातन्त्र्यमस्तीति. आप्नोति स्वाराज्यमित्यादि प्रत्यक्षोपदेशाद् विदुषामपि निरवग्रहमैश्वर्यं न्याय्यं स्यादिति प्राप्ते अभिधीयते प्रत्यक्षेति ॥१७॥

॥ विकारावर्ति च तथाहि स्थितिमाह ॥१९॥

आधिकारिकमण्डलस्थोक्तेः पूर्वपक्षोक्तं न युतः आधिकारिको यः सवितृमण्डलादि विशेषायतनेष्ववस्थितः परमेश्वरस्तदायत्तैवेयं स्वाराज्यप्राप्तिरुच्यते यत उत्तरत्र आप्नोति मनसस्पतिमित्याह ' यो हि सर्वमनसां पतिः पूर्वसिद्ध ईश्वरः तं प्राप्नोतीत्युक्तं तदनुसारेणैवोत्तरत्र वाक्पतिः चक्षुस्पतिरित्याह एवमन्यत्रापि यथासम्भवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यमिति ॥१८॥

॥ विकारावर्ति च तथाहि स्थितिमाह ॥१९॥

विकारावर्त्यपि च नित्यमुक्तं परस्पेश्वररूपमास्ति न केवलं विकारमात्रगोचरं सवितृमण्डलाद्यधिष्ठानं तथा ह्यस्य द्विरूपां स्थितिमाह श्रुतिः । एतावानस्य महिमा ततो ज्यायांश्च पूरुषः । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीति । न च तन्निर्विकारस्वरूपमितरालम्बनाः प्राप्नुवन्तीति शक्यं वक्तुमतत्क्रतुत्वात्तेषामतो यथा द्विरूपे ईश्वरे निर्गुणरूपमनवाप्य सगुण एवावतिष्ठते एवं सगुणेऽपि निरवग्रहमैश्वर्यमनवाप्य सावग्रह एवावतिष्ठन्त इति ॥१९॥

॥ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥१८॥

२१२॥

॥ दर्शयतश्चैवं प्रत्यक्षानुमाने ॥२०॥

दर्शयतश्च श्रुतिस्मृती विकारावर्तित्वं परस्य ज्योतिषः "न तत्र सूर्यो भाति न च चन्द्रतारकं न तद्भासयते सूर्यः" इत्यादि विकारावर्तित्वं परस्य ज्योतिषः प्रसिद्धमित्यर्थः ॥२०॥

॥ भोगमात्रसाम्यलिङ्गाच्च ॥२१॥

इतश्च न निरङ्कुशं विकारालम्बनानामैश्वर्यं यस्माद् भोगमात्रमेवैषामनादिसिद्धेनेश्वरेण समानमिति श्रूयते 'तमाह- आपो वै खलु मीयन्ते लोको ऽसाविति यथैतां देवतां सर्वाणि भूतानि अवन्ति एवं हैवंविदं सर्वाणि भूतान्यवन्ति तेनैतस्यै देवतायै सायुज्यं सलोकतां जयतीत्यादि भेदव्यपदेशलिङ्गेभ्य इत्याह भोगमात्रमिति ॥२१॥

॥ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥२२॥

ननु सातिशयत्वादन्तवत्त्वमैश्वर्यस्य स्यात्ततश्चैषामावृत्तिः प्रसज्येतेति प्राप्ते आह भगवान् बादरायणाचार्यः अनावृत्तिरिति। नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन ये यान्ति ब्रह्मलोकं शास्त्रोक्तविशेषणं ग च्छन्ति यस्मिन्नरः ... च ह वै ण्यपणवौ ब्रह्मलोके तृतीयस्यामितो दिवि यस्मिन्नैरंमदीयं सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता: पूर्वे ब्रह्मणो यस्मिंश्च प्रभुविमितं हिरण्मयं वेश्म यश्चानेकधा मन्त्रार्थवादादिप्रदेशेषु प्रपञ्च्यते ते तं प्राप्य चन्द्रलोकादिवत् न भुक्तभोगा आवर्तन्ते

कुतस्तयोऽर्चिमार्गप्राप्नाम्नतत्वमेति नैतेषां पुनरावृत्तिः एतेन प्रतिपद्यमाना इमं मानवं नावर्तन्ते ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते इत्यादि शब्देभ्यः अनन्तवत्त्वेऽप्यैश्वर्यस्य यथानावृत्तिः तथा वर्णितं पूर्वमेव सम्यग्दर्शनविध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिः तदाश्रयणेनैव हि सगुणशरणानामपि अनावृत्तिरिति अनावृत्तिः शब्दादित्यस्याभ्यासः सूत्रे शास्त्रपरिसमाप्तिं दर्शयति ॥२२॥ इति श्री ब्रह्मसूत्रतात्पर्यविवरणे चतुर्थाध्यायस्य तुरीयः पादः ॥ समाप्तं च ब्रह्मविचारशास्त्रम् ॥

~~[illegible] ॥~~

अथ:

लोकवाणि निधिचन्द्र ब्रह्ममितेऽब्दे विक्रमीये मासे तेऽरविवारे । पौषमासि । लिखितात्मनवीनां वृत्ति मीमांसां सचिवाः प्रविदन्तु —

217

॥ भामती ॥

॥ उ टीप्पणी ट ॥

षड्भागेति – सर्वज्ञतातृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः
अचिन्त्यशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥१॥

ज्ञानं वैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः स्रष्टृत्वमात्मसम्बोधो ह्यधिष्ठातृत्वमेव च अव्ययानि दशैतानि नित्यन्तिष्ठन्ति शङ्करे ॥२॥